॥ अथ श्रीमज्ज्ञानार्णवानित्यातंत्रसारं प्र:॥

श्रीन्ना० १

नित्या०

श्रीगणेशायनमः॥श्रीगुरुगणपतिस्वेष्टदेवताभ्योनमः॥श्री
गुरुदक्षिणामूर्तिगुरुभ्योनमः॥अथश्रीमंत्रार्णवनित्या
तंत्रप्रारंभः॥श्रीदेव्युवाच॥गणेशनंदिचंडेनस्कंदेंद्रपरिवा
रित॥सर्ववंद्यगणाधीशंकिंत्वयाजप्यतेसदा॥१॥अक्षमा
लेतिकिंनामसंशयोमेहृदिस्थितः॥शब्दातीतंपरंब्रह्मत
मेवपरमार्थवित्॥२॥कथयानंदनिष्यंदसांद्रमानसनिश्च
यात्॥श्रीईश्वरउवाच॥कथयामिवरारोहे यन्मयाजप्यते
सदा॥३॥हकारादिसकारांतामातृकापीठरूपिणी॥चतु
र्दशस्वरोपेताबिंदुत्रयविभूषिता॥४॥अनुस्वारेणदेवेशि
बिंदुनैकेनमंडिता॥विसर्गेणचबिंदुभ्यांसंलग्नाभ्यांविराजि २
ता॥५॥कलामंडलमाख्यातंशक्तिरूपंमहेश्वरि॥ककारा

दिसकारांतावर्णास्तुशिवरूपिणः॥६॥व्यंजनत्वात्सदानंद
नोच्चारसहितायतः॥उच्चरेत्स्वरसंभिन्नोस्तदादेवीनसंश
यः॥७॥पंचाशद्वर्णरूपेणशब्दाख्यंवस्तुकथ्यते॥अकारः
प्रथमोदेविक्षकारांतिमईष्यते॥८॥अक्षमालेतिविख्याता
मातृकावर्णरूपिणी॥शब्दब्रह्मस्वरूपायंशब्दातीतंतुजप्य
ते॥९॥शब्दातीतंपरंधामगणनारहितंसदा॥आत्मस्व
रूपंजानीहिहसस्तुपरमेश्वरः॥१०॥अस्मिन्नेवपरेतत्व
बिंदुत्रयविभूषिते॥मातृकासंपुटत्वेनसंस्थितंव्याप्तिमाग
तं॥११॥बिंदुत्रयंप्रवक्ष्यामिबीजरूपंवरानने॥हकारंबिंदु
रूपेणब्रह्माणंविद्धिपार्वति॥१२॥सकारःसर्गबिंदुभ्यांहरि
श्चाहंसुरेश्वरि॥अविनाभावसंरुद्धानालोकेहरिहराविति॥

१३॥ तत्रस्थबिंदुर्महेशानि वामाशक्तिर्निगद्यते॥ विश्वंवमंति
यस्मात्तत्वामेयंपरिकीर्तिता॥ १४॥ ज्येष्ठातुवैष्णवीशक्तिः
पालयंतीजगत्त्रयं॥ ततोरौद्रीग्रसंतीतुक्रमेणपरमेश्वरी॥
१५॥ एवंबिंदुत्रयंविद्धिगुणत्रयविभूषितं॥ बिंदुशब्देनशू
न्यंतुतथापिगुणसूचकं॥ १६॥ इच्छाज्ञानक्रियारूपंभूर्भुवः
स्वःस्वरूपकं॥ पुरत्रयात्मकंविद्धितत्त्वत्रयमयंप्रिये॥ १७॥
बिंदुत्रयेमहेशानिसर्वमेतत्प्रतिष्ठितं॥ अंबिकाबिंदुभिर्दे
वीगुणत्रयपरंपरा॥ १८॥ जाग्रत्स्वप्नसुषुप्तिश्चबिंदुत्रयम
वादिके॥ जाग्रत्सत्वगुणाज्ञेयाकेवलंशक्तिरूपिणी॥ १९॥
मनोव्यावृत्तिविस्ताराद्दुःखदोषाभिलाषिणी॥ शिवरूपासु
षुप्तिस्तुसर्वव्यावृत्तिहारिणी॥ २०॥ देहधर्मपरित्यक्ताशिवत

त्त्वस्वरूपिणी॥ तमोगुणमयीकर्मग्रसंतीमोक्षरूपिणी॥ २१॥
सुषुप्त्यंतेजागरादौस्वप्नावस्थारजोमयी॥ उभयैर्लक्षणैर्मु
क्तासूक्ष्मालक्षणलक्षिता॥ २२॥ अवस्थात्रयमेतत्तुकथितंबिं
दुसंभवं॥ एतस्मिन्बिंदवेज्ञातेतूर्यावस्थांशृणुप्रिये॥ २३॥ नि
द्रांतेजागरस्यांतेस्फुरतामात्रलक्षणा॥ अवस्थापूर्णताप्राप्ता
तूर्यावस्थापराकला॥ २४॥ भावाभावपरित्यक्तागुणातीतासु
निश्चला॥ इयमेवयदादेविमनसाप्राप्यतेतदा॥ २५॥ उन्मनी
नामसद्रूपाज्ञानवल्लीचिदात्मिका॥ बिंदुत्रयेणनादेनप्रसूता
नंदरूपिणी॥ २६॥ बिंदुत्रयसमायोगात्त्रिपुरानामरूपिणी॥
वर्णातीतासवर्णापिकेवलंज्ञानचित्कला॥ २७॥ एनांविद्यांस
माराध्यासर्वज्ञत्वंमयिप्रिये॥ उपास्यतेमयादेवित्रिपुरान्यास
मालया॥ २८॥ इतिश्रीमज्ज्ञानार्णवेनित्यातंत्रेस्वरूपद्वयमा

श्रीत्रा०
२

तंत्रामे प्रथमपटलः ॥१॥ श्रीदेव्युवाच ॥ त्रिपुरा परमेशानि त्त्वा नित्या
नमार्गेण सूचिता ॥ तत्स्वरूपेण कथय यद्यहं तव वल्लभा ॥१॥ त्रि-
पुरायाः प्रकारश्च मंत्रभेदश्च किं विधिः ॥ सर्वं तच्छ्रोतुमिच्छा-
मि येन सौभाग्यमाप्नुयां ॥२॥ श्रीईश्वर उवाच ॥ त्रिपुरा त्रिवि-
धा देवि बाला तु प्रथमा शृणु ॥ यया विज्ञातया देवि साक्षात्स्मर-
गुरुर्भवेत् ॥३॥ सूर्यस्वरं समुच्चार्य बिंदुनादकलान्वितं ॥ स्व-
रांते पृथिवीयुक्तं सूर्यस्वरविभूषितं ॥४॥ बिंदुनादकलाक्रांतं
सर्गवान् भृगुरव्ययः ॥ शक्रः स्वरसमोपेतो विद्येयं त्र्यक्षरी म-
ता ॥५॥ गंगातरंगकल्लोलवाग्गुंफप्रदायिनी ॥ महासौभाग्य-
जननी महासारस्वतप्रदा ॥६॥ महासौंदर्यसुभगा महामृत्यु- २
विनाशिनी ॥ ब्रह्मविष्णुसुरेंद्राद्यैर्वंदिता पापहारिणी ॥७॥
सर्वतीर्थमयी देवि स्वर्णरत्नादिदायिनी ॥ सर्वलोकमयी सर्वलो-

६

॥८॥ सर्वानंदमयी देवी सर्वराजवशंकरी

कामुकवशंकरी ॥ सर्वक्षेत्रमयी देवी सर्वकार्यार्थसाधिका ॥८॥ म-
हामोक्षप्रदा शांता महाभोगप्रदायिनी ॥ वक्त्रकोटिसहस्रैस्तु जि-
ह्वाकोटिशतैरपि ॥९॥ वर्णितुं नैव शक्येयं विद्येयं त्र्यक्षरा परा ॥ पंच-
वक्त्रेण जिह्वाभिः वर्णितुं नैव शक्यते ॥१०॥ वाग्भवेनैव महसा वा-
गीशत्वप्रदायिनी ॥ कामराजेन बीजेन शक्रगोपस्फुरत्त्विषा ॥११॥ त्रि
त्रैलोक्यं मोहयंतीयं शक्तिबीजेन सुव्रते ॥ स्फुरत्सुवर्णवर्णेन
सौभाग्यं तस्य मंदिरे ॥१२॥ एतस्याः साधनं देवी कथयामि समास-
तः ॥ प्रातरुत्थाय देवेशि ब्रह्मरंध्रे निजं गुरुं ॥१४॥ स्मृत्वा देवीमयी-
भूत्वा तत्प्रभापटलामलं ॥ स्नानकर्म ततः कुर्यान्मूलमंत्रं स्मरन् बु-
धः ॥१५॥ त्रिवारमंजलौ वारि मंत्रयित्वा तु मूर्धनि ॥ निक्षिपेत्प-
रमेशानि त्रिधा चाचम्य तर्पयेत् ॥१६॥ त्रिधा चैव प्रोक्षयेद्देहं सूर्या-
यार्घ्यं निवेदयेत् ॥ मूलमंत्रेण देवेशि सूर्यमंत्रेण वा प्रिये ॥१७॥
शिवबीजं वह्निसंस्थं वामनेत्रविभूषितं ॥ बिंदुनादसमायुक्तं हंसः

पदमथोच्चरेत्॥१८॥ अनेनमनुनादेविसूर्यायार्घ्यंनिवेदयेत्॥य
थाशक्त्याजपेन्मंत्रंगायत्रींपरमाक्षरे॥१९॥ मूलविद्याद्यमुच्चार्य
वागीश्वरीचविद्महे॥ द्वितीयंबीजमुच्चार्यकामेश्वरीचधीमहि॥२०॥
तृतीयंबीजमुच्चार्यतन्नःशक्तिःप्रचोदयात्॥ यथा [illegible]
आद्यागमंडपमाविशेत्॥२१॥ धातारंचविधातारंगंगांचयमुनांत
था॥ द्वारश्रियंचदेहलींचपुरुषंवास्तुसंज्ञकं॥२२॥ संपूज्यपरमे
शानिपूजयेदासनंबुधः॥ पराबीजंसमुच्चार्यतत्त्वाधारपूर्वकं॥
शक्तीतिपदमालिख्यकमलासनमालिखेत्॥ ङे-तेनमःपदंक
त्वाआसनस्यमनुःप्रिये॥२३॥ उपविश्यततोदेविभूतान्संत्रास
येद्बुधः॥ भूतशुद्धिंविधिंकुर्यात्प्राणायामक्रमेणतु॥२४॥ वायुबी
जंसमुच्चार्यषट्कोणाद्यागतंमहत्॥ धूम्रवर्णंमहेशानिशोषयेत्त
नंवैतनुं॥२५॥ आसनेसम्यगासीनोवामेनापूरयेच्चोदरं॥ कुंभकेन
त्रिराहृत्यादक्षिणेनचरेचयेत्॥२६॥ कनिष्ठानामिकांगुष्ठैर्यन्ना ४

सापुटधारणं॥ प्राणायामःसविज्ञेयस्तर्जनीमध्यमेविना॥२७॥ वा
मकुक्षिस्थितंपापपुरुषंकज्जलप्रभं॥ ब्रह्महत्याशिरायस्यस्वर्ण
स्तेयभुजद्वयं॥ सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं॥ तत्संसर्गि
पदद्वंद्वमंगप्रत्यंगपातकं॥२८॥ उपपातकरोमाणंरक्तश्मश्रु
विलोचनं॥ खड्गचर्मधरंक्रुद्धंकुक्षौपापंविचिंतयेत्॥३०॥ शोष
येत्तेनबीजेनदेहंचपरमेश्वरि॥ पापेनसहितंशुष्कंकृत्वातेनक्र
मेणहि॥३१॥ वह्निबीजेनसंदग्ध्वापापेनसहितंशिवे॥ पापेन
रहितंपश्चात्प्लावयेदमृताम्बुना॥३२॥ प्राणप्रतिष्ठामंत्रेणजीव
देहेनिधापयेत्॥ सुखहृत्तंसमुच्चार्यहंसस्तुविपरीततः॥३३॥
उच्चरेत्परमेशानिविद्येयंत्र्यक्षरीभवेत्॥ प्राणप्रतिष्ठाम[illegible]सर्व
कर्माणिसाधयेत्॥३४॥ तेनैवविधिनादेवि[illegible]कुर्या[illegible]आत
नुं॥ विशुद्धदेहोदेवेशिन्यासंकुर्यात्समाहितः॥३५॥ ऋषिरस्य

महेशानिदक्षिणामूर्तिरव्ययः ॥ न्यसेच्छिरसि हृज्ज्वलात्पंक्तिश्छं
दो मुखे च प्रिये ॥ ३६ ॥ देवता हृदये बाला त्रिपुरा परमेश्वरी ॥ बीजं तु वा
ग्भवं शक्तिस्तार्तीयं कीलकं तथा ॥ ३७ ॥ कामराजं महेशानि [illegible] दो
न्यास उदाहृतः ॥ नाभ्यादिपादपर्यंतं गलादानाभि चापरं ॥ ३८ ॥
मूर्द्धादिगलपर्यंतं त्र्यक्षरीं विन्यसेत्क्रमात् ॥ वामपाणितले चैकं द
क्षपाणितले तथा ॥ ३९ ॥ उभयोः संपुटे देवि यां त्रिबीजं विन्यसेत्प्रि
ये ॥ पंचबाणान्क्रमेणैव करांगुलिषु विन्यसेत् ॥ ४० ॥ अंगुष्ठा
दिकनिष्ठांतं क्रमेण परमेश्वरि ॥ थांद्वयं समालिख्य वह्निसंस्थं
क्रमेण हि ॥ ४१ ॥ मुखवृत्तेन नेत्रेण वामेन परिमंडितं ॥ बाणद्वय
मिदं प्रोक्तं मानंदं भूमिसंस्थितं ॥ ४२ ॥ चतुर्थस्वरबिंद्वंनादरूपं
वरानने ॥ कांतं शक्रसमायुक्तं वामकर्णविभूषितं ॥ ४३ ॥ बिंदुना
दसमायुक्तं सर्गवान्चंद्रमाः प्रिये ॥ पंचबाणान्महेशानि नामा

निशृणु पार्वति ॥ ४४ ॥ क्षोभण द्रावणौ देवि तथाकर्षण संज्ञकः ॥ व
श्यान्मादौ क्रमेणैव नामानि परमेश्वरि ॥ ४५ ॥ कामांस्तत्रैव विद्धि
यास्तेषां बीजानि मे शृणु ॥ पराबीजं मध्यबाणं वाग्भवं परमेश्व
रि ॥ ४६ ॥ तूर्यबाणं ततः क्लीं वस्त्री बीजं चक्रमालिये ॥ पंचकामा
न्महेशानि नामानि शृणु वल्लभे ॥ ४७ ॥ काममन्मथकंदर्पमक
रध्वजसंज्ञकः ॥ मीनकेतुर्महेशानि पंचमः परिकीर्तिताः ॥ ४८ ॥
एतान्विन्यस्य देवेशि करन्यासं ततः परं ॥ मूलविद्याद्विरावृत्त्या
सर्वांगुलितलेषु च ॥ ४९ ॥ षडंगक्रमयोगेन मातृकां विन्यसेत्त
तः ॥ मातृकां शृणु देवेशि न्यासात्पापनिकृंतनी ॥ ५० ॥ ऋषिर्ब्र
ह्मास्य मंत्रस्य गायत्री छंद उच्यते ॥ देवता मातृका देवि बीजं व्यं
जनसंचयः ॥ ५१ ॥ शक्तयः स्वरास्तु देवि षडंगन्यासमाचरेत् ॥
अमांमध्ये कवर्गं च इईमध्ये चवर्गकं ॥ ५२ ॥ उंऊं मध्ये टवर्गं च एऐं

श्रीरु॰ ६

मध्येतवर्गकं॥ ओऔं मध्येपवर्गंचक्रमेणपरमेश्वरि॥५३॥ अनुस्वा
रविसर्गांतेयशवर्गौसलक्षकौ॥ हृदयंचशिरोदेविशिखांचकवचं
ततः॥५४॥ नेत्रमस्त्रंन्यसेङेंतंनमःस्वाहक्रमेणतु॥ वषट्हुंवौष
डंतेचंफडंतंयोजयेत्प्रिये॥५५॥ षडंगोयंमातृकायाःसर्वपापहरः
स्मृतः॥ द्व्यष्टपत्रांबुजेकंठस्वरान्षोडशविन्यसेत्॥५६॥ द्वादशच्छ
दहृत्पद्मेकादीन्द्वादशविन्यसेत्॥ दशपत्रांबुजेनाभौडकारादी
न्न्यसेद्दश॥५७॥ षट्पत्रेलिंगसंस्थेचबकारादीन्न्यसेत्षट्॥
आधारेचतुरोवर्णानन्यसेद्वादीन्चतुर्दले॥५८॥ हक्षौभ्रूमध्य
गपद्मेद्विदलेविन्यसेत्प्रिये॥ इत्यंतर्मातृकांन्यस्यसर्वांगंन्यासमा
चरेत्॥५९॥ मूर्द्धनीमुखवृत्तेचनेत्रकर्णसुपार्वती॥ नासागंडोष्ठ
दंतेषुमूर्धास्येषुचविन्यसेत्॥६०॥ पाणिपादयुगस्यांगतेसंध्यग्रेषु
क्रमात्प्रिये॥ पार्श्वहृद्यपृष्ठनाभिजठरेषुक्रमान्न्यसेत्॥६१॥ यादी
न्सधातुकान्देविक्रमेणैवततोन्यसेत्॥ त्वगसृग्मांसमेदोस्थिम

नित्या ६

मज्जाशुक्राणिधातवः॥६२॥ प्राणात्मांचैवजीवात्मापरमात्मान्चवि
न्यसेत्॥ हृदयेबाहुमूलेचतथापरगलेप्रिये॥६३॥ कक्षयोर्हृदय
प्रांतेपाणिपादयुगेतथा॥ जठराननयोर्देविव्यापकंचक्रमान्न्य
सेत्॥६४॥ पंचाशद्वर्णरूपांचकपर्दशशिभूषणां॥ शुद्धस्फटि
कसंकाशांशुद्धक्षौमविराजितां॥६५॥ मुक्तावज्रस्फुरद्रूपांजप
मालांकमंडलुं॥ पुस्तकंवरदानंचबिभ्रतीपरमेश्वरी॥६६॥ एवंध्या
त्वान्यसेद्देविपश्चाद्दिव्यान्यासंस्करेश्वरी॥ कुर्वतदेहसंज्ञाहंत्रि
भिर्बीजैःक्रमात्प्रिये॥६७॥ करयोर्विन्यसेदादौमणिबंधतलो
ग्रके॥ दक्षेवामेचविन्यस्यकक्षाकूर्परपाणिषु॥६८॥ पुनर्दक्षेच
वामेचपादयोश्चतथान्यसेत्॥ नादांतेहृदयेलिंगेन्यसेद्देविततः
परं॥६९॥ एतेष्वंगेषुदेवत्रिसंख्याक्रमतोन्यसेत्॥ विद्यास्वपि
क्रमेणैवजानीहपरमेश्वरी॥७०॥ ततोन्यसेन्महादेविनव

योन्यं किलाभिधं॥ कर्णयोश्चुबुके भूयः शंखयोस्तु रवमंडले॥७१॥
नेत्रयोर्नासिकोष्ठाचबाहुयुग्मे हृदि प्रिये॥ तथा कुर्परयोर्नाभौ
जान्वोरंध्रुनि विंन्यसेत्॥७२॥ पादयोर्दे विगुह्ये च पार्श्वयो हृदस्तन
द्वये॥ कंठे च नव योन्याख्यं न्यसेद्द्विज त्रयात्मके॥७३॥ षडंगमा
चरेद्देवि द्विरावृत्या क्रमेण तु॥ त्रिखंडैकदशाक त्रिर्द्विसंख्यया रो
लसंभवे॥७४॥ अंगुलीनां पुनर्देवि वाग्भवं कामांश्च विन्यसेत्॥
ललाटगलहृन्नाभि मूलाधारेषु वै क मात्॥७५॥ मूलेन व्यापकं
कृत्वा प्राणायामं समाचरेत्॥ इति श्रीमद्दक्षिणामूर्तिविनिला तंत्रे बाला
न्यासविधिर्द्वितीयपटलः॥२॥ श्रीईश्वर उवाच॥ एवं विन्यस्तदेहः
सन्समाहितमनस्ततः॥ अंतर्यागविधिं कुर्यात्साक्षाद्ब्रह्ममयं
प्रिये॥१॥ मूलाधारे मूलविद्यां विद्युत्कोटिसमप्रभां॥ सूर्यकोटि ७
प्रतीकाशां चंद्रकोटिद्रवां प्रिये॥२॥ बिसतंतुस्वरूपातां बिंदुत्रिवल

यां प्रिये॥ ऊर्ध्वशाकिनिपातेन सहजेन वरानने॥३॥ मूलशक्तिदले
न मध्यबीजप्रबोधतः॥ परमानंदसंदोहरसानंदं चिंतयेत्परं॥४॥ इत्ये
तद्यजनं कृत्वा बाह्यपूजां समाचरेत्॥ तत्र प्राङ्मुख आसीनः स्वके द्वारे
समाचरेत्॥५॥ स्वर्णेन श्रीभूर्ये पटे लिखेद्यंत्रमुत्तमं॥ ईशानाद
ग्निपर्यंतं ऋजुरेखां समालिखेत्॥६॥ ईशादग्नेस्तद्याम्यां रेखा
ह्यदेशिकः॥ एकीकृत्य चवारुण्यां शक्तिरेषा परा प्रिये॥७॥ त्रिको
णाकाररूपायं तस्याश्च परिसंलिखेत्॥ त्रिकोणाकाररूपा तु शक्तिद
ग्धमुदाहृते॥८॥ पूर्वशक्त्या ग्रभागे तु मानयुग्मं यदा लिखेत्॥ रेखां तु प
रं मरुद्यानि वायु राक्षसकोणगां॥९॥ संधि भेद क्रमेणैव तत्रैशान्त्या [illegible]
तःपरं॥ रेखा माकृष्य कोणान्यां तद्य्यात् पूर्वगं कुरु॥१०॥ वह्निमंडल
मेतत्तु पूर्वत्रिंदीरवंदिते॥ एकेन वह्निनाशक्तिद्वयनेतद्भवेत्प्रिये॥११॥
नवयोनि विरोभाह्ये चक्रराजमिदं प्रिये॥ सर्वसौभाग्यजननं सर्वसौ
ख्यप्रदायकं॥१२॥ सर्वसिद्धिप्रदं रोगहरणं धनदायकं॥ एतद्धांयुतसं
लेख्यं हृत्ते पूर्णेंदुसंनिभं॥१३॥ तत्र मत्पत्रं च ग्रंथि भिन्नास्त्वमुं

तं॥ ग्रंथयुग्मणवाभ्यां च संपुटत्वेन कारयेत्॥१४॥ ग्रंथयः कुलिशाद्
याश्चाणवैरेव स्कन्नंतं॥ त्रिशूलाष्टकमालिख्य चतुरस्रं लिखेत् प्रिये॥१५॥
चतुर्द्वारविशोभाढ्यं सर्वानंदकरं तथा॥ ह्रींकारं त्रिकोणांतः संलिख्य
वरवर्णिनि॥१६॥ कामबीजं मध्यमे यद्दष्टकोणेषु संलिखेत्॥ स्वराः षो
डश देवेशि युग्मयुग्मप्रभेदतः॥१७॥ दलाष्टके सुसंलिख्य पश्चिमादिप्र
दक्षिणं॥ ग्रंथिस्थानेषु वर्गाणां कादीनां परमेश्वरि॥१८॥ विलिखेत्सम
संख्यानामाद्यार्णक्रमतः प्रिये॥ क्षकारस्याष्टमे चास्यं शेषाच्चर्णान्क्रमे
णतु॥१९॥ त्रिशूलाग्रेषु संलिख्य पश्चिमादिक्रमेण तु॥ तद्बाह्ये मातृ
कावृत्तं विलिख्य परमेश्वरि॥२०॥ चतुरस्रं महद्दशानि मातृकां कामृग
भिंतां॥ विलिख्य पूजयेद्यंत्रं हेमरौप्यादिपट्टके॥२१॥ ताम्रे वा दर्पण
स्थाने काश्मीरप्रभवेपि वा॥ चंदनाद्यन्वितं भूमौ कुंकुमेनाथवा पुनः
॥२२॥ सिंदूररजसा वापि कस्तूरीघुसृणेंदुभिः॥ भूर्जे गोरोचनाद्
द्यैः कल्पितं मानसेथवा॥२३॥ स्वर्णरत्नैर्लिखेन्न्यासवैकार्यार्थसाध
कः॥ विलिख्य यंत्रे देवेशी पूजाद्रव्यैः प्रपूजयेत्॥२४॥ कुलागमक्रमे ६

६

णैव ध्यात्वा ब्रह्मविकाशिनीं॥ मूलादि ब्रह्मरंध्रांतं बिसतंतुतनू
यसीं॥२५॥ उद्यदादित्यरुचिरां स्मेरदच्छुभशोणतयं॥ भ्रमद्भ्रमर
नीलाभधम्मिल्लामल्लपुष्पिणीं॥२६॥ भालरंध्रस्फुरत्कुंग॥ मुक्ता
रेखाविराजितं॥ मुक्तारेखालसद्वृत्ततिलकां मुकुटोज्वलां॥२७॥
विशुद्धस्फुरत्लाढ्य चंद्ररेखाकिरीटिनीं॥ भ्रमद्भ्रमरनीलाभन
यनत्रयराजिनीं॥२८॥ सूर्यभास्वन्महारत्नकुंडलालंकृतांबरां॥
स्थुक्ताकारस्फुरन्मुक्ताहाराभूषणभूषितां॥२९॥ ग्रैवेयांगदसुक्ता
भिः स्फुरत्कांतिजिताभृतां॥ गंगातरंगकर्पूरशुभ्रांबरविराजितां॥
३०॥ श्रीखंडवल्लीसदृशबाहुवल्लीविराजितां॥ कंकणादिलसद्भू
षां मणिवेधलसत्प्रभां॥३१॥ प्रवालपल्लवाकारपाणिपल्लवराजि
तां॥ वज्रवैडूर्यमुक्तालिमेखलां विमलप्रभां॥३२॥ रक्तोत्पलदला
कारपादपल्लवभूषितां॥ नक्षत्रमालासंकाशमुक्तामंजीरमंडितां॥
३३॥ वामेन पाणिना केनपुस्तकं चापरेण तु॥ अभयं च प्रयुंजंतीं सा
धकानां वरानने॥३४॥ अक्षमालां च वरदं दक्षपाणिद्वयेन हि॥

९ दधतीं। चिंतयेद्देवीं वश्यसौभाग्यवाक्प्रदां॥३५॥ क्षीरकुंदेंदुधवलां
प्रसन्नां संस्मरेत्प्रिये॥३६॥ इति श्रीमुक्तार्णवे नित्यातंत्रे त्रिपुरेश्व
रीध्यानं नाम तृतीयः पटलः॥३॥ श्रीदेव्युवाच॥ चक्रमंडलमाख्या
तं न पूजा तत्र मंडले॥ कथिता परमेशान श्रोतुमिच्छामि तत्त्वतः॥१॥
ईश्वर उवाच॥ शृणु देवि प्रवक्ष्यामि पूजामंडलमुत्तमं॥ पीठपूजां विधा
यादौ रविदे विविराजितां॥२॥ वामा ज्येष्ठा च रौद्री च अंबिके कोलतः
परं॥ ज्ञाना क्रिया कुलिका चक्र हि श्रीव विषघ्निका॥३॥ दूतरी चैव
आनंदा देवि द्वादश शक्तयः॥ मुक्ताफलामलमणीस्फुरच्छत्रे राशि
प्रभे॥४॥ गंगातरंगधवले चामरद्वयमंडिते॥ नवरत्नस्फुरद्दीप्ति
तांबूलस्य करंडके॥५॥ मल्लिकामालतीजातीशतपत्रादिदामभिः॥
पूर्णरत्नमये भांडे तथालंकारपूरिते॥६॥ पटिकाव्यजनद्वंद्वे नवर
त्नाभिभूषिते॥ नीलकंठे [illegible] पिकेरूक तथा शिरविराजितं॥७॥ कर्पू ९
रमृगनाभाढ्ये कुंकुमक्षोदमंडिते॥ चषके स्वर्णरचिते कंकतीहीरारा
जिते॥८॥ कज्जलस्य शलाकां च करंडे चंद्रपूरिते॥ दधानाः परमेश्वा

नि शक्तयः पीठसंस्थिताः॥९॥ पूर्वादि परितः पूज्या रविसंख्या
वरानने॥ संपूज्य मध्ये देवेशी प्रेतासिंहासने यजेत्॥१०॥ रत्नस्वर्णा
दिभिस्फारदीप्तिमत्पुष्पमव्यये॥ पंचप्रेतासने साक्षान्मोक्षदायी
न संशयः॥११॥ श्रीदेव्युवाच॥ पंचप्रेतान्महेशान ब्रूहि तेषां तु कार
णं॥ निजस्वभावविनाशास्ते नित्यरूपा कथं विभो॥१२॥ निजस्वेना
शये वास्ति ते कथं नित्यतां गताः॥ ईश्वर उवाच॥ साधु पृष्टं त्वया भद्रे
पंचप्रेतमयं कथं॥१३॥ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः॥ पं
च प्रेता वरारोहे निश्चला एव सर्वदा॥१४॥ ब्रह्मणः परमेशानि मातृत्वं
सृष्टिरूपकं॥ वामाशक्तिरूक विज्ञेयं ब्रह्मात्प्रेता न संशयः॥१५॥ शिव
स्य कार्यं नास्ति राकेरूक कारणं सदा॥ ब्रह्मांडलक्ष निर्माणे जायते श
क्तिने प्रिये॥१६॥ अत एव महेशानि ब्रह्मा प्रेता न संशयः॥ विष्णोश्च पा
लने नास्ति पालयंति परा शिवा॥१७॥ ज्येष्ठाभिधा महेशानि सैव विष्णु
रितीरिता॥ विष्णुरूक निश्चलो देवि वैष्णवी व्यापिकारिणी॥१८॥ अत
एव महेशानि विष्णुः प्रेता न संशयः॥ रुद्रः कर परमं तत्त्वं शिवो निःश्चल एव
हो॥१९॥ प्रसेति रुद्रशक्तिरूक नमो रूपा वरानने॥ गुणत्रयं शिवेना

स्त्रिगुणातीतः परमेश्वरः ॥ २० ॥ निर्गुणस्य कथं यासो निश्चलस्य वरान
ने ॥ असंति रुद्रशक्तिरूक त्रैलोक्यं सचराचरं ॥ २१ ॥ ब्रह्माविष्णुश्च रुद्र
श्च गुणातीताः सदाप्रिये ॥ सगुणाः परमेशानि सृष्टिस्थितिलयात्मि
का ॥ २२ ॥ ईश्वरोपि वरारोहे महाप्रेतः सदानघे ॥ शिवो निःश्चलता क
स्मादीश्वरत्वं भवत्प्रिये ॥ २३ ॥ यः कर्ता च स्वयं हर्ता स ईशो नान्यथा भ
वेत् ॥ कर्तृहर्तृत्वसुगुणे निश्चले नहि सुंदरि ॥ २४ ॥ ईश्वरत्वं शिवायां
तु न शिवे परमेश्वरि ॥ अत एव महाप्रेत ईश्वरो नान्यथा भवेत् ॥ २५ ॥ स
दाशिवो महाप्रेतः केवलो निश्चलः प्रिये ॥ अव्यक्तः परमानंदो ब्रह्मानंद
मयी शिवा ॥ २६ ॥ शक्त्या विना शिवे देवि वासनान प्रवर्तते ॥ अत एव
महेशानि महाप्रेतासनं यजेत् ॥ २७ ॥ चक्रमध्यस्थितं बीजं सदाशि
वं महापदे ॥ प्रेतं पद्मासनं ङेन्तं हृन्मनुर्मनुरीरितः ॥ २८ ॥ महासनस्य
मंत्रोयं कल्याणि परमेश्वरि ॥ सिंहासनं समभ्यर्च्य ततः आवाहनं कुरु ॥
२९ ॥ ब्रह्मनाडीक्रमेणैव मूलाद्ब्रह्मरंध्रगं ॥ संवित्कलां परमेशानि
सर्वज्ञां कुलसुंदरी ॥ ३० ॥ आवाह्य चक्रमध्ये तु तर्पयेत्कुलसुंदरीं ॥
आवाहनादिमुद्रास्तु कथयामि तवानघे ॥ ३१ ॥ ऊर्ध्वांगुलि मधः कु

र्यादियमावाहनी भवेत् ॥ इयं तु विपरीता स्यात् स्थापिनी मता ॥
३२ ॥ मिलितं मुष्टियुगलं संनिधापन रूपिणी ॥ अंतरंगुष्ठमुष्टिभ्यां
संनिरोधन रूपिणी ॥ ३३ ॥ एतस्या एव मुद्राया स्तर्जन्यौ सरले यदि ॥
सव्यापसव्य भ्रमयान्मुद्रेयमवगुंठिनी ॥ ३४ ॥ अंगमंत्रैर्न्यसेद्देवि
देव्यंगे साधकोत्तमः ॥ सकलीकरणं नाम मुद्रेयं व्याप्तिकारिणी ॥ ३५ ॥
करावेकत्र संयोज्य वेगुष्ठौ बध्नीयात्प्रिये ॥ परमीकरणं नाम मुद्रेयं तु
ततः परं ॥ ३६ ॥ परिवर्त्य करौ कृत्वा पश्चात्तर्जनी मध्यमा स्पृशेत् ॥ कनिष्ठा
ना मिका युग्मं परस्पर मुखं कुरु ॥ ३७ ॥ धेनुमुद्रेयमाख्याता अमृती
करणे भवेत् ॥ एताः साधारणा मुद्रा दर्शयित्वा ततः परं ॥ ३८ ॥ वरदा
भयमुद्रे च वरदाभयवत्प्रिये ॥ पुस्तकं वहामकरे कुर्यात्समतले प्रिये ॥
३९ ॥ पुस्तकं नाम मुद्रेयं वाग्विलासप्रयच्छति ॥ तर्जन्यंगुष्ठयोगात्तु द
क्षहस्ते तु पार्वती ॥ ४० ॥ अक्षमालेति मुद्रेयं ज्ञानमुद्रा च वै भवेत् ॥ मु
ष्टिं बध्वा दक्षकरे तर्जन्यंकुशरूपिणी ॥ ४१ ॥ अंकुशाख्या महामुद्रा
त्रैलोक्याकर्षिणी भवेत् ॥ तर्जनी सुगुले देवी वामांसे श्रंखला कृतिः ॥
४२ ॥ बाणमुद्रा समाख्याता त्रैलोक्याकर्षणे क्षमा ॥ यथा हस्तगतं

श्रीमत्स्वा० चापेन तथा लक्षं कुरु प्रिये ॥४३॥ चापमुद्रेयमाख्याता वामहस्तेऽथव निसा
२१ स्थिता ॥ यथा हस्तगतं बाणं तथा हस्तं कुरु प्रिये ॥४४॥ बाणमुद्रेयमा
ख्याता सिद्धगर्वनिकृन्तनी ॥ वामहस्ततले देवी कपालाकृति कारये
त् ॥४५॥ कपालमुद्रा देवेशी दिव्यानंदकरी सदा ॥ हस्ताभ्यां कम
लाकारो यदा तत्कमलं भवेत् ॥४६॥ एषा कमलमुद्रा च लक्ष्मीष्टदि
करी मता ॥ इति चायुधमुद्राश्च दर्शयित्वा वरानने ॥४७॥ गुप्तधृत्या
स्वतादीनि दद्यात्स्त्रीसहितः सदा ॥ उपचारैरनेकैश्च तोषयेत्पर
मेश्वरी ॥४८॥ लययोगे कल्पयेद्देहं सम्यक्तन्न पयेच्छिवे ॥ परिवारा
र्चनं पश्चाद्वादावगाहन्ति प्रिये ॥४९॥ गुरुं पूज्यानन्तरं तु प्रथमे कुसुम
र्चयेत् ॥ त्रिकोणयोनिमध्ये वै न्यासक मध्ये निजगुरुं यजेत् ॥५०॥ वि
षापमुद्रां देवेशी दर्शयित्वा सर्वसिद्धये ॥ परिवर्तकरौ सम्यक्तर्जनी वा
हनी तथा ॥५१॥ मध्यमे कुरु तन्मध्ये योजयेत्तदनन्तरम् ॥ कन्यानां २१
नामिके देवि कनिष्ठे तु यथाक्रमे ॥५२॥ अंगुष्ठाभ्यां योजितस्याम्
योन्याकारं तु कारयेत् ॥ योनिमुद्रेयमाख्याता परा त्रैलोक्यमातृका ॥
५३॥ इयमेव हादिविद्यास्तु त्रैलोक्यक्षोभणी भवेत् ॥ त्रैलोक्यद्रावि

णीनाम मुखस्था परमेश्वरी ॥५४॥ भ्रूमध्यस्था महादेवी त्रैलो
क्याकर्षिणी भवेत् ॥ ललाटस्था महादेवि त्रैलोक्यवशकारिणी ॥
५५॥ ब्रह्मरन्ध्रस्थिता देवि त्रैलोक्योन्मादकारिणी ॥ पंचमुद्राम
यै मुद्रां योनिमुद्रां च दर्शयेत् ॥५६॥ ततः षडंगावरणं परितः पीठ
मादिजः ॥ आग्नेशानरवायव्यमध्यदिक्षु च पूजयेत् ॥५७॥ अथ
कोणे रतिप्रिया प्रीतिमुत्तरकोणके ॥ मनोभवादस्य कोणे यत्नतो बाण ॥
१२८ स्मर्चयेत् ॥५८॥ उत्तरस्यां हृदये देवी दक्षिणस्यां दिशि हृदये ॥ अग्रे
चैकं क्रमेणैव बाणान्तं चादि जेयजेत् ॥५९॥ पंचकामांस्तथा देवि
बाणवत्परिपूजयेत् ॥ अनंगकुसुमा देवि तथानंगादिमेखला ॥
६०॥ अनंगमदनं पश्चादनंगमदनातुरा ॥ स्कू भगा पंचमी देवी भ
गा च भगसर्पिणी ॥६१॥ भगमालां महादेवि पूर्वादिक्रमतो यजेत् ॥
कृष्ट योनिमुद्रे वेशी तां ब्राह्म्यादिकान्यजेत् ॥६२॥ युग्मयुग्मक्र
मंदनवस्कपुष्पैर्वरानने ॥ असिताङ्गं तथा ब्राह्मी रुरुं माहेश्वरी प्रिये ॥
६३॥ चण्डकौमारिका चैव क्रोधं वैष्णवदेवता ॥ उन्मत्तं चैव वाराहीं मा
हेन्द्रीं च कपालिनं ॥६४॥ भीषणं चैव चामुण्डां संहारं चाष्टमं यजेत् ॥

महालक्ष्मीमहादेवि युग्मानि परिपूजयेत् ॥ ६५ ॥ पश्चिमादिक्रमेणै
व ततः पीठादिकं यजेत् ॥ कामरूपं च मलयं ततः कोल्लागिरिं तथा ॥
६६ ॥ कुलान्तकं च चौहारं जालंधरमतः परं ॥ उड्डियाणं देविकूटपी
ठमेकाम्रं क्रमात् ॥ ६७ ॥ पीठस्थानेषु संपूज्य पश्चिमादिक्रमेण तु ॥
त्रिशूलं पुस्तिकां देवी मातृकाहृत कमंडलु ॥ ६८ ॥ भैरवादश संपूज्याः प
श्चिमादिक्रमालये ॥ हेतुकं चैव वेतालं सन्मध्ये त्रिपुरान्तकं ॥ ६९ ॥
अग्निजिह्वान्तं कालान्तं तथा चैव कपालिनं ॥ एकपादं भीमरूपं म
लयं हाटकेश्वरं ॥ ७० ॥ दशाभ्यर्च्य महादेवी भैरवान्मातृमंडले ॥ च
तुरस्त्रे महेशानि लोकपालांश्च केयजेत् ॥ ७१ ॥ इन्द्रमग्निं यमं देवी
राक्षसं वरुणं तथा ॥ वायुं कुबेरमीशानं पूर्वादिक्रमतो यजेत् ॥ ७२ ॥
ब्रह्माणं चैव विष्णुं च ऊर्ध्वाधः क्रमतो यजेत् ॥ वांकारपूर्वमुच्चार्य
बटुकाय नमो लिखेत् ॥ ७३ ॥ यांकारबीजमुच्चार्य योगिनीभ्यो नम
स्तथा ॥ क्षांकारबीजमुच्चार्य क्षेत्रपालाय वै नमः ॥ ७४ ॥ गांकारं १२
बीजमुच्चार्य ततो गणपतिं लिखेत् ॥ ङेंतं नमः पश्चिमादिदिक्
पूज्याः क्रमेण तु ॥ ७५ ॥ चतुरस्त्रे तु संपूज्या विदिक्षु परमेश्वरी ॥

वायव्यादिक्रमेणैव वक्ष्यमाणान्महेश्वरी ॥ ७६ ॥ सवासवोद्यादश
दित्या रुद्राश्चैव ततः श्रिये ॥ सर्वभूतावरादि क्रमेण परिपूजयेत् ॥
७७ ॥ पूजां विधाय देवेशि उपचारैः प्रपूजयेत् ॥ उत्तराभिमुखं वा भू
त्वा यदा चक्रं प्रपूजयेत् ॥ ७८ ॥ उत्तराशागतद्दृष्टिः विष्णुवीरो व्यवस्थि
तः ॥ पश्चिमाशामुखं देवि यदा चक्रं समुद्धरेत् ॥ ७९ ॥ पश्चिमाशा
तद्दादेवी पूर्वं रौक्म्य वस्थिता ॥ दक्षिणाशामुखं देवि यदा चक्रं प्र
पूजयेत् ॥ ८० ॥ दक्षिणाशागतद्दादेवी पूर्वीरो वनसंश्रयः ॥ ८१ ॥ इति
श्रीमद्दत्तानार्णवे नित्यातंत्रे श्रीत्रिपुरेश्वरीपूजाक्रमः चतुर्थः
पटलः ॥ ४ ॥ श्रीदेव्युवाच ॥ कुमारीक्रम आख्यातो मुद्रासनस
मन्वितः ॥ इदानीं श्रोतुमिच्छामि बलिदानादिकं विभो ॥ १ ॥ ईश्वर
उवाच ॥ धूपं विस्तारयेत्सम्यक् मूलमंत्रं हृदि स्मरेत् ॥ वनस्पति
रसोत्सन्नो गंधाढ्यो धूप उत्तमः ॥ २ ॥ आघ्रेयः सर्वदेवानां धूपोयं प्र
तिगृह्यतां ॥ अनेन मनुना देवि दद्याद्धूपं निवेदयेत् ॥ ३ ॥ सकर्का
शीमहान्दीपः सर्वतस्तिमिरापहः ॥ सबाह्याभ्यंतरं ज्योतिर्दीपोयं
प्रतिगृह्यतां ॥ ४ ॥ नयेवदीपमेवात्र ये दिव्यंतिपरमेश्वरी ॥ आरार्तिकं

श्रीमद्भक्ता
१२

ततः कुर्यात्सर्वकार्यार्थसिद्धये ॥ ५ ॥ सौवर्णे रजते कांस्ये वालुके परमेश्व नित्या
रि ॥ कुंकुमेन लिखेत्सम्यक् स्वपत्रं मनोहरं ॥ ६ ॥ चंद्ररूपं चतुष्कोणं लतातिल
ध्येमस्तके शिवे ॥ दीपमेकं विनिक्षिप्य स्वपत्रे हृदीपिकान् ॥ ७ ॥ यवगो
धूममुद्गादीन् वरचितान् शर्करायुतान् ॥ चषकान्वितमुद्राभिः शोभि
तान् घृतपूरितान् ॥ ८ ॥ आनिमन्त्र्य महेशानि रत्नेश्च यौततः परं ॥ श्री
बीजं च पराबीजं संलिख्य वरवर्णिनी ॥ ९ ॥ गसौः चमपुनः पश्चादि
ङ्स्थाः क्रमतः प्रिये ॥ वामकर्णसमायुक्तो बिंदुनादविभूषितो ॥ १० ॥ बी
जपंचकमेतत्तु पंचरत्नानि सुन्दरि ॥ पूर्वबीजविलोमेन रत्नशीर्षं न्यसेत्तथा
स्वरि ॥ ११ ॥ मूलमंत्रेण चाभ्यर्च्य ततः श्वारार्तिकं चरेत् ॥ स्थालकं तु स
मुद्धृत्य मस्तकांते पुनः पुनः ॥ १२ ॥ नववारं महेशानि ततो नीराजनं चरे
त् ॥ समस्तचक्रचक्रेशी युते देवि ▮लिके ॥ आरार्तिकमिदं देवि गृह्ण
णमम सिद्धये ॥ १३ ॥ नीराजनामनुं देवि विद्यांतिस्त्र गदीरितः ॥ १४ ॥ आ १२
रार्तिकं महेशानी चक्रमुद्रा च पूजिता ॥ वामहस्ताङ्गुष्ठगर्भेकनिष्ठां द
क्षिणानयेत् ॥ १५ ॥ कनिष्ठागर्भेकं वामहस्तांगुष्ठं विनिक्षिपेत् ॥ आन्या
न्य करयोर्देवी चक्रमुद्रेयमीरिता ॥ १६ ॥ आरार्तिकाविधिं कृत्वा निवेदयेत्

१२
निवेदयेत् ॥ शुद्धः स्फटिकसंकाशं चंद्ररश्मिसमप्रभे ॥ १७ ॥ लसद्दुं
लजादिकं चारुफलहेढ्य नप्रिये ॥ हिरुजीरमरीच्याद्यैराट्रकैर्विचित्रि
ये ॥ १८ ॥ वटकः कृष्णमाकारः पायसं हेमसन्निभं दुग्धं गंभीरस
भंगं शर्करापूरपूरितं ॥ १९ ॥ कपिलाघृतसंयुक्त भूजलिंडकाः
प्रिये ॥ शार्करालोलिता देवि षड्रसं पंचवत्तथा ॥ २० ॥ नानावि
धान्निपेयानि व्यंजनानि बहूनि च ॥ इत्याद्यन्नसमायुक्तं नैवेद्यं
कल्पयेद्बुधः ॥ २१ ॥ मनः कल्पितरूपं वा त्रिपुरायै निवेदयेत् ॥ हे पेतं
मपात्रगतं दिव्यं परमान्नं रसैः स्कृतं ॥ २२ ॥ पंचधा षड्रसो गृहाण
परमेश्वरी ॥ विद्यांते परमेशानि नैवेद्यमनुरीरितः ॥ २३ ॥ परिषिंच्य
ततो देवि नित्यहोमं समाचरेत् ॥ मूलमंत्रेण देवेशि जुहुयात्तर्पणं चाहुतिः
क्रमात् ॥ २४ ॥ प्राणापानौ तथा व्यानो उदानश्च समानकः ॥ एतत्त
त्पंचजानीयादाहुतीनां च पंचकं ॥ २५ ॥ षडाहुति षडंगेन नित्यहो
मोयमीरितः ॥ नित्यहोमविधिं कृत्वा बलिदानविधिं चरेत् ॥ २६ ॥ ई
शाने च तथाग्नेये नैरृत्ये च तथा प्रिये ॥ वायव्ये क्रमतो देवि मंड
लानां चतुष्टयं ॥ २७ ॥ श्रीचक्रभीमतो देवि त्रिकोणं व्याममालिख

श्रीमद्गा
१४

त्व॥ पूर्वैर्मंत्रैः समभ्यर्च्य वटुकादिभिरद्रिजे॥ ८॥ उं ह्री वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं इति ... पुत्रांते निला
वटुकांतथनाथश्च॥ कपिलांतजटाभारभासुरांत त्रिनेत्रंच॥ ९॥
ज्वालामुखंच सर्वांते विघ्नान्नाशय नाशय॥ सर्वोपचारसहितं बलिं
गृण्ह द्विधापदं॥ २०॥ वह्निजायान्वितो मंत्रो वटुकस्य बलौ हृतः॥ अ
नेन विधिना देवी वटुकस्य बलिप्रिये॥ २१॥ ऊर्ध्वं ब्रह्माडतो वा दिवि
गगनतले भूतले निष्कले वा पाताले वा तले वा सलिलपवनयोर्यत्र
कुत्र स्थिता वो॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्री
ता देव्यः सदा नः शुभबलिविधिना पांतु वीरेंद्रवंद्याः॥ २२॥ एतदंते म
हेशानि यां बीजं योगिनीततः॥ भ्यः स्वाहा सर्वं वर्णांते योगिनीपद
मालिखेत्॥ २३॥ कचचं चान्त मालिख्य वह्निजायां पुनर्लिखेत्॥
अनेन मनुना देवी योगिनीनां बलिर्भवेत्॥ २४॥ षट्दीर्घस्वरसंभि
न्नं सकारं विलिखेत्प्रिये॥ ख्यान्क्षेत्रपदे पालधूपदीपादिमालिख
त्॥ २५॥ सहितं बलिमालिख्य गृण्ह गृण्ह ततो वदेत्॥ वह्निजायो
न्वितो मंत्रः क्षेत्रपालस्य कंदरे॥ २६॥ अनेन मनुना देवि क्षेत्रपा
लबलिस्मृतः॥ गां गीं गूं त्रयमालिख्य उन्नतं गणपतिं ततः॥ २७॥ १४

२८

वरांते वरदांते च सर्वांते जनमालिखेत्॥ मे वशं चानयत्वेच्छ सर्वो
पपदमालिखेत्॥ २८॥ चारांतेसहितं चान्ते बलिं गृण्ह द्विधापदं॥
वह्निजायान्वितो मंत्रो गणपस्य बलिं हरेत्॥ २९॥ वामांगुष्ठानामि
काभ्यां वटुकस्य बलिं हरेत्॥ तर्जन्यनामिकामध्यमध्यमोपरि योज
येत्॥ ४०॥ योन्याकारेण वामेन योगिनीनां बलिर्भवेत्॥ अंगुष्ठमध्य
मानाम योन्याकारेण योजयेत्॥ ४१॥ वाममुष्टिं विधायादौ तर्जनी
सरलां कुरु॥ अनया मुद्रया देवी क्षेत्रपालबलिर्भवेत्॥ ४२॥ तथा मु
ष्टिं कृत्वा मध्यस्था मुकुलीदंड वत्कुरु॥ गजतुंडा महामुद्रा गणपस्य ब
लिर्भवेत्॥ ४३॥ अथवा वामभागे तु मंडलं चैकमालिखेत्॥ तत्रैव
बलिदानं तु कुर्यात्सर्वार्थसिद्धये॥ ४४॥ आत्मविद्याशिवैस्तत्वैर्गुरुं
संतर्प्य देवतां॥ संतोष्यानंदसोहितः सर्वकर्माणि साधयेत्॥ ४५॥
अनेन विधिना देवि पूजयेत्परमेश्वरीं॥ पंचसिंहासनारूढां परमा
नंदरूपिणीं॥ पंचासिंहासनारूढां चित्कलां चिंतयेत्सदा॥ वर्णो
क्षं जपेन्मंत्रं तद्दशांशं हुनेत्प्रिये॥ ४६॥ तर्पणं तु तथा कुर्यात्सर्व
सौभाग्यमाप्नुयात्॥ ४७॥ इति श्रीमहाकालार्णवे नित्यातंत्रे ...

१५

२९

१५
त्रिपूजनविधिः पंचमपटलः॥५॥ श्रीदेव्युवाच॥ पूर्वसिंहासनगा
ताकथंसात्रिपुरापरा॥ कथयस्वमहेशाननकथंसिंहासनेश्वरी॥१॥
ईश्वरउवाच॥ यथाश्रीत्रिपुराबाला तथात्रिपुरभैरवी॥ संपत्प्रदा
नामतस्याः शृणुनिर्मलमानसे॥२॥ शिवचंद्रवह्निसंस्थेवाग्भवं
तदनंतरं॥ कामराजंतथादेविबिंदुचंद्रान्वितंततः॥३॥ पृथ्वीबी
जांतकूटाढ्यंतात्रयंशृणुवल्लभे॥ शक्तिबीजंमहेशानिशिवबह्नि
चयोजयेत्॥४॥ व्योमादिवह्निसंस्थंतुविरापेशृणुवल्लभे॥ कुमार्याः
परमेशानिलिखासर्गंतुवेदके॥५॥ त्रिपुराभैरवीदेविमहासंपत्प्रदा
प्रिये॥ अनयासदृशीविद्यात्रिषुलोकेषुदुर्लभा॥६॥ ब्रह्मानंदमयि
साक्षात्सर्वसाम्राज्यदायिनी॥ ध्यानमस्याःप्रवक्ष्यामिमहासंपत्प्रदं
प्रिये॥७॥ आताम्रार्कसहस्राभांस्फुरच्चंद्रजटाशिवां॥ किरीटरत्न
विलसच्चित्रचित्रितमौक्तिकां॥८॥ स्रवद्रुधिरपंकाढ्यमुंडमालावली
युतां॥ नयनत्रयशोभाढ्यांपूर्णेंदुवदनान्वितां॥९॥ मुक्ताहारलतारा
जत्पीनोन्नतघनस्तनीं॥ त्रिवलीसुचितालग्नांनानाभरणभूषितां॥१०॥ १५
रक्तांबरपरीधानांयौवनामत्तरूपिणीं॥ पुस्तकंचाभयंवामेदक्षिणे

चाक्षमालिकां॥११॥ वरदानरतांनित्यंमहासंपत्प्रदांस्मरेत्॥ न्यास
पूजादिकंसर्वंकुमार्योथवस्तुवत्ले॥१२॥ त्रिपुराभैरविदेविपंचसिं
हासनान्विता॥ प्रथमंशृणुदेवेशिब्रह्मास्तविकरोयदा॥१३॥ तिष्ठ
तेनोपिदेवेशीतदात्रिपुरदेवता॥ समाराध्यभवलकतांस्तदेरूपर
मेश्वरीगौरवला॥ हितांसमाराध्यतपसामहताप्रिये॥ शक्रोभूद्देवराजा
यंपूर्वस्यांदिशीपालकः॥१४॥ तदाप्रसन्नात्रिपुरापूर्वसिंहासनस्थि
ता॥ शृणुदेविप्रवक्ष्यामिपूर्वसिंहासनस्थिता॥१६॥ वाग्भवंबीज
मुच्चार्यजीवप्राणसमन्वितं॥ सकलाभुवनेशानीद्वितीयंबीजमुद्
तं॥१७॥ जीवंप्राणंवह्निसंस्थंशक्रस्वरविभूषितं॥ विसर्गाढ्यंमहा
निविद्यात्रैलोक्यमातृका॥१८॥ त्रैलोक्यमोहिनीदेविपरब्रह्मस्व
रूपिका॥ चैतन्यभैरवीनाममंत्रंतनानिकुलेशिवे॥१९॥ जपाकुसुमसं
हस्राभांनानालंकारभूषितां॥ मुकुटोज्वलसच्चंद्रलेखांरक्तांबरान्वितां॥२०॥
पाशांकुशधरांचित्रांवामहस्तकपालिनीं॥ वरदाभयरंगभाढ्यांपीनो
न्नतपयोधरां॥२१॥ एवंध्यात्वायजेद्देवींपूर्वसिंहासनस्थितां॥ द्विरा
वृत्ताषडंगानिन्यसेत्सर्वांगवक्षसि॥२२॥ यंत्रमस्याःप्रवक्ष्यामिदेवित्रि

लोक्यमोहनं॥ त्रिकोणं च षट्कोणं च अष्टपत्रं वरानने॥२३॥ चतुर
स्रं च चतुरस्रं भवेद्भवमण्डलमालिखेत्॥ तत्राबाह्य महादेवीं पूर्ववत्परमे
श्वरी॥२४॥ मुद्राः प्रदर्शयेत्पश्चात्परिवारांश्च पूजयेत्॥ प्रथमावरणे
देवि षडङ्गं ज्ञानतः पूर्ववत्॥२५॥ रत्यादिकास्ततः पूज्याः पूर्ववत्परमेश्व
रि॥ अनङ्गं वसन्तं वामे तु कामदेवं वरानने॥२६॥ चापं दक्षिणकोणे च
बाणाः पूर्ववद्द्विज॥ डाकिनी राकिनी चैव लाकिनी काकिनी तथा॥
२७॥ शाकिनी हाकिनी देवि पश्चिमादिक्रमात्पूजेत्। अनङ्गकुसुमा
मुख्याश्च अष्टपत्रेषु पूर्ववत्॥२८॥ परभैरवसारसौ चैव रेणुकमेधाह्वयौ पु
नः। अनङ्गस्तु विलासौ च हावभावौ च पूजयेत्॥२९॥ इन्द्राद्याल्लोकपा
लास्तु क्रमेण परिपूजयेत्॥ पूर्वसिंहासनो देवि कथिता भैरवीं दिते॥३०॥
कामेश्वरी च रुद्राणी पूर्वसिंहासनस्थिता॥ एतस्या एव विद्याया बीज
द्वयमुदाहृतं॥३१॥ श्रुतं देवि परमेशानि नित्यक्लिन्ने मदद्रवे॥ एतस्या एव
तानरूपं रुद्राणी परमेश्वरी॥३२॥ पूजाध्यानादिकं देवि चैतन्यादेव पूर्व
वत्॥ त्रिकोणे तु विशेषो लिकथ्यामि तवानघे॥३३॥ अग्निकोणक्रमे
णैव नित्यां क्लिन्नां मदद्रवां॥ षडङ्गावरणं पश्चात्पूजयेत्सर्वसिद्धये॥३४॥

नित्या
२६

अनेनैव प्रकारेण पूर्वसिंहासनस्थितां॥ त्रिपुराभैरवीं देवीं पूजयेत्परमे
श्वरी॥३५॥ इति श्रीमद्भागवते नित्यातन्त्रे पूर्वसिंहासनं नाम षष्ठः प
टलः॥६॥ ईश्वर उवाच॥ एतामाराध्य देवेशि महात्रिपुरभैरवी॥ पालको
भूत्तिश्चलोपीत्रतत्वात्सकरं वंदिते॥ योगनिद्राच्छलाद्देवी प्रतत्वं तस्य नि
श्चले॥ लब्ध्वानेन स्वयं शक्तिरतुलं कवलं यक्षणे॥२॥ तामाराध्य महा
विष्णुर घोरेण्य मुरं च न च॥ त्रिपुरा निर्जितादि वित्रैलोक्यभयकारकाः॥
३॥ तदा सिंहासने पादे दक्षिणे परमेश्वरी॥ मन्त्रं तस्याः प्रवक्ष्यामि रिपु
सारनिकृन्तने॥४॥ शिरश्चन्द्र मादनान्तेपान्तं वह्निसमन्वितं॥ शक्ति
भिन्नं बिंदुनादकलाढ्यं वाग्भवं प्रिये॥५॥ संपत्प्रदा यां भैरव्याः कामे
राजेन दधिवही॥ सदाशिवस्य बीजं तु सिंहासनगतस्य च॥६॥ एषा वि
द्या महेशानि वर्णितुं केन शक्यते॥ ध्यानमस्याः प्रवक्ष्यामि रिपुसारनि
कृन्तने॥७॥ उद्यत्सूर्यसहस्राभां चन्द्रचूडां त्रिलोचनां॥ नानालंकार
संयुक्तां सर्ववैरिनिकृन्तनीं॥८॥ स्रवद्रुधिरमुण्डालि कलितां रक्तवास
सां॥ त्रिशूलं डमरुं चैव खड्गं खेटकमेव च॥९॥ पिनाकं च शरान्देवि
पाशांकुशौ भुजंगमात् पुस्तकं चाक्षमालां च शिवसिंहासने स्थितां॥

श्रीमद्वा
१८

१०॥ एवं ध्यात्वा महेशानि पूजामुंडकमारभेत्॥ त्रिकोणे चैव वृत्ते च हृत्ता नित्या
दलनीरजे॥११॥ वृत्तं भूसदनोपेतं मध्ये त्रिपुरयेत्रिका॥ वामां ज्येष्ठां च
रौद्रीं च कालीं च वरलं चने॥१२॥ कलाद्यां च बलाद्यां च यजेद्विकार
णिप्रिये॥ बलप्रमथनीं चैव सर्वभूतात्मावदत्॥१३॥ दमनीं च तथा
त्वित्यामनोन्मनिपदान्विते॥ एवं पीठं समभ्यर्च्य ततः सिंहासने यजेत्॥
१४॥ अघोरविद्यारूपं तु महापापनिकृन्तनी॥ अघोरे वाग्भवं चात्का
अघोरे भुवनेश्वरीं॥१५॥ घोरघोरतरे स्यैशर्वे सर्वाधिदेवते॥ नम
स्त्रिंशत्पदं कुर्याद्द्रूपहसौ लिखेत्॥१६॥ त्रिंशद्ध्वस्त्रिसिवर्णे वि
द्येयं कथिता प्रिये॥ अनेन मनुना देवि यजेत्सिंहासनं बुधः॥१७॥
आवाहनादिकं कुर्यात्क्रमार्चनमतः परं॥ आदावंगानि देवि हि १८
राहत्यांग पूजयेत्॥१८॥ रत्यादित्रयमभ्यर्च्य तथानंगादिका यजेत्॥
ब्राह्म्यादिशुभ्रमेसंपूज्य वसुपत्रेषु मातृकाः॥१९॥ भूबिंबेलोकपा
लाश्चसायुधान्परमेश्वरी॥ द्वितीयसिंहासनगां पूजयेद्रुद्रभैरवीं॥
२०॥ इति श्रीमज्ज्ञानार्णवे नित्यातंत्रे द्वितीयसिंहासनरुद्रभैरवीय
जनेनाम सप्तमः पटलः॥७॥ ईश्वर उवाच॥ पश्चिमे भैरवीदाविष

ट्कूटा परमेश्वरी॥ यत्स्मृत्वा सशिवादिविद्यासिंहासनक्षमः॥१॥
डाकिनी राकिनी बीजं लाकिनी काकिनी युगं॥ बीजे जाहलदे
वेशीयाज्ञ ये च चंद्रसूर्ययोः॥२॥ आद्यमेकारसंयुक्तं मन्यदीकार
मंडितं॥३॥ क्रूं स्वरस्वमायुक्तं तत्तार्तीयं बीजमालिखेत्॥४॥ बिंदु
नादकलाक्रांतं तृतीयं लसंभवं॥ एषा विद्या महेशानि रुद्रसिं
हासने स्थिता॥५॥ ध्यानमस्याः प्रवक्ष्यामि सर्वभूतनिकेतन॥ बा
लसूर्यप्रभां देवीं जपाकुसुमसन्निभां॥५॥ मुंडमालावलीरम्यां बा
लसूर्यसमांशुकां॥ रक्तवर्णकलशकारपीनोन्नतपयोधरां॥६॥
पाशांकुशौ पुस्तकं च दधानां जपमालिकां॥ एवं ध्यात्वा यजेद्देवीमो
मसे रूपत्रिकारकैः॥७॥ हृद्यष्टत्या षडंग्या निविधाय परमेश्वरी॥ येन म
स्या वरारोहे त्रिकोणं तत्पुटं लिखेत्॥८॥ बहिरष्टदलं पद्मं रविपत्रं
समालिखेत्॥ चतुरस्रं चतुर्द्वारं मंडलमालिखेत्॥९॥ षडंगा
वरणं देवी पूर्ववत्पूजयेत्प्रिये॥ रत्यादित्रितयं देवि त्रिकोणे परिपूज
येत्॥१०॥ डाकिन्याद्यास्तु षट्कोणे वसुपत्रे तु संस्थिताः॥ ब्राह्म्यादिसु
लपत्रात् रविपत्रे ततः परं॥ बालायाः पीठशक्तिं वामाद्याः पूजयेत्प्रि

ये॥ चतुरस्रे लोकपालान् सायुधान् परमेश्वरि॥१२॥ एवं पूजाविधिं कु
र्यात् भोगमोक्षफलाप्तये॥ अनेनैव विधानेन नित्याख्यां भैरवीं यजेत्॥
१३॥ सर्वसौभाग्यदां नित्यां सर्वसाम्राज्यदायिनीं॥ एतस्या एव विद्यायाः
षड्वर्णान् क्रमतः स्थितान्॥१४॥ विपरीतान् वदेत् प्रौढ विद्येयं भोगमो
क्षदान्॥ नित्याख्या भैरवी देवी त्रिपुरारनिहंतनी॥१५॥ न्यासपूजादि
कं सर्वमस्याः पूर्ववदाचरेत्॥१६॥ इति श्रीमज्ज्ञानार्णवे नित्यातन्त्रे पश्चि
मसिंहासनकथनं नामा ॥ मः पटलः॥८॥ ईश्वर उवाच॥ शृणु देवि
महाविद्यां चिंतितार्थफलप्रदां॥ यस्या विज्ञानमात्रेण भुवनाधिपति
र्भवेत्॥१॥ हसाद्यं वाग्भवं चाद्यं हसकातसकरम्श्वरि॥ भूबीजं भुवनेश्व
रि द्वितीयं बीजमुद्धृतं॥२॥ शिवचन्द्रौ महेशानि शान्तस्वरविभूषितं॥ बिं
दुनादकलाक्रान्तं तृतीयं बीजमुद्धृतं॥ एषा विद्या महेशानि भुवनेश्व
रि भैरवी॥ मध्यबीजं नदेवेशि षष्ठदीर्घस्वरभेदिना॥४॥ एवंमानि प्र
किन्यस्य ध्यायेद्देवीं चतुर्भुजां॥ जपाकुसुमसंकाशां दाडिमीकुसु
मप्रभां॥५॥ चंद्ररेखाजटाजूटां त्रिनेत्रां रक्तवासिनीं॥ नानालंका
रसंभगां पीनोन्नतघनस्तनीं॥६॥ पाशांकुशवराभीतिधारयंतीं

शिवां स्मरेत्॥ एवं ध्यात्वा यजेद्देवि यंत्रोद्धारं च पूर्ववत्॥७॥ चैतन्यभैर
वी देवी यंत्रवत्परमेश्वरि॥ सिंहासने समभ्यर्च्य परिवारार्चनं यजेत्॥८॥
षडंगावरणं देवीं पूर्ववत्परिपूजयेत्॥ रत्याद्याः पूजयेद्देवि त्रिकोणे तद
नंतरं॥९॥ ब्रह्मा विष्णुश्च रुद्रश्च पूज्यास्तत्रैव सुंदरि॥ डाकिन्याद्यास्त
था पूज्याः वेदपत्रे ततः परे॥१०॥ अनंगकुसुमाद्याश्च ब्राह्म्याद्या युगु
लेततः॥ रविबिंबे लोकपालानां बटुकाद्यांश्च पूजयेत्॥११॥ योगिनीनि
चतुरस्रे पूजयेत्सर्वदिन॥ सदाशिवसखा यस्मात्कुबेरः परमेश्वरि॥
१२॥ येनेयं प्रार्थितां देवि राजराजस्ततो भवेत्॥ तेनैव प्रार्थिता विद्या गौ
रीव च फलप्रदा॥१३॥ अन्नपूर्णेश्वरी नाम सर्वसंपत्प्रदा सतां॥ अनया
क्रियया देवि कुबेरो धनदायकः॥१४॥ लोकपालेषु सर्वेषु धनरत्नादिपू
रिताः॥ तथाऽन्नपूर्णता मास्मिन्नूल स्थिरास्याः प्रसादतः॥१५॥ अन्नपू
र्णा महादेवि साक्षाल्लोकमधुषाद्विजा॥ मंत्रमस्याः प्रवक्ष्यामि सर्वसिद्धिप्र
दायकं॥१६॥ तारं च भुवनेशानि श्रीबीजं कामराजकं॥ हृदने भगवत्यर्थो
माहेश्वरिपदं लिखेत्॥१७॥ अन्नपूर्णे वह्निजायांत विद्येयं विंशदक्षरी॥
अनयासि ह्रीं विद्यासिद्धिदानां त्रिभूतले॥१८॥ भुवनेश्याः महेश॥

श्रीमद्वा
धुम्रिक पंक्तिः
१९

निषट्दीर्घस्वरैर्भिन्नया ॥ षडङ्गानि महेशानि कुर्यान्न्यासादनन्तरं ॥ १९ ॥ नित्या
ऋष्यादिन्यासमस्य मन्त्रस्यादौ पिङ्कदो वरानने ॥ अनुष्टुप्छन्दो ईश्वरी देवी देवता परिकी
र्तिता ॥ २० ॥ बीजं च भुवनेशानी श्रीबीजं शक्तिरुच्यते ॥ कीलकं कामराजस्या
त्षडङ्गानन्तरं ततः ॥ २१ ॥ एकमेकं पुनश्चैकं पुनरेकं द्वयं चतुः ॥ चतुश्चतु
स्तथा द्वाभ्यां पदान्येतानि पार्वती ॥ २२ ॥ पदानि नव देवेशि नवद्वारेषु विन्यसे
त् ॥ मूर्द्धादि गुदपर्यन्तं पुनरेषु वरानने ॥ २३ ॥ गुदादि ब्रह्मरन्ध्रान्तं पदानां न
वकं न्यसेत् ॥ ब्रह्मरन्ध्रास्य हृदयं मूलाधारेषु लुकमात् ॥ २४ ॥ चतुर्वीतानि
विन्यस्य स्वरैर्धन्यान्य विन्यसेत् ॥ गोलकं च ततो देवि विन्यस्य विधिवत् प्रिये ॥
२५ ॥ प्राणायामत्रयं कुर्वन् ततः पूजामण्डलमालिखेत् ॥ त्रिकोणं च चतुःपत्रं वसु
पत्रं ततः परे ॥ २६ ॥ कलापत्रं च षट्त्रिंशं चतुर्द्वारं समालिखेत् ॥ सिंहासन
स्य परितः पीठदेवीः समर्चयेत् ॥ २७ ॥ सिंहासने दक्षिणे तु कथिताः पीठ
नायकाः ॥ ता एव पूजयेत् पीठे ब्राह्म्याद्याः परमेश्वरी ॥ २८ ॥ जया च विजया
चैव अजिता चापराजिता ॥ नित्या विलासिनी दोग्ध्री अघोरा मङ्गलालि १९
का ॥ २९ ॥ नवमी परमेशानी सिंहासनसमीपगा ॥ समावाह्य यजेद्देवीं ध्या
नं कुर्वन् समाहितः ॥ ३० ॥ तप्तकाञ्चनवर्णाभां बालेन्दुकृतशेखरां ॥ नव

३८

रत्नप्रभादीप्तमुकुटां कुङ्कुमारुणां ॥ ३१ ॥ चित्रवस्त्रपरिधानां मदिराक्षीं
त्रिलोचनां ॥ स्फुवर्ण[illegible]कारपीनोन्नतघनस्तनीं ॥ ३२ ॥ गोक्षीरधाम
धवलं पञ्चवक्त्रं त्रिलोचनं ॥ प्रसन्नवदनेशानं नीलकण्ठं विराजितं ॥ ३३ ॥
कर्पूरेन्दुस्फुरत्सर्पभूषणं कुन्दसन्निभं ॥ नृत्यन्तमतिसंहृष्टं दृष्टानंद
मयीपरं ॥ ३४ ॥ सानन्दमुखहृल्लोलाक्षीमिखलाढ्यनितम्बिनीं ॥ अन्नदा
नरतां नित्यां भूमिश्रीभ्यामलंकृतां ॥ ३५ ॥ एवं ध्यात्वा यजेद्देवि षडङ्ग
वरणायुतां ॥ अग्नीशासुरवायव्यमध्ये दिक्षु गपूजने ॥ ३६ ॥ अथ
वक्ष्ये महेशानि त्रिकोणस्य पूजनं ॥ तारं प्रासादमात्रं च वह्निवायततः
परं ॥ ३७ ॥ सप्ताक्षरीं महाविद्यां अनया देवि पूजयेत् ॥ नृत्यन्तमीश्व
रं देवि त्रिकोणाग्रे सुरेश्वरी ॥ ३८ ॥ ॐ नमः पादमाप्साप्य ततो भग
वते पदं ॥ ततो वराहरूपाय भूर्भुवःस्वःपतिं तथा ॥ ३९ ॥ ङेन्तं भूपतित्व
त्वं चैव मे देहीति च दापय ॥ वह्निजायान्वितो मन्त्रो वराहस्य वरानने ॥ ४० ॥
अनया विद्यया देवि वामकोणे प्रपूजयेत् ॥ वामदक्षिणयोः पूज्य भूमि
यो परमेश्वरी ॥ ४१ ॥ ॐ नमः पद्माभाप्य ङेन्तं नारायणं लिखेत् ॥
४२ ॥ नारायणं दक्षिणाग्रे क्रमेण परिपूजयेत् ॥ वामदक्षिणयोः पूजे

श्रीमहा नित्या

२०

मूर्त्तिर्यैषा परमेश्वरी॥४२॥ एकेन मनुना देवि कथयामितवानये॥ अन्नं
महिषं चान्नं मेदं त्वन्नाधिपांतके॥४३॥ लये समान्नं संलिख्य प्रदापय
ततः परं॥ वह्निजायान्विता मंत्रा संपुटीकृत्य पूजयेत॥४४॥ मेला मात्ल
केनूत्तमया वामदक्षिणयोः क्रमात॥ ततश्चतुर्दले पूज्याः पश्चिमादिक्र
मेणतु॥४५॥ तारेण पूरविद्याच भुवनेशी तदात्मना॥ कमलां रमया भे
दे कामिनस्क भगाय जेत॥४६॥ बकुलपत्रमहाश्रीनित्रलाद्याः पश्चिमा
दितः॥ षोडशारे परमेशानि चंद्रमंडलरूपिणी॥४७॥ कलाः षोडशास
पूज्याः पश्चिमादिक्रमेणहि॥ अमृता मानसी पुष्टिस्तुष्टिः प्रीतिर
निस्तथा॥४८॥ श्रीश्च ह्रीश्च स्वधा रात्रिर्ज्योत्स्ना हैमवती तथा॥ छा
याच पौर्णिमा नित्या अमावास्या च षोडशी॥४९॥ शेषवर्णैश्च पूज्याः स्युः
अष्टपत्रेषु शक्तयः॥ चतुरस्रे लोकपालान् क्रमेण परिपूजयेत॥५०॥
इत्येवं पूजयेत्सम्यक् पूजितान्नरस्क वर्णदा॥ स्वसत्तयाकरोत्यद्वराजराजो ध २०
नाधिपः॥५१॥ सिद्धिप्रदा सिद्धविद्या मुसाध्यत्र प्रदा प्रिये॥ भुवनेश्व
रीभैरव्याभेदांतरमथोच्यते॥५२॥ सहाद्यासे वदेवेशितदासासकलेश्व
री॥ ध्यानपूजादिकं सर्वमेतस्या एव पार्वती॥५३॥ तत्रस्य वरारोहे सिं

हासनमिदं दिशीः॥ संपत्प्रदा भैरवी च सिद्धकौलेश भैरवी॥५४॥ दसरा
था भैरवी सा त्रिपुराबीज पुष्पावती॥ इयत्तु संहराथास्यात्पूजाध्यानादिकं
तथा॥५५॥ एतस्या एव विद्याया आद्यं भैरफव र्जिते॥ तदेयं परमेशानि
नाम्नियं रस भैरवी॥५६॥ संपत्प्रदा भैरवीच ध्यानपूजादिकं प्रिये॥ पं
च सिंहासनमयी महात्रिपुरभैरवी॥५७॥ चतुराम्नाय विद्यानिर्मा
न्य सिंहासनं प्रिये॥ हस्त्रिमात्मकमुच्चार्य सकलिमात्मकमद्रिजे॥५८॥
शक्तिः सकलह्रीमिते चतुर्बीजमुदाहृतं॥ श्रीबीजे तात्तदेयं चैव वा नि
त्या वदास्वरी भवेत॥५९॥ उन्मिणी काम विधेयं भोगमोक्षफलप्रदा
पूर्वाम्नाय महाविद्या दक्षिणाम्नायमुच्यते॥६०॥ वाग्भवं बीजमुच्चा
र्य क्लिन्ने कामस्य बीजकं॥ मदद्रवकुलेहस्त्रों विधेयं भोगिनी प्रिये॥
म्ना ६१॥ दक्षिणीया विद्युये पश्चिमाम्नायमुच्यते॥ वाग्भवं च परांत्र्यैश्च
हसखफ्रें मिति प्रिये॥६२॥ हस्त्रौं मिता स्मृतानादेवी पैचचं तस्मरणवाः स्मृताः
भगवत्येवमालिख्य पृथक् पदं महेश्वरी॥६३॥ चतुर्थं श्रवणं चैव हस
खफ्रें मिति प्रिये॥ कुब्जिके चैव हस्त्रां च हस्त्रीं हस्त्रौं ततः परं॥६४॥ अ
घोरे चैव घोरे च त्वघोरे मुखि चालिखेत॥ हस्त्रों हस्त्रीं किणि विच्चे

द्वात्रिंशदक्षरी ॥ ६५ ॥ पूर्वोक्तैः प्रणवैर्विसंपुटीकृत्य संस्मरेत् ॥ कुब्जि
केयं महाविद्या पश्चिमाम्नायदेवता ॥ ६६ ॥ स्वकर्मात्मकमुच्चार्य महाचंड
पदं लिखेत् ॥ योगीश्वरीपदं पश्चाद्द्वितीयं कालिकाप्रियं ॥ ६७ ॥ अत्र रात्र्या
यत्तीयं नाम्ना कालीति विश्रुता ॥ एताभ्यः परमेशानि पूजनं सिद्धासनं स
दा ॥ ६८ ॥ इति श्रीमत्तानार्णवे नित्यातंत्रे सिद्धासनविद्याविधानं नाम
नवमः पटलः ॥ ९ ॥ श्रीदेव्युवाच ॥ त्रिपुरा द्विविधा देव भवता प्रक
टीकृता ॥ त्रिविधेति यदुक्तं तत्प्रकटीकुरु शंकर ॥ १ ॥ ईश्वर उवाच ॥ पर
ब्रह्मस्वरूपं यत्तादबिंदुत्रयात्मकं ॥ शिवशक्तिमयं तत्तु कथयामि ते
वरानने ॥ २ ॥ व्याप्य तिष्ठति विश्वं सा शिवं च परमेश्वरी ॥ पूर्वं यत्ते मया क
थिता शिवरात्र्यात्मकं प्रिये ॥ ३ ॥ हकारादिसकारांता मातृका शक्तिर
व्यया ॥ हकारः परमेशानि केवलो रिक्त उच्यते ॥ ४ ॥ आद्यं तास्वरभावेन
तदा हंसकलात्मकः ॥ यदुच्यते मातृकार्णैः नत्सैव महेश्वरी ॥ ५ ॥ ह
कारः परमेशानि शून्यरूपः सदाव्ययः ॥ सकारः शक्तिरूपत्वात्सरावान्नु
विसर्गवान् ॥ ६ ॥ अस्येतेः कारणं यस्मात् शक्तिरित्यभिधीयते ॥ आत्मान
दर्थयोगः सोहं शब्देन सुंदरी ॥ ७ ॥ बिंदुत्रयसमायोगान्महात्रिपुर

२१

सुंदरी ॥ नादरूपेण सा देवी हकारार्द्धस्वरूपिणी ॥ ८ ॥ हकारः परमेशा
नि शिवरूपी यतः स्मृतः ॥ तस्याद्यंगं महाशक्तिः हकारार्द्धस्वरूपिणी ॥
९ ॥ अत एव महाविद्या महात्रिपुरसुंदरी ॥ नित्येति कथ्यते देवी चि
त्कला परमेश्वरी ॥ १० ॥ श्रीगुरोः कृपया सद्यः संप्रदायक्रमान्वितः ॥ प्रा
तरुत्थाय देवेशि गुरुं नत्वा स्वनामभिः ॥ ११ ॥ संध्यास्नानादिकं देवी
विधाय मनुवित्तमः ॥ सर्वशृंगारवेषाढ्यः कर्पूरघुसृणादिभिः ॥ १२ ॥
मत्तोहं श्वेदनाद्यैश्च दीप्तांगः कुंकुमारुणः ॥ नवरत्नविभूषाढ्योऽलंकृ
त्वरा विराजितः ॥ १३ ॥ तांबूलरागवदनो मदिरानंदमानसः ॥ यागमंदि
रमागत्य लाक्षाचित्रविचित्रितं ॥ १४ ॥ अनेकधूपवत्कुलं पुष्पप्राका
रपूरितं ॥ गोमयेन स्वसलिलं चारुसुष्यवितानितं ॥ १५ ॥ मनोहरे
मृदुस्पर्शे आसने उपविश्य तु ॥ मंत्रोद्धारं प्रकुर्वीत सर्वकार्यार्थसि
द्धये ॥ १६ ॥ आद्यं वाग्भवमुच्चार्य कामराजं द्वितीयकं ॥ कुमार्या स्मृता तृती
यं तु त्रिपुरापरमेश्वरि ॥ १७ ॥ करशुद्धिकरी विद्या प्रथमा परमेश्वरी ॥ श्री
बीजं च तृतीयं तु त्रिपुरा परमेश्वरि ॥ १८ ॥ कुमारीति द्वितीयास्यात्त्रिपु
रेशि महेश्वरी ॥ त्रिपुरेश्यादि मत्स्यका भुवनेशी परिरक्षिपेत् ॥ १९ ॥

अनयात्मासनं दद्यात्त्रिपुरेश्याः षडंगकं ॥ त्रिपुरेशी महेशानी त्रिबीजा
हस्थिता यदा ॥ २० ॥ चक्रासनगतां देवि विधि द्धि त्रिपुरवासिनी ॥ त्रिपुरे
शी महेशानि वाग्भवैककामराजके ॥ २१ ॥ शिवचंद्रासमायुक्ता तातारये
शिवरूपिणी ॥ सर्वमंत्रासनगता त्रिपुराश्रीरयं प्रिये ॥ २२ ॥ आत्मा
सनगताया स्यकहित्वा ताततं यमद्भिजे ॥ बले मात्मकं सारो स्य साध्य
सिद्धासनस्थिता ॥ २३ ॥ मायालक्ष्मीयुक्तबीजे हृ शक्तिबीजे तृतीयक ॥
त्रिपुराया त्र्यं विकेयभुक्त्र मोपरि कीर्तिता ॥ २४ ॥ संपत्प्रदा भैरवी या तस्या
स्तास्तस्य बीजकं ॥ बिंदुं हित्वा तत्र सर्गो निक्षिपत्सुरसुंदरि ॥ २५ ॥
अनया वाहनं देवि कारयेत्सुरवंदिते ॥ मुनिर्विद्यासमुद्दिष्टा मायाल
क्ष्मीपरास्थिता ॥ २६ ॥ अनया विद्यया देवी पूजेत्त्रिपुरासिद्धिदा ॥ सि
द्धा वा वाहिनी मूर्तिर्विद्यां त्वं शृणु सुंदरि ॥ २७ ॥ मूलविद्यां शृणु प्रौढ
सगलागमसेविता ॥ सर्वदर्शनविद्या च विकल्पमव्ययां प्रिये ॥ २८ ॥ २२
भूमिश्चंद्रः शिवा माया शक्तिः कृष्णाध्वमादनी ॥ अर्द्धचंद्रश्च बिंदु
श्च नवार्णा मेरुरुच्यते ॥ २९ ॥ महात्रिपुरसुंदर्या मंत्रो मेरुसमुद्भ
वः ॥ लकारः पृथ्वी देवी सशैलवनकानना ॥ ३० ॥ पञ्चाशत्पीठ

संपूर्णा सर्वतीर्थमयी परा ॥ सर्वगंगामयी सर्वक्षेत्रस्थानमयी
शिवे ॥ ३१ ॥ सकारश्चंद्र तारादिग्रहराशीस्वरूपिणी ॥ हकाराच्छि व
सवादव्योममंडलसंस्थिता ॥ ३२ ॥ ईकाराद्विश्वकर्त्रीयं मायातुर्या
त्मिका प्रिये ॥ एकाराद्विष्णुवीशाक्षी विश्वपालनतत्परा ॥ ३३ ॥ रकारा
त्तेजसायुक्ता परंज्योतिःस्वरूपिणी ॥ ककारात्कामदा कामरूपि
णी ॥ ३४ ॥ अर्धचंद्रं देवेशी विश्वयोनिरितीरिता ॥ बिंदुना शिवरू
पेण शान्यरक्षणसाक्षिणी ॥ ३५ ॥ अनया सह सर्वत्र व्याप्तिर्निश्चल
तात्मना ॥ एवं परब्रह्मरूपा मेरुराजानुच स्कंदेन ॥ ३६ ॥ एभिर्नवात्मकं
वर्णैर्जायते त्रिपुरा मनुः ॥ अन्यथा सेव निष्पत्तिर्नास्ति श्री त्रिपुरा
मनो ॥ ३७ ॥ श्रीचक्रमपि देवेशि मेरुरूपं न संशयः ॥ लकारः पृथि
वीबीजं तेन भूबिंबमुच्यते ॥ ३८ ॥ सकारश्चंद्र भामिंदु कलाषोडशका
त्मकः ॥ तस्मात्षोडशचापत्रं तु हकारः शिव उच्यते ॥ ३९ ॥ अष्टमूर्तिः
सदा भद्र तस्मादष्टदलं भवेत् ॥ ईकारस्तु महामाया भुवना निचतु
र्दश ॥ ४० ॥ पालयेति परा तस्मात्चक्रकोणं नवविधं प्रिये ॥ शक्तिरेव द्वा
दशनारुढा सा सर्वजगत्त्रयं ॥ ४१ ॥ विश्वयोनिरिति ख्याता सा विष्णु

दंडारूपकं ॥ रकारात्परमेश्वरानि चक्रव्याप्य विनुं भितं ॥ ४२ ॥ दशकोण
कीर्त्यस्माद्इकाराज्ज्योतिरव्ययः ॥ कलादशान्विता वह्नि दशकोणप्रका
रकः ॥ ४३ ॥ ककारान्मदनादद्विशिवं चाष्टस्वरूपकं ॥ योनिवर्ग्यं तदा
चक्रं वसुकोणान्वितं भवेत् ॥ ४४ ॥ अर्द्धमात्रा गुणानूते नादरूपाय
तस्ततः ॥ त्रिकोणरूपा योनिस्तु बिंदुनादैस्तु भवेत् ॥ ४५ ॥ कामे
श्वरस्वरूपं तु विश्वाकारस्वरूपकं ॥ एवं चक्रं तु परार्द्धं श्रीविद्यावर्ण
सम्भवं ॥ ४६ ॥ तत्र प्रादुरभूत्सौ सीनेश्वरकराज समालिखेत् ॥ पूर्वद
ण्डासमभवं यं सिंदूररजसंयुतं ॥ ४७ ॥ कुंकुमस्य रजोभिस्तु भूमौ च
क्रं समालिखेत् ॥ रज्जुरेखं न तत्र स्यात्संधिभेदसमं ऋजु ॥ ४८ ॥
अथवा हेमरौप्याभ्यां ताम्रेण वज्रधातुभिः ॥ पट्टे विरच्य श्रीखंडकर
कचंदनसंभवे ॥ ४९ ॥ पट्टे संस्थाप्य विलिखेच्छलेखन्या हेमतारया ॥
रोचनाकुंकुमाभ्यां तु कस्तूरीचंदनेन तु भिः ॥ ५० ॥ ईशानाद्दक्षिणपर्य
तं ऋजुरेखां समालिखेत् ॥ ईशानादग्निलादयाभ्यां रेखामाकृष्य दक्षि
कः ॥ ५१ ॥ अग्नेः कोणकस्य चवारुण्यां च शक्तिरेखा पराप्रिये ॥ त्रिकोणाका
ररूपायं तस्या उपरि संलिखेत् ॥ ५२ ॥ त्रिकोणाकाररूपं तु शक्ति

२३

वृत्तमुदाहृतं ॥ पूर्वेशान्तस्य मध्यभागे तु मानयुक्तं विदा लिखेत् ॥ ५३ ॥ रेखा
तु परमेश ॥ निवायुराक्षसकोणगा ॥ संधिभेदक्रमेणैव तयोः शक्तयोः
स्ततःपुरः ॥ ५४ ॥ रेखे आकृष्य कोणाभ्यां तदग्रात्पूर्वगे कुरु ॥ वह्नि
मंडलमेतत्तु पूर्वापृथ्वीरवेदिते ॥ ५५ ॥ चक्रत्रयमभूतत्र ततः श्रृ
णु वरानने ॥ पूर्वेशात्तिसवह्निभ्यां कोणाभ्यां स्करवेदिते ॥ ५६ ॥ पूर्व
रेखां तु विस्तार्य तथा पश्चिमवह्निनः ॥ वायुराक्षसकोणाभ्यां रेखां
पश्चिमगां तथा ॥ ५७ ॥ विस्तार्य योजयेद्देवि संधिभेदक्रमेण तु ॥ या
म्यग्रगा पूर्वदेशाद्दक्षकोणान्तरतः क्रमात् ॥ ५८ ॥ तथा रेखा वह्निसे
स्तु पश्चिमे स्यात् दिशि क्रमात् ॥ कोणाभ्यां योजयित्वा दशकोणं तथा
भवेत् ॥ ५९ ॥ तथैवं देवदेवेशि द्वितीयं दशकोणकं ॥ ईशानवह्नि
रेखे पूर्वयाम्यग्रयोः क्रमात् ॥ ६० ॥ विस्तार्य योजयेत्सम्यक् पश्चिमा
स्या दिशि क्रमात् ॥ वायुराक्षसकोणाग्रे रेखे विस्तार्य केदारि ॥ ६१ ॥
पश्चिमा पूत पादेवि योजयेद्दिग्दिगंतेः ॥ एकत्र पूर्वकोणाग्र चतुर्नी
उमनाहृतं ॥ ६२ ॥ योजयेद्देवदेवेशी यथा पूर्वं यथा स्थलकं भवेत् ॥ दशकोण
स्यदचोत्सकोकोणचतुष्टये ॥ ६३ ॥ दक्षिणोत्तरयोर्देवीमध्ये रेखाः

प्रकाशयेत्॥ दक्षिणे विभागे तु तथा चोत्तरभागके॥ ६४॥ षट्कोणस्य
तताद्देवी सिद्धिदं चक्रमेव तु॥ योनिचक्रं च संयोज्य शक्रः सञ्जायते
तदा॥ ६५॥ कक्षामध्यगतां रेखा ऊर्ध्वरूपां तु कल्पयेत्॥ ऊर्ध्वा
कारं यथा द्विजायते तिमनोहरे॥ ६६॥ सन्मुखं पञ्चशक्त्याग्रे त्रा
ग्र चक्रं चतुरस्रकं॥ बिंदुत्रिकोणवस्वारं चक्रमेतदुदाहृतं॥ ६७॥
चक्रमध्ये तु जानीहि द्वादशारं युगुलं तथा॥ शक्रयान्यंकितं देवि बा
ह्यमध्यगतं भवेत्॥ ६८॥ एतच्चक्रं महेशानि सर्वसौभाग्यवर्द्धनं॥ स
र्वसाम्राज्यदं देवी सर्वोपद्रवनाशनं॥ ६९॥ अनेकरत्नमाणिक्यस
र्वपूर्तिकरितं(?)॥ महामाक्षिकदेवीवाग्दिव्योसकं समहतं॥ ७०॥ तत्
बाह्ये महेशानि हृत्पत्रं पूर्णेन्दुसन्निभं॥ तत्पुष्पकुंकुममीनाक्षी वसुपत्रं म
नोहरं॥ ७१॥ ततः षोडशपत्रं तु बिल्वस्तबकवर्दितं(?)॥ तद्बाह्ये देवदेव
शि त्रिवृत्तं मातृकान्वितं॥ ७२॥ चतुरस्रं चतुर्द्वारं संहितं परमेश्वरि॥ २४
चतुःषष्टियंता कोट्यो योगिनीनां महौजसां॥ ७३॥ चक्रेस्मिन्संनि
विष्टास्ताः साधकं मानयंति हि॥ चतुरस्रे मातृकाणि मुद्रितसिद्धि
हितं च॥ ७४॥ मुक्तामाणिक्यघटितं सम्यक्काविराजितं॥ त्रैलोक्य

मोहनं चक्रं भुक्तिमुक्तिफलप्रदं॥ ७५॥ षोडशारं चेन्दुबिंबं रूपं तु सक
लात्मकं॥ सर्वाशापूरकं भद्रे स्रवत्पीयूषवर्षिणं॥ ७६॥ अष्टपत्रं म
हेशानि जपाकुसुमसन्निभं॥ सर्वसंक्षोभणं चक्रं ममसंक्रमु
त्रपूरकं॥ ७७॥ एतत्त्रयं महेशानि सृष्टिचक्रं वरप्रदं॥ पूर्वोक्ता
याधिदेवी बालिं मंडिने सर्वसिद्धिदं॥ ७८॥ चतुर्दशारं देवेशि दाडि
मीकुसुमप्रभे॥ अनंतफलदं भद्रे सर्वसौभाग्यसंपुटं॥ ७९॥
दशारं रक्तपद्माभे सिंदूरसदृशो प्रिये॥ सर्वार्थसाधकं चक्रं मन
श्चिंतितदं सदा॥ ८०॥ द्वितीयं मणिपुरं तस्य जपाकुसुमसन्निभं॥
सर्वरक्षाकरं चक्रं महाज्ञानमयं शिवे॥ ८१॥ एतत्त्रयं महेशानि
स्थितिचक्रं समुद्भवं॥ दक्षिणाम्नायरूपं तु यथोक्तफलप्रदं॥
८२॥ अष्टकोणं वरारोहे बालार्ककिरणारुणं॥ पद्मरागसमप्रख्यं
सर्वरोगहरं सदा॥ ८३॥ त्रिकोणं यत्सहस्राभं बन्धूककुसुमप्रभं॥
सर्वसिद्धिप्रदं चक्रं सकलात्मस्वरूपिणी॥ ८४॥ त्रिकोणं सर्वसंह
तिकारणं प्रीतिदं सदा॥ बिंदुचक्रं वरारोहे सर्वानंदमयं परं॥ ८५॥

सदाशिवमये चक्रं नायके परमेश्वरि ॥ एतच्चक्रं तु संकेतरूपं तन्मयं
सदा ॥ ८६ ॥ पश्चिमाम्नायसंकेते व्यक्तं यस्तु तत्स्फुरितं ॥ ... चक्र
षडध्वानो वितन्ता विरचेहितु ॥ ८७ ॥ चक्रपत्रेषु देवेशि पद ...
गत्य मे ॥ चक्रे त्रिसंधिभागेषु सुकलाध्वाप्यवस्थितः ॥ ८८ ॥ ...
मातृकारूपिकं कथयामि तत्त्वतेनैष ॥ वर्णात्मकं मातृकायां दिक्षु ...
यतः क्रमात् ॥ ८९ ॥ पार्थिवे तत्र ये विद्धि षोडशारे कलास्तके ॥ ...
पत्रेकादिषु ... स्वांतैः दिक्षु विदिक्षु च ॥ ९० ॥ कादिक्षांमाः शाक्त
वर्णाः शाक्तकोणेषु संस्थिताः ॥ णकारादि भकारांता द्वितीयवर्णान्तु श ॥
रके ॥ ९१ ॥ मकारादि क्षकारांता द्वितीयपुष्करके ॥ वर्णात्मके चा
ष्टकोणे त्रिकोणे कथयामि ते ॥ ९२ ॥ अकथादि त्रिकोणांते हक्ष
युग्मं तु मध्यगे ॥ वर्णाध्वा कथितो देवि मातृका पीठरूपकः ॥ ९३ ॥
षट्त्रिंशत्तत्त्वभरिते चक्रे मूलाधारतः ॥ तत्त्वाध्वा कथितो देवि
तत्त्वरूपपरानने ॥ ९४ ॥ पंचसिंहासनाच्चक्रे कलाध्वा च कोशसं
नात् ॥ सर्वाम्नायमयी सर्वा महात्रिपुरसुंदरी ॥ ९५ ॥ त्रिपुरांतम्ब
कांता ध्यानं चक्रे प्राप्य विजृंभते ॥ मंत्राध्वायं समाख्याता निर्म्रिते

नसदानंदे ॥ ९६ ॥ एवं षडध्वनिर्मितं श्रीचक्रं परिचिंतयेत् ॥ उ
त्तराशागता सूक्ष्मा मैत्री यदा चक्रे समुद्धरेत् ॥ ९७ ॥ उत्तराशा तदा देवी
पूर्वा शिव निगद्यते ॥ ईशानकोणे देवेशि तदाग्नेयं न संशयः ॥ ९८ ॥
पश्चिमाभिमुखा मैत्री यदा चक्रे समुद्धरेत् ॥ पश्चिमाशा क्रिया द्वि
या पूर्वा शैवन संशयः ॥ ९९ ॥ वायुकोणे तदाग्नेयमैशानं राक्षसं
भवेत् ॥ दक्षिणाभिमुखा मैत्री यदा चक्रे समुद्धरेत् ॥ १०० ॥ पूर्वा
शैवं तदा सा दिक् रक्षःकोणं तु वह्निकं ॥ एतच्चक्रं मेरुरूपं श्री वि
 द्यार्णैः समुद्भवे ॥ १ ॥ सर्वागममयं देवि कथितं वीरवंदिते ॥ २ ॥
इति श्रीमत्स्त्तानार्णवे नित्यातंत्रे चक्रोद्धारकथनं नाम दशमः
पटलः ॥ १० ॥ छ ॥ ईश्वर उवाच ॥ शृणु वक्ष्ये देवेशि त्रिपुरायंत्र
तं धुना ॥ नवाक्षरी महाविद्या यं ब्रह्मांडगोलकः ॥ १ ॥ चतु ...
कोदंडे त्रिकोणं तत्पुरो मुखे ॥ निरालंबं तथाख्यातमेतद्बुलं ॥ २ ॥
लकारे चतुरस्रं स्यात् पृथ्वीबीजं तथाप्रिये ॥ ... तु ...
वत्सी रूपवर्षिणी ॥ ३ ॥ त्रिकोणरूपी च क्लिं स्यात् त्रिकोणं ...
वा ॥ एकारश्च रकारश्च ईकारश्च त्रयेण वेद ॥ ४ ॥ मायाविकाररूपेण

श्रीमहा
२६

षट्कोणत्रयरूपिणी॥ हकारोव्योमरूपत्वाद्विंदुश्चमुखमंडले॥ ७॥
इच्छारूपेण देवेशि सर्वत्र परमेश्वरी॥ तस्मान्मादनमाख्यातं मतं
हि मेरुमंडले॥ ६॥ शृणु देवि प्रवक्ष्यामि बीजं कामेश्वरी मनुं॥ सकलं
भुवनेशानि कामेशी बीजमुत्तमं॥ ७॥ अनेन सकला विद्या वक्ष्या
मि विशेषतः॥ शान्त्यर्णं रूपवर्णाग्र्यं कलामध्ये सलोचनं॥ ८॥ वा
ग्भवं पंचवर्णं तु कामराजमथोच्यते॥ मानदं शिवचंद्राद्यं शिवांतमी
नलोचने॥ ९॥ कामराजमिदं भद्रे षड्वर्णं सर्वमोहनं॥ शक्तिबीजं वरा
रोहे चंद्राद्यं सर्वसिद्धिदं॥ १०॥ चतुरक्षररूपं तु अक्षरी त्रिपुरा परा॥
सर्वतीर्थमयी देवी सर्वदेवस्वरूपिणी॥ ११॥ सर्वशास्त्रमयी विद्या स
र्वयागमयी परा॥ सर्वयज्ञमयी सा वै सर्वज्ञानस्वरूपिणी॥ १२॥ सर्व
देवमयी साक्षात्सर्वसौभाग्यसुंदरी॥ यन्नामुपास्य देवेशि कामः स
र्वांगसुंदरः॥ १३॥ कामराजाभिधा देवी नित्ययंत्रस्वरूपिणी॥ ७॥ इ
ति श्रीमद्ज्ञानार्णवे नित्यातंत्रे मंत्रमोहाख्यकथनं नाम षट्कादशः
पटलः॥ १६॥ ७॥ श्रीदेव्युवाच॥ एतस्यादेवदेवेश भेदोन्के धयसं
कर॥ केन केनोपासितेयं विपदाकुरतलकः॥ १॥ ईश्वर उवाच॥ श्व

णु देवि प्रवक्ष्यामि लोपामुद्राभिधो वरे॥ कामराजाख्यविद्यायाः
शक्तिं तूर्यां च सुंदरि॥ २॥ हित्वा मुख्यशिवं हाद्यालोपामुद्रा प्रका
शिता॥ अगस्त्योपासिता विद्या त्रैलोक्यक्षोभकारिणी॥ ३॥ एषा
विद्या कामराज पूजिता वनसेशयः॥ विद्याद्वयमिदं भद्रे दुर्लभं भु
वनत्रये॥ ४॥ कामराजाख्यविद्यायां वाग्भवेन वरानने॥ विद्या द्वा
दशवक्ष्यामि शक्तिमादनमध्यगे॥ ५॥ शिवं कुर्याद्वाग्भवे तु शिवा
द्यं कामराजकं॥ चंद्राद्यं तु तृतीयं स्यात् द्वितीयं मनुपूजितं॥ ६॥
हसाद्यं वाग्भवं देवी चंद्राद्यं शिवमध्यगे॥ मादनं कामराजं तु शक्ति
बीजं सहानने॥ ७॥ चंद्राराधितविद्येयं भोगमोक्षफलप्रदा॥ हसा
द्यं वाग्भवं विद्धि शिवाद्यं हसमध्यगं॥ ८॥ मादनं कामबीजं तु तत्तृ
तीयं शृणु पार्वती॥ हसाद्यं शक्तिबीजं तु कुबेरेण प्रपूजितं॥ ९॥ का
मराजाख्यविद्यायां स्थाने यं स्मरवंदितं॥ शक्तिबीजं हसाद्यं स्यात्
विद्या गस्त्यप्रपूजिता॥ १०॥ लोपामुद्राप्रभावेन साक्षाद्विद्या स्वरू
पिणी॥ कामराजाख्यविद्यायां वाग्भवं मानदं स्मृतं॥ ११॥ चंद्रं तत्र वै
संयोज्य कामराजे ततः परं॥ हित्वा चंद्रं सुरं वै कुर्याद् द्वितीयं तु दि

२६

श्रीमत्ताना ॥ नित्या ॥

२७

पूजिता ॥ १२ ॥ कामराजाख्यविद्यायां हित्वा भूमिं तृतीयके ॥ शक्ति
केवे स्थितादेवि चंद्राधः कुरु तत्त्वत ॥ १३ ॥ इंद्रराधितविद्येयं भुक्ति
मुक्तिफलप्रदा ॥ लोपामुद्राख्यविद्यायां द्वितीयायां महेश्वरी ॥ १४ ॥ का
मराजं मनु हित्वा तातारि यशक्र गः शिवः ॥ एषा विद्या वराहे त्रिपुरा
सूर्यपूजिता ॥ १५ ॥ अथ बिंदुविसर्गकर्त्तामिच्चतुःकूटा च शंकरि ॥ लो
पामुद्राद्वितीयं तु बिलिख्य सकरं वदित ॥ १६ ॥ पुनर्बिलिख्य तामेव
चतुर्थं पंचमं स्थितं ॥ हित्वा तु तुर्यं नंदिशानि मे कोचार्य चैव वै रेत ॥ १७ ॥
चतुःकूटा महाविद्या शंकरेण प्रपूजिता ॥ लोपामुद्रां पुनर्देवि विलि
ख्य तदनंतरं ॥ १८ ॥ नंदिकेश्वरविद्यायां षट्कूटा वर्गमेव च ॥ दुर्वा
ससा पुरा देवी नित्यक्रा प्रपूजिता परा ॥ १९ ॥ कामराजाख्यविद्यायां त्रि
कूटं प्रवरानने ॥ यास्त्रीनाभुवनेशानि द्विधा कुरु महेश्वरि ॥ २० ॥ बिंदु
हीनां नादहीनां दुर्वाससः पूजिता भवेत् ॥ एतेद्वादशसंख्याकं मेरुक
फरवादितं ॥ २१ ॥ द्वादशांते स्थितादेवि परब्रह्मस्वरूपिणी ॥ राज्ञी यं स
र्वविद्यानां सर्वाम्नायैकसेविता ॥ २२ ॥ सर्वागममहातंत्रैर्वदिता दव
वदिता ॥ सर्वयोगिनंतानित्याकेवलब्रह्मरूपिणी ॥ २३ ॥ एव विद्यमत

२७

विद्याविद्या त्रिपुरसुंदरि ॥ इयमेव महादेवि त्रीकूटा परमेश्वरी ॥ २४ ॥
वल्लुराक्ष्यत सर्ववल्लभा विष्ण्वादिभिः सदा ॥ नो वाच्या मनसा बुध्या
तुर्या वक्तुं न शक्यते ॥ २५ ॥ सा सूक्ष्मरूपमयी देवि षोडशार्णस्वरूपि
णी ॥ मनसैव महेशानि स्मर्तव्या हेतुसिद्धये शिवः ॥ २६ ॥ इति श्रीमत्ता
नार्णवे नित्यातंत्रे त्रिपुरसुंदरीह रूपानंदवर्णनं नाम द्वादशः पटलः
१२ ॥ श्रीदेव्युवाच ॥ परब्रह्मतया साक्षात्कृता विद्या षोडशाक्षरी ॥ कथ
यत्वं महादेव यथा यं न वल्लभा ॥ १ ॥ त्रिकूटाः कथिताः सर्वाः चतुःकू
टा च शांकरी ॥ षट्कूटा वर्णिता चैव मनवः कथिता विभो ॥ २ ॥ एतास्के
सकला विद्यास्त्रिविधा स्तुतामया ॥ इदानीं श्रोतुमिच्छामि श्रीविद्यां
षोडशाक्षरी ॥ ३ ॥ राठत्तनवरारोहे श्रीविद्यामंत्रविद्रुपः ॥ योगिनीनां
भवद्रूपः श्रीगुरोः शासनात्प्रिये ॥ ४ ॥ षोडशार्णमिदां विद्यां नित्यात्म
स्य स्थिते प्रिये ॥ राज्ञी राज्यप्रदा या पि पुत्राय प्राणदा यथा ॥ ५ ॥ देयं तु स
लि भेदसाम्राज्यमपि पार्वति ॥ शिरोपि प्राणसहितं न देया षोडशाक्षरी ॥
६ ॥ उच्चार्यमाणायमंत्रास्ते सर्वेबालचिकाः प्रिये ॥ उच्चाररहितं वरल
श्रीविद्या षोडशाक्षरी ॥ ७ ॥ सवर्णोपि वरारोहे वल्लक साक्षीं त्रिस

रं॥ भेदेनोपभुक्तपुष्पं तु शिवरूपं यथा भवेत्॥ ८॥ तथा निरक्षरं खु
... यत्स्वरं रूपं संस्थितं॥ उदके लिखितं यद्वन्मेखत्राकारस्तथा भवे
त्॥ ९॥ भोगमोक्षप्रदा विद्या विद्यायां ... विद्यायो ... विना गु
रूपदेशेन शापो भवति निश्चयात्॥ १०॥ चन्द्रानेव रूपं ... तत्त्वरूका
दिसहितं पृथक्॥ वामा ... विन्दुनादाद्यं विश्वमातृकलात्मकं॥ ११॥
चतुर्विधप्रकारेण ... प्रकथ्यते॥ प्रथमं नाममात्रेण ... यस्मात्क
थ्यते सुविद्वले ... ॥ १२॥ विद्यादौ या जयेद्दिव्या साक्षाज्जागृत्स्वरूपि
णी॥ उत्पत्तिर्जाग्रतो ... भावना ... मनसा सदा॥ १३॥ कला चतुर्थी जा
ग्रदवस्थायां व्यवस्थिते॥ जागृत्सेत्यगुणा प्रोक्ता केवलं शक्तिरूपि
णि॥ १४॥ त्रिकूटा सकला भेदाः पञ्चकूटं भवन्तिहि॥ केवला विद्युत्क
स्यात् षट्कूटा शांकरी भवेत्॥ १५॥ द्वितीयायं प्रकारस्यात् ... भुव
... एव शिवरूपं तत् व्यापकात्वात्कराम्बरि॥ १६॥ निष्कलायां
... सदा शिवमयी परा॥ सुषुप्तिरूपिणी साक्षात्कलरूपायतः ... ॥
... मरणं विस्मृतिर्मूर्छा निद्रा च तमसे ... ॥ सुषुप्तिः सकला ...
... शिवरूपिणी॥ १८॥ केवलं तेन जाग्रत्स्यात् पञ्चकूटात्र

शांभवी॥ सुषुप्तौ तु जागरादौ स्वप्नावस्था तु रजोमयी॥ १९॥
अभिलाषात्मकः ... विषये पुनः स्मृतिः॥ कला चतुर्थ
... स्वप्नावस्थायां ... ॥ २०॥ शिवरूपा शांकरी सा महा
त्रिपुरदेवता॥ विद्या ... शक्तिरूपा सदा॥
२१॥ तदा भेदस्य सकलं पञ्चकूटा परमेश्वरी॥ ... नवकू
टा स्यात् ... षट्कूटा च ... ॥ २२॥ ... स्मरणमात्रेण ... ज
... ॥ भेदत्रयं तु कथितं ... ॥ २३॥
... विज्ञानमात्रेण ... साक्षात् ... ॥ सुषुप्तादौ जागर
स्यात् स्फुरतामात्र ... ॥ २४॥ ... तुर्या
तु परमा कला॥ भावाभाव विनिर्मुक्ता गुणातीता निगद्यते॥ २५॥
वैराग्यं तु सुषुप्तस्य ... मनः॥ सदा ... निधार...
... कलात्मकः ... भेद ... विपरीतक्रमेण
हि॥ विलिख्य परमेशानि तत्त्वानि समुद्धरेत्॥ २७॥ ...
... त्रिपुरसुन्दरी ... बीजैः ...
... पञ्चकूटा परमेशानि ... ॥ त्रिकूटः

सकलं भवेद्षोडशार्ण्या भवेन्निधिः ॥ २८ ॥ वैष्णवेकोनविंशार्णा शैवी स
प्तदशाक्षरा ॥ बह्वकोटिसहस्रैस्तु काजिह्वाकोटिशतैरपि ॥ २९ ॥ वर्णि
तुं नैव शक्यं श्रीविद्याषोडशाक्षरी ॥ वैखरीवाच्यभावत्वादशक्यगु
णवर्णने ॥ ३० ॥ यतो निरक्षरं वस्तु परानन्दस्तु कारणं ॥ मूकीभूता हि
पश्यंति मध्यमा मध्यमा भवेत् ॥ ३१ ॥ ब्रह्मविद्यास्वरूपेण भुक्तिमु
क्तिफलप्रदा ॥ ३२ ॥ कोट्युच्चारणदेवेशी वाजपेयस्य कोटयः ॥ ३३ ॥ अश्व
मेधसहस्राणि प्रादक्षिण्यं सुवल्लभा ॥ कोट्यादितीर्थयात्राश्च सा
र्धकोटित्रयान्वितः ॥ ३४ ॥ तुलां नार्हंति देवेशी नाम्नकाशीविचार
णा ॥ ३ कोट्युच्चारण्यगिरिजे किं पुनर्नैकेवलं ॥ ३५ ॥ षोडशार्णाम
हाविद्या नश्यकैस्याः कदाचन ॥ गोपितावाल्लयाभेद्रैस्वयानिरवपा
वैती ॥ ३६ ॥ शिवशक्तिसमायोग्या यस्या भेद्यायते ॥ बद्धतत्वं भव
तु श्रीविद्याषोडशाक्षरी ॥ ३७ ॥ विना गुरूपदेशेन श्रीविद्याषोड
शाक्षरी ॥ हठाजपं लयकसभक्त्यायोगिनीशापे ॥ ३८ ॥ श्रीगु
रोः कृपया लब्ध्वा सर्वसाम्राज्यदायिनी ॥ भुवनत्रयसौभाग्यं ददा
ति विपुलं प्रिये ॥ ३९ ॥ साक्षान्मदनसौभाग्यं त्रैलोक्याकर्षणक्ष

रा॥

मे ॥ सकृधा तरंगिणी विग्रहारूचातुर्यदायिनी ॥ ४० ॥ सौभाग्यसाम्राज्यसं
पत्कलापकदायिनी ॥ परब्रह्मणि लीनत्वं ददातीयं श्रुतं मे ॥
४१ ॥ प्रपंचसागरे लीनानुद्धरेद्मातृका ॥ यस्याः सामर्थ्यतो देवि भु
वनानि चतुर्दश ॥ ४२ ॥ श्रीमद्वचःपरमेशानि तेषां कारणरूपिणी ॥
चतुःसागरसामर्थ्यं लीलापनता भवेत् ॥ ४३ ॥ ब्रह्माण्डकोटिजन
नी महामोक्षप्रदायिनी ॥ निःसरंति महामंत्राः स्फुलिंगा य
था प्रिये ॥ ४४ ॥ भवंतः सकोटिहवो विद्यास्तु बहवस्तथा ॥ वाग्भवाद्यु
सम्मुत्पन्ना तस्या वामभावच्यते ॥ ४५ ॥ मातृकार्णस्तथा नंद्य वाग्भ
वा निःसृताः क्रमात् ॥ अतएव सहस्राणि राद्भ्रूमयी प्रिये ॥ ४६ ॥
प्लावयंती जगत्सर्वं तथा त्रैलोक्यमोहिनी ॥ मोहयंति कामकन्या पुत्र
पौत्रप्रवर्धिनी ॥ ४७ ॥ क्लिं प्रभावेन सकलं ग्रथितं कामसत्त्वकं ॥ तद
सौभाग्यसंपन्ना ब्रह्मस्थाननिवासिनी ॥ ४८ ॥ सौभाग्यगर्वगहना
विश्वमोहिनी रिता ॥ चतुर्थाद्भूयानि षट् त्रैलोक्यवशकारिणी ॥
४९ ॥ साक्षात्संविन्मई ज्ञानरूपिणी भोगदायिनी ॥ महासम्पत्प्रदा
नित्या साक्षाद्ब्रह्मस्वरूपिणी ॥ ५० ॥ षोडशार्णमयाभेद्या श्रीविद्याक

थिनापुरः॥ निधानेभिवचोरेभ्योरक्षणीयंतथाप्रिये॥५९॥ नदेया
यस्यकस्यापिदेयाप्राणप्रदायिने॥ निर्भक्तायस्वभक्ताय प्राणेभ्या
प्यधिकायच॥६०॥ इतिश्रीमज्ज्ञानार्णवेनित्यातंत्रेषोडशीवि
द्याविवरणंनामत्रयोदशःपटलः॥१३॥ श्रीदेव्युवाच॥ कल
मंडलमाख्यातंनपूजातत्रमंडले॥ कथितापरमेशान श्रोतुमि
च्छामितत्वतः॥१॥ ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामिपूजावि
धिमनुत्तमं॥ तदंगंकलशादीनांस्थापनंप्रथमंभवेत्॥२॥ न
ह्विधानेनश्रृणुप्रोक्तंयथाविधिसमासतः॥ मंडलंवामतः कृ
त्वाजलेनचतुरस्रकं॥३॥ वह्निकराभ्यांदेवेशिवत्राधारंमनो
हरं॥ सौवर्णंरौप्यंताम्राद्यैरचितंपूजयेत्प्रिये॥४॥ वह्निमंडल
रूपंतुकलादशकमर्चयेत्॥ धूम्राचनीलवर्णाचकपिल्याविस्फु
लिंगिनी॥५॥ ज्वालाहैमवतीकव्यवाहिनीहव्यवाहिनी॥ रौद्रि
संकर्षणीचवैश्वानरकलादश॥६॥ आभिःकलाभिःसहि
तावह्निंतत्रप्रपूजयेत्॥ कलशंहेमजंवान्यंस्थापयेत्तत्रसुं
दरि॥७॥ पूजयेत्सूर्यरूपंतुकलाभिःपरमेश्वरि॥ तपिनीता

पिनीचैवविबुधाबोधिनीतथा॥८॥ कलिनीधारणीचैववरेण्या
कर्षिणीतथा॥ मायाविश्वावतीहिमाप्रभासौरकलाइमाः॥९॥ क
लशंतुसमापूर्यविशेषेणवरानने॥ तत्रस्थममृतंसाक्षाच्चंद्ररूप
विचिंतयेत्॥१०॥ चंद्रमंडलमभ्यर्च्यकलाभिःसुरवंदिते॥ अ
मृतामानसीतुष्टिःपुष्टिःप्रीतिरतिस्तथा॥११॥ श्रीश्चह्रीश्चस्व
धारात्रिर्ज्योत्स्नाहैमवतीतथा॥ छायाचपौर्णिमानित्याअमावा
स्याचषोडशी॥१२॥ आभिःसमभ्यर्च्यमंत्रैर्योजेदानंदभैरवं॥ वि
वर्चंद्रोमातृकांतकालेशांकोधुवक्षयः॥१३॥ वासुश्चवामक
र्णेनयोजितोबिंदुलांछितः॥ बीजमेतत्समुच्चार्यतथाचानंद
भैरवं॥१४॥ डें तेशिरस्वामंत्रमुक्तंपुनर्बीजंतुसंलिखेत्॥ चंद्र
हिलादिमंकुर्यात्कर्णेवामाक्षीयोजयेत्॥१५॥ स्वरादव्यंततो
वौषडियमानंदभैरवी॥ अनेनचेंद्रसंपूज्यपूजार्हःकलशोभ
वेत्॥१६॥ विधायवामभागेतुचतुरस्रंतुमंडलं॥ यंत्रिकांतत्रसं
स्थाप्यपात्रंचतत्रविनिःक्षिपेत्॥१७॥ पुष्पादिकंनसंपूज्यपूजयेत्क
रुणान्वितं॥ षडंगंतत्रसंपूज्यसामान्यार्घ्यमिदंप्रिये॥१८॥ अ

थवक्ष्ये महेशानि विशेषार्घ्यस्य लक्षणं ॥ आत्मश्रीचक्रयोर्मध्ये
चतुरस्रं तु मंडलं ॥ १९ ॥ सामान्यार्घ्यस्य तोयेन देशिको भूमिमंत्र
नुकः ॥ वह्निकलाभिः पुटितां यंत्रिकां तत्र योजयेत् ॥ २० ॥ त्रिकोण
वृत्तषट्कोणचतुरस्रं तु मंडलं ॥ वह्नितत्त्वे विलिख्याथ पूजयेद्
त्रिकामयं ॥ २१ ॥ पूर्ववत्परमेशानि त्रिकूटामध्यगां यजेत् ॥ व्य
स्तैः कूटैर्यजेत्तत्र त्रिकोणं परमेश्वरि ॥ २२ ॥ ह्रीं राद्यया षडंगानि
षट्कोणेषु प्रपूजयेत् ॥ सौवर्णं राजतं वापि पात्रं संस्थापयेत्प्रि
ये ॥ २३ ॥ सूर्यरूपं प्रपूज्याथ यंत्रे पूर्ववदालिखेत् ॥ समस्तव्यस्त
कूटैस्तु पूजयेत्पूर्ववत्क्रमात् ॥ २४ ॥ विशेषेण समापूर्य चंद्र
द्रवमयं प्रिये ॥ पूर्ववच्चक्रमालिख्य त्रिकूटां यंत्रमध्यगां ॥ २५ ॥
त्रिकोणं चिंतयेत्तत्र त्रिकूटैः पूजितं प्रिये ॥ अकथादित्रिरेखा
द्यं हक्षाभ्यंतरसुत्तमं ॥ २६ ॥ ह्रीं राद्यया षडंगानि षट्कोणेषु प्र
पूजयेत् ॥ आत्मानं हंसमंत्रेण आनंदं तु प्रपूजयेत् ॥ २७ ॥ मूल
विद्यां यजेत्तत्र षोडशार्णं जपेत्ततः ॥ धूपदीपौ निवेद्याथ नमस्कृ
त्वार्घ्यकं बुधः ॥ २८ ॥ मुद्रां संदर्शयेत्तत्र सा साक्षाद्ब्रह्ममयं भवेत् ॥

प्रोक्षयेत्तेन चात्मानं पूजोपकरणानि च ॥ २९ ॥ सर्वत्र प्रोक्षणं कु
र्यात्सर्वं ब्रह्ममयं भवेत् ॥ आत्मानं तु समभ्यर्च्य भूतान्संत्रासयेत्त
ततः ॥ ३० ॥ मूलविद्यां समुच्चार्य दिक्षु बंधं स्फोटनादिकं ॥ तत्तु
रवः संतादि वि भूतशुद्धिं प्रकल्पयेत् ॥ ३१ ॥ ततो न्यासादिकं कुर्यात्स्वे
आत्मनस्तु शरीरके ॥ करशुद्धिं करन्यासं मध्यमादिकनिष्ठके ॥ ३२ ॥
अंगुलीषु ह्रीं राद्यया करशुद्धिः प्रिये ॥ ततः स आत्मासनं दद्या
त्ततश्चक्रासनं प्रिये ॥ ३३ ॥ सर्वमंत्रासनं दद्यात्साध्यसिद्धासनं
यजेत् ॥ ३४ ॥ पादयोर्जंघयोर्जान्वोर्लिंगे न्यस्य चतुष्टयं ॥ ३५ ॥
कुमार्याः स्त्रिपुरेशान्याः षडंगानि च पूर्ववत् ॥ अथ वक्ष्ये महेशा
नि श्रीविद्यान्यासमुत्तमं ॥ ३६ ॥ संपूर्णां चिंतयेद्दिव्यां ब्रह्मरंध्र
पत्रगं ॥ ललाटे धारयेद्यां षोडशार्णां महासौम्यप्रदां स्मरेत् ॥ ३७ ॥ ऐं वा
मांसदक्षांसे हृन्मध्ये दंडिनीत्याम येत्ततः ॥ त्रिपुरांक महामुद्रां
पादमूले न्यसेत्प्रिये ॥ ३८ ॥ त्रैलोक्यस्य तु हृत्कंठे ध्यात्वैवं तिल
के न्यसेत् ॥ संपूर्णामेवं वदने द्वेष्टनत्वना विन्यसेत्ततः ॥ ३९ ॥ पुनः
संपूर्णया देहगल्लोर्ध्वे विन्यसेत्ततः ॥ पुनः संपूर्णया देहव्यापक

तेन विन्यसेत् ॥ ३९ ॥ व्यापकौ नेत्रयोर्निम्रुद्रां मुखेषु क्षिप्त्वा सिवेच्च ॥
श्रीविद्यापूर्णरूपोयं न्यासः सौभाग्यवर्द्धनः ॥ ४० ॥ परिभ्राम्यानामि
कौ तु मूर्द्धानं परितः प्रिये ॥ अलं स्त्रीं सिपद्विमणिव धेन्यसेत्ततः ॥
४१ ॥ ललाटनामिकौ कुर्यात् षोडशार्णे स्मरत्तु धः ॥ संमोहनाख्यादे
वेशीन्यासो युक्ष्वोभकारकः ॥ ४२ ॥ त्रैलोक्य मस्तकं ध्यायेत् श्रीवि
द्यामनसौ स्मरत् ॥ पादयोर्जंघयो जानुकट्योरपुनीष्ठके ॥ ४३ ॥
नाभौ पार्श्वद्वये चैव स्तनयोरंशयोस्तथा ॥ कर्णयोर्भ्रूस्वरंध्रेवद
नेक्षीणी पावेती ॥ ४४ ॥ ततः कर्ण्ये ब्रह्मरंध्रेतु करवेष्टण्ययोः क्रमात् ॥
संहारोयं महान्यासो बीजैः षोडशभिः क्रमात् ॥ ४५ ॥ श्रीविद्यायाः
षोडशार्णैः न्यासौ विश्वेश्वरो भवेत् ॥ स्मृष्यतो विन्यसेद्देवि मातृका
पूर्ववत् प्रिये ॥ ४६ ॥ मातृकार्णेस्त्वेकरूपोपवर्गाख्य कसमन्विते ॥ व ३२
शिनी मातृकान्यस्य हृजाष्टकसमन्विते ॥ ४७ ॥ अवर्गान्ते लिख
द्रीजं वह्निफान्तं समन्विते ॥ वामकर्णविसर्गाढ्यं बिंदुनादांकितं
प्रिये ॥ ४८ ॥ वशिनी पूजयेद्वाचां देवतां देविस कत्र्ले ॥ कवर्गान्ते भ
हेशानि कामेश्वरीबीजमुत्तमं ॥ ४९ ॥ मेरुस्तं ससुम्नांयेवाक्

देवीं पूजयेत्ततः ॥ चवर्गान्ते ध्यातल्लां तेक्षमनुयेस्वरान्विते ॥ ५० ॥ मो
दिनीं पूजयेद्वाचं देवतां तदनंतरं ॥ टवर्गान्ते वायुतोयसुरवसंलं भूह
स्वरी ॥ ५१ ॥ वामकर्णेंदु बिंद्वाढ्यं विमला वाग्धीश्वरी ॥ तवर्गा
न्ते जहस्वं मान्नमाधुवामनेत्रविभूषितं ॥ ५२ ॥ बिंदुनादांकितं बी
जं वाग्देवी मरुणां यजेत् ॥ पवर्गान्ते व्यामरक्तं समलतोयामि मुरव्
कं ॥ ५३ ॥ ऊकारः स्वरसंयुक्तं बिंदुनादकलांकितं ॥ जयिनीं पूज
येद्वाचां देवतां बीरवंदितं ॥ ५४ ॥ यवर्गान्तेजातकाले ऊवा सुसम
न्विते ॥ ऊसाद्यं देवतां वाचां सर्वेश्वरीं परिपूजयेत् ॥ ५५ ॥ श्वसुमं वा कि
गान्तं तर्यं बीजं नपरिमंडितं ॥ बिंदुनादकलाक्रान्तं कौलिनीं वाच
मर्चयेत् ॥ ५६ ॥ शवर्गान्ते महेशानि न्यसेत्तत्वार्थे सिद्धये ॥ शिरोल
लाटभ्रूमध्यं कंठहृन्नाभिर्लिंगान्तरे ॥ ५७ ॥ आधारे व्यापकं यावन्न्य
सेद्विके मातृ प्रिये ॥ षोढान्यासं ततः कुर्यान्न्यासेन ब्रह्मरूपकं ॥
५८ ॥ विराड्स्वरूपो वर्णात्मा शिवः साक्षान्न संशयः ॥ गणेशोग्र
थमो न्यासः सर्वविघ्नविनाशनः ॥ ५९ ॥ अरुणादित्यसंकाशान्
गजवक्त्रांस्त्रिलोचनान् ॥ पाशांकुशवराभीतिकरान्शक्तिसमं

न्वितान्॥६०॥ध्यात्वा प्रविन्यसेद्देवि मातृकान्यासवत्ततः॥विघ्ने
श्वरः स्तथा श्रीश्च विघ्नराजः स्तथा ह्रिया॥६१॥विनायकस्तथा तु
ष्टिः शांतियुक्तः शिवोत्तमः॥विघ्नकृत्पुष्टियुक्तश्च विघ्नहर्त्ता च सर
स्वती॥६२॥विघ्नराड्रतियुक्तश्च मेधान्वग्गणनायकः॥एकद
न्तश्च कांतिश्च द्विदंतः कामिनीयुतः॥६३॥गजवक्त्रो मोहिन्या
च निरंजन नटी तथा॥कपर्दी तु तथा निद्रा दीर्घवक्त्रस्ततः प्रिये॥६४॥
ज्वालिनी सहितः पश्चान्नंदा शंकुकर्णो ततः॥वृषध्वजश्च सन्न
नागणनाथेन संयुता॥६५॥कामरूपिणीका पश्चाद्गजेंद्रः शु
भ्रयायुतः॥शूर्पकर्णो जयिनी त्रिनेत्रः सत्यया न्वितः॥६६॥ ३३
लंबोदरश्च विघ्नेशो महानादस्वरूपिणी॥चतुर्मूर्तिः कामदा च
सदाशिवयुता ततः॥६७॥मदविह्वल नाम्नी च आमोद विकृतेन
ते एकमुखश्च तथा पूर्णी सुमुखो भूतिमान्ततः॥६८॥प्रमोदश्च
तथा भ्रामिरकपादस्तथा सती॥द्विजिह्वश्च रमायुक्तः शूरः श्रीवत
मानुषी॥६९॥वीरण सहिता पश्चात्खेल जे भद्रकुरध्वजो त॥षण्मु
खश्च विकर्णो च वरदो भृकुटीयुता॥७०॥वामदेवस्तथा लज्जा॥

वक्रतुंडस्ततः परं॥दीर्घघोणान्वितः पश्चाद्द्विरंडकधनुर्धरः॥७१॥
सेनानी ग्रामिणीयुक्तो ग्रामणी रात्रिसंयुतः॥मत्तश्च चंडिकायु
क्तो विमत्तश्च शशिप्रभा॥७२॥मत्तवाहन लोलाक्षश्च जटी च चपला
क्षणी॥मुंडिश्च ज्वीयुतः पश्चात्खड्गी दुर्भगयान्विता॥७३॥वर
प्रयश्चैव स्कंधगा दर्पकस्तु तथा शिवा॥भक्तप्रियश्च दुर्गान्नमेघ
नादश्च कालिका॥७४॥गणेशाः कालकुञ्जान्त गणपा विघ्नहा
रिणी॥मातृकाद्यैर्न्यसेद्देवि ग्रहन्यासस्ततो भवेत्॥७५॥पद्म
रागं सितं श्यामं पीतं च पाडुरं॥ [illegible] धूम्रं धूम्रं धूम्र
विन्वितयुत॥७६॥रविमुख्यान्क्रमात्सर्वाभरणभूषिता
न्॥वामोरुन्यस्तहस्तांश्च दक्षहस्ताभयप्रदान्॥७७॥स्वरैरर्कं
हृदि न्यस्य यवर्णः शशिनं ततः॥भ्रूमध्ये च कवर्गेण भौमं नेत्रत्रयान्वि
तं॥७८॥चवर्गेण बुधं हस्तौ टवर्गेण गुरुं पुनः॥हृदयोपरि देव
शितवर्गेण गलेभृगुः॥७९॥पवर्गेण शनिं नाभौ राहुं वक्त्रे शवग
तः॥पदोः सान्त्यं तु गुदके तु न्यसेद्देववरानने॥८०॥अथ नक्षत्रदे
वन्न्यासं कुर्यात्सकलवच्छृदे॥ज्वलत्कालाग्निसंकाशाः सर्वाभरण

भूषिता ॥ ८१ ॥ नतीपाश्येशिवनीसुरम्यावरदाभयपाणिकः ॥ युग्म
युग्मंतथायुग्मं स्युग्मयुग्मनरी फिवीं ॥ ८२ ॥ येकमेकेतथाद्वेद्वमेके पु
ष्यांतसुच्यते ॥ ललाटे चक्षुषोः पश्चात्तद्वमद्दक्षिणकर्णयोः ॥ ८३ ॥
नासाद्वये चंद्रवश्री तथाकेवक्रमान्यसेत् ॥ पुष्यांतचपविन्यस्य रु
गीष्वेभ्यालुसन्धे ॥ ८४ ॥ दक्षस्कंधे पप्ज्यास्यात्तु मघांस्कंधे द्विती
यके ॥ त्रपूर्वाफाल्गुणीदक्षकूर्परे कजसंयुतां ॥ ८५ ॥ उत्तराफाल्गुणी
वामकूर्परे विन्यसेत्प्रिये ॥ इत्ते वर्णस्थिताहस्तामणिबंधेदक्षके ॥
८६ ॥ चित्रांटरसाचामेमणिबंधेन्यसेत्प्रिये ॥ डकारणयुतास्वा
तींदक्षहस्तत्रविन्यसेत् ॥ ८७ ॥ ढणयुक्ताविशाखातुवामहस्तेत्रवि
न्यसेत् ॥ तथदरुपालुराधांतुनाभौविन्यस्य पार्वती ॥ ८८ ॥ धकार
णयुताज्येष्ठान्यसेदक्षकटौप्रिये ॥ नपफैस्तुतथामूलंन्यसेद्वामक
टौप्रिये ॥ ८९ ॥ पूर्वाषाढांबकारेणदक्षोरौविन्यसेत्प्रिये ॥ भकारेण
त्तराषाढांवामोरौतदनंतरं ॥ ९० ॥ मकारसंयुक्तश्रवणंदक्षजानुनी
विन्यसेत् ॥ यरस्थितांधनिष्ठांतुवामजानुनीविन्यसेत् ॥ ९१ ॥ लका
रेणततोदेवीशतभिषन्यसेत्प्रिये ॥ दक्षजंघागतां पश्चात्पूर्वाभाद्रप

दांनतः ॥ ९२ ॥ वशवर्णस्थितांन्यसवामजंघागतंक्रमात् ॥ षसहस्थे ॥ त्तरा
भाद्रपदां दक्षिणपादके ॥ ९३ ॥ क्षकारेणततो बिंदुविसर्गान्वितां रेवती ॥
वामपादेप्रविन्यस्यायोगिनीन्यासमाचरेत् ॥ ९४ ॥ शिवाशिवात्मरूपाविधु
च्चित्रार्पीतामचिंतयेत् ॥ चतुर्भुजाः समेवक्त्रे सर्वाभरणभूषिता ॥ ९५ ॥
डाकिनीजहयेन्यालकाउमेळावरयाःप्रिये ॥ वामकर्णेदुनादाख्येडाकिनी
श्रमुद्रस्थिकण्ठ ॥ स्वरांतस्थवक्तव्ये चांतरक्षपदद्वये ॥ त्वग्गतासानंकण्ठ
देशेविशुद्धेविन्यसेत्प्रिये ॥ ९६ ॥ कठवर्णैराकिनीतुरक्ताराध्यसितेक्रमात् ॥
पूर्ववद्धजसंयुक्तैः रक्तगात्मात्रसंवदेत् ॥ ९७ ॥ अनाहतेन्यसेत्पश्चा
हुकाराधिफकारस्थै ॥ लाकिनींचतथादेवींमांसात्मा ॥ मणिपूरके ॥ ९८ ॥
बालव…र्णैः काकिनींतुस्वाधिष्ठानेतथाविधां ॥ मेदस्वरूपां विन्यस्य
वसवर्णस्थसाकिनीं ॥ १०० ॥ अस्थिरूपांचमूलेके बीजनाधारकेन्य
सेत् ॥ हक्षवर्णस्थितांतद्वन्मज्जारूपांप्रियेकोयजेत् ॥ १०१ ॥ स्नुवामेभ्रू
मेहस्थानिहाकिनींहृदिरेकेन्यसेत् ॥ पूर्ववद्धजसंयुक्तांतद्वत्कौलि
कोथयजेत् ॥ १०२ ॥ सर्वधातुगतांदेवींशुक्लवर्णांतुयाकिनीं ॥ ब्रह्मरंध्रेम
हेशानिन्यासोयंयोगिनीयुतः ॥ १०३ ॥ राशीन्यासंततःकुर्यात्सर्वरक्षाकरं

श्रीमद्धा सदा॥रक्तंश्वेतंहरिद्वर्णंपांडुंचित्रासितान्स्मरेत्॥४॥पिशंगपिंगलाव नित्या॥
भ्रुकर्बुरासितधूम्रकान्॥अकारादिचतुष्केणविन्यसेत्करवंदिते॥५॥
३५ मेषंदक्षिणपद्गुल्फतलेहृदेनवृषं॥न्यसेजानुद्वयेदक्षेमिथुनंट
पणेन्नसः॥६॥ह्राभ्यांकर्कटकंकुक्षौह्राभ्यांस्कंधेचसिंहकं॥अनुस्वार
विसर्गाभ्यांशवर्गेणचकन्यकां॥७॥दक्षिणेतुशिरोभागेविन्यसेद्वीरवंदि
ते॥तथावामशिरोभागेकवर्गेणतुलांन्यसेत्॥८॥चवर्गेणतथास्कंधेवृश्चि
कंविन्यसेत्प्रिये॥टवर्गेणतथाकुक्षौधनुस्त्रिनेविन्यसेत्प्रिये॥९॥मक
रंतुतवर्गेणहृत्पार्श्वेविन्यसेत्क्रमात्॥पवर्गेणतथाकुंभंवामजानुनिवि
न्यसेत्॥१०॥यवर्गेणक्षकारेणमीनंगुल्फेथवामके॥अथपीठानि
विन्यस्यत्सर्वतीर्थमयानिहि॥११॥शितासितारुणाश्यामाहरितापीता
न्यनुक्रमात्॥पुनःपुनःक्रमाद्देविपंचवर्णास्त्रीवसंचयः॥१२॥पीठानि ३५
मेसमस्तिह्यन्नसवर्णमातृकयायुतान्॥मातृकार्णैर्न्यसेद्विद्वान्सर्वकामा
र्थसिद्धये॥१३॥कामरूपंतथापीठंपीठंवाराणसीमतः॥नेपालंचतथापौ
डंतथाचैवपौंड्रवर्धनं॥१४॥पुरस्थिरंतथापीठंचंद्रस्थिरंतथापरं॥पूर्णशैले
मर्थांपीठमर्बुदंचततःपरं॥१५॥आम्रातकेश्वरंपीठंएकाम्रंचततः

परं॥त्रिस्रोतःपीठमन्यत्कामकोटंततःपरं॥१६॥कैलासंभृगुकेदारे
पीठंचंद्रपुरंततः॥श्रीपीठंचततोंकारंजालंधरमतःपरं॥१७॥मालवे
चततःपीठंकुलांतंदेवकोटकं॥गोकर्णंचमहापीठंमारुतेश्वरमेवच॥
१८॥अट्टहासंचविरजंराजगेहंमहापथं॥पीठंकोल्लागिरिंश्चैकैमे
लापुरमतःपरं॥१९॥कालेश्वरंमहापीठंमहापीठंजयंतिका॥पिवसु
उज्जयनींचैवचरित्रंक्षीरकाभिदं॥२०॥हस्तिनापुरपीठंचउड्डीशंच
प्रयागकं॥षष्ठीशंचतथापीठंमायापुरंजलेश्वरं॥२१॥मलयंचमहा
पीठंश्रीशैलंमेरुकंगिरिं॥महेंद्रंवामनंचैवहिरण्यपुरमेवच॥२२॥
महालक्ष्मीमयंपीठंमुड्डियाणंततःपरं॥काशीकंमहापीठंछायाछ
त्रमतःपरं॥२३॥पंचाशत्पीठविन्यासंमातृकांविन्यसेत्सदा॥षोढा
न्यासोमहादेव्याःन्यस्त्वासाक्षात्स्वयंशिवः॥२४॥अथकामान्न्यसेद्देवी
दाडिमीकुसुमप्रभान्॥वामांकशक्तिसहितान्पुष्पबाणेक्षुकार्मु
कान्॥२५॥शक्तयःकुंकुमनिभाःसर्वाभरणभूषिताः॥नीलोत्पलकराश्च
यास्त्रैलोक्याकर्षणक्षमाः॥२६॥न्यसेत्कामंरतिप्रश्चात्कामंप्रीतिस
रेश्वरी॥कांतश्चकामिनीयुक्तोभ्रांतोविमोहिनीयुतः॥२७॥कामांगः

कमलेन्द्रहुतकामचारो विलासिनी॥ कर्णकल्पलतेन हुतको मलस्याम
लेतथा॥२८॥ कामवर्द्धनसंयुक्तो विद्योयातु रूक्तिनिर्मिता॥ कामस्वावि
स्मितायुक्तो विशालाक्षी सुतारम॥३०॥ रमणालोलजिह्वायुक्तो रतिना
थदिगंबरे॥ रतिप्रियश्च वामाचरात्रिनाथश्च कुब्जिका॥३१॥ स्मर
पान्वसुता क्षोतारमण: सत्यवा सुत:॥ निशारश्च कल्याणीनंदनो भो
गिनीतथा॥३२॥ नंदक: कामदायुक्तो मदनश्च कलानना॥ कल
वण्यायुक्ता देवी नथा नंदयिता प्रिभु:॥३३॥ निशाचरश्च मादिन्या रति
हंस: स्तनपुरो॥ कलह: श्रीपयायुक्तो पुष्पधन्वाप्यको सिणी॥३४॥
महाधनुश्च रूसुरवा ग्रामणी नेली नियुत:॥ भीमश्च मदनी युक्तो
भ्रामण: शालिनीयुत:॥३५॥ भ्रमण: शिखिनी युक्तो शंतसुगंधनत:
पुरं॥ भ्रामणीरमयायुक्तो म्रसुरमातत:॥३६॥ भात: श्यामरलो
लाच्च श्यामा वहंसरूप चेले॥ मोहनो दीर्घजिह्वा चसौन्वक श्च तथासती॥
३७॥ तथामुग्धश्चलालाक्षी मोहमदनभंगिणी॥ मोहकश्च चपेटा च
मन्मथो नाथयायुत:॥३८॥ मत्तंगमालिनीयुक्तो भंगीयो कश्च हसि
नी॥ गायकेन समायुक्ता तथा वे विश्वतासुरसा॥३९॥ जगदानंदिको

युक्तो गीतश्च तदनंतरे॥ नर्तक: सहरंजिन्या सेवक: कीर्तिसमन्वित:॥
४०॥ उन्मत्त: कलकंठ्यन्व मत्तक श्चटकोत्सरी॥ मधुश्च श्यामान्विता दिविधि
मेलश्रीक्रमालिये॥४१॥ मातृकार्णन्यसेद्देवी मातृकावत्सदानघ॥
अनेन न्यासयोगेन त्रैलोक्ये क्षोभको भवेत्॥४२॥ बालया त्रिपुरया
न्यानवया न्यस्तिकं न्यसेत्॥ श्रीत्रया स्कुलकश्च वशरत्वा समुद्धरीन
सा॥४३॥ अंसद्वयं च हृदयं न्यसेत्कुमारिकाः सिधु॥ जान्वधु पादयुग
पुष्पार्श्वे हस्के लनहृदय॥४४॥ कण्ठ च नवया न्यासं न्यसेद्धा अत्र याम
के॥ पुनर्बालां समुच्चार्य षोडशार्णामथिविन्यसेत्॥४५॥ पुनर्वा स्वास मु
च्चार्य सुरसांन्व स्विमयतु॥ मातृकान्यासयोगेन श्रीचक्रो पुरिविन्यसेत्॥४६॥
मूलन्वक्रमुलच्चादन्त्वशिनिनन्त्वशिरोबिलो॥ नववर्णानानिसकल्पन्यसे
द्वीतत: परे॥४७॥ श्रीविद्यायास्त्वं वेन्च पृष्ठता पुरत: क्रमात्॥ नित्यानि
त्याकृता देवी मातृकाक्षरसंयुता॥४८॥ मातृकावन्न्यसेद्देवी सर्वसौ
भाग्यदायका:॥४९॥ इति श्रीमल्लात्ननार्णवे नित्यातंत्रे श्रीनित्यान्यास
करणविधानं नाम चतुर्दश: पटल:॥१४॥ ईश्वर उवाच॥ शृणु देवि प्रव
क्ष्यामि नित्यामंडलसुन्दरं॥ कामेश्वरी महाविद्या सर्वलोकवशंकरी॥१॥

बालान्तरे च हल्लांते कामेश्वरिपदं लिखेत्॥३॥ छाकामुफल्लांते भ्रूंहस
वैपदं लिखेत्॥४॥ ततः सर्वं वशंकुर्यात्करीसर्वजगत्पदं॥ क्षोभयेत
करुं कुर्याद्धुंकारं त्रितयं लिखेत्॥५॥ पंचवाणान्समालिख्य संहारेण
कुमारिकां॥ धृत्वा कामेश्वरी नित्या प्रसंगात्कथिता द्विज॥६॥ वाग्भ
वं भगशब्दान्तं भुगस्फग्गिनि चालिखेत्॥ भगोदरि भगांते च भगमा
ले भगवहे॥५॥ भगगुह्ये भगश्रांते भगनिश्रांते भगांकित॥ निपाती
नीं च सर्वाणि ततो भगवशंकरि॥६॥ भगरूपं ततो लिख्य नीरजायत
लोचने॥ नित्यक्लिन्ने भगश्रांते स्वरूपं सर्वं चालिखेत्॥७॥ भगानि मे
ह्यानयेति वरदे तिसदा लिखेत्॥ रेते सुरते भगचक्रे क्लिन्ने क्लिन्नद्रवेतः॥
९ ८॥ क्लेदय द्रावय॥ अमोघे सर्वसत्वान् भगेश्वरि॥ अमोघे भगविच्चे च
क्षुभ्य क्षोभय सर्वं च॥ सत्वान् भगेश्वरीं कुर्यात् ... ब्लूं जं मादिमे॥ ब्लूं
मो ब्लूं च हब्लूं हे क्लिन्ने च नमः परं॥१०॥ सर्वाणि च भगान्यंतमवशी चाने ३७
येति च॥ स्त्रीबीजं च हसांतं ब्लें मात्रिकमक्षरं॥११॥ भुवनेशीं समालि
ख्य विद्येयं भगमालिनी॥ प्रसंगात्कथिता पंचचत्वारिंशत् शतानि॥१२॥
पराबीजस्य समुच्चार्य नित्यक्लिन्ने मदद्रवे॥ आद्यं जायान्वितो मंत्रो नित्याक्लि

न्नेयमीरिता॥१३॥ सर्वसौभाग्यदायी च सर्वैश्वर्यप्रदायिनी॥ प्रणवं पूर्व
मुच्चार्य नेत्रांकुशं तुरीं लिखेत्॥१४॥ तन्मध्ये विलिखेद्देवी सरोमात्मि
कमक्षरं॥ चवर्गमंत्यहीनं तु विलिखेद्वह्निसंस्थितं॥१५॥ चतुर्दश स्व
रोपेतं बिंदुनादांकितं पृथक्॥ वह्निजायान्वितो मंत्रो भेरुण्डायाः फ
लप्रदः॥१६॥ भुवनेशीं समुच्चार्य चतुर्थ्यां यां वह्निवासिनी॥ हृदंतायं
मनुर्देवी नित्या वह्निवासिनी॥१७॥ प्रणवं भुवनेशानि फेरमात्मकमक्ष
रं सविसर्गः शशिः पश्चान्नित्यक्लिन्ने मदद्रवे॥१८॥ वह्निजायान्विता
विद्या सर्वैश्वर्यप्रदायिनी॥ महाविद्येश्वरी नित्या प्रसंगात्समुदीरिता॥१९॥
पराबीजं समुच्चार्य शिवदूतिं च ङेयुतां॥ हृदंतायं मनुर्देवी द्वितीयं सर्व
कामदा॥२०॥ ॐकारबीजमुच्चार्य पराकवचमालिखेत्॥ रेखं नाथः
समालिख्य स्त्रीबीजं च समालिखेत्॥२१॥ हुंकारं क्षेपरान्तास्त्रं विद्
येद्वादशाक्षरी॥ त्वरितानाम नित्येयं त्रैलोक्ये सुदुर्लभा॥२२॥ सर्वसिंहास
नमयी बालिकाकुलसुंदरी॥ बालया सहितं कुर्यात्तथावै नित्यभैरवी॥२३॥
पंचबाणाश्च देवेशी नित्या साकाक्षरी भवेत्॥ त्रैलोक्य विमला विद्या
नित्याख्या परमेश्वरी॥२४॥ पंचाक्षरी बाया बीजैर्नित्येयं मम पराश्रियं॥

श्रीमृत्ता प्रणवं भुवनेशानि फरे मात्मकमक्षरं ॥ २५ ॥ स्त्रमामात्मकं द्वितीयं च नित्या
२९ भुवनेश्यं कुरान्ततः ॥ नित्याद्या स्वं समुच्चरा संतु ध्यात्तु मद्द्रवां ॥ २६ ॥
कन्चं चांकुरं पञ्चदश्यै नीलपताकिनी ॥ वांतं काद्य समायुक्तं वह्निवायु युगं ततः ॥ २७ ॥ पृथक्यं च समायुक्तं ततः शक्र स्वरान्वितं ॥
बिंदुनादांकिने बीजं ५ विजयायं नमा दादिनित्यं वंकिनं यामिय ॥ २८ ॥ चेद्दे वायुयमं युक्तं ता रवी जं समालिखेत् ॥ चतुर्थी तु ततादि विविलिखेत्सर्वमंगला ॥ २९ ॥ हृ
दंतायुमतु देवी नित्यं यसर्वमंगला ॥ तारहृद्भगवत्यंते ज्वालामालि
निदे विच ॥ ३० ॥ देव्यु च्चायं च सर्वांतिभूतसंहारकारिके ॥ जातवेदसि
संलिख्य ज्वलंतिपदयुग्मकं ॥ ३१ ॥ ज्वलंति प्रज्वल द्वंद्वं हुंकारं द्विती
यं लिखेत् ॥ वह्निबीजत्रयं फं च स्वाहान्वितां मुदुं ॥ ३२ ॥ ईयं नि
त्यं नित्या महादेवि ज्वालामालिनीका परा ॥ कवर्गालेस्वरांते च शास्त्र
र विलुप्ति ॥ ३३ ॥ बिंदुनादकलाक्रांतं विचित्रा परमेश्वरी ॥ अकारादि २९
षु सर्वेषु स्वरेषु क्रमतो न्यसेत् ॥ ३४ ॥ अः स्वरं पुरमेशानि श्रीविद्यावि
श्वमातृका ॥ स्वरस्व हिन्यसेन्नित्यानि रजायतवांचने ॥ ३५ ॥ प्रकटाद्या
न्यसेत्सम्यग्दाधारादिषु मंत्रवित् ॥ लिपिन्यासं ततः कुर्याच्छ्री विद्या

पीडत्रास्त्वरैः ॥ ३६ ॥ पंचांगुलीषु करयोः अक्षरं प्रेमुखे हृदि ॥ त्रयं विन्यस्य
नाभ्यादिपादांतं चैकमाद्विजे ॥ ३७ ॥ गल्लादिना भिपर्यंतं मपरं हितु तःय
रे ॥ अक्षरं आदिकेवांतं मेकं विन्यस्य पादयोः ॥ ३८ ॥ अंगुलीषु च विन्य
स्यन्यासोयं लिलिकारकः ॥ स्त्रलिन्यासं ततः कुर्यात्सर्वसिद्धिप्रदाय
कं ॥ ३९ ॥ अक्षरं प्रेक्षिक मंत्रस्थानि प्राणाष्टकं ॥ दत्तांतरा ध्वेकं दवि जिह्वा
यां गलके पके ॥ ४० ॥ पृष्ठे सर्वांगहृदयस्तनकुक्षिषु लिंगके ॥ श्रीविद्या पंचमी
सेहं विमंत्रं सर्वसम्पद्य ॥ सर्वांगा विन्यसेत्पश्चात् हृद्रापकत्वेन संदरी ॥ ४१ ॥
प्राणानायम्य विधिवन्मुद्रां संनद्दविग्रहः ॥ संक्षोभद्राविणाकर्षवश्योन्मा
दमहांकुशा ॥ खेचरी बीजरूपा च योनिमुद्रेत्यनुक्रमात् ॥ ४२ ॥ बीजानिव
क्ष्ये क्रमतो मुद्राणां परमेश्वरी ॥ पंचबाणैः पंच मुद्राकरामात्मकमक्षरं ॥ ४३ ॥
आद्यं तु रुद्रमेरव्या बीजं सदाशिवेनतः ॥ ततस्तु वाग्भवं दावि क्रमेण तु च
तुष्टयं ॥ ४४ ॥ चतुर्मुद्रास्तु बीजानि नवमुद्रास्वनुक्रमात् ॥ अथ वक्ष्याम
हस्यानि मुद्रा विवरणं क्रमात् ॥ ४५ ॥ वामहस्तेन मुष्टिं तु बध्वा कर्णप्रदेशके ॥
तर्जनीं सरलां कृत्वा भ्रामयेन्मंत्रवित्तमः ॥ सैषा त्रैपुरी डिनी मुद्रान्यासकाले
तु सन्चिता ॥ अंतरं तु समुत्थाप्य तु निश्शुद्धा जगतीमिमां ॥ ४८ ॥ रिपुजिह्वा

श्रीमह्ल० ग्रहासुद्रांन्यासकालितुसन्निता ॥ पाणिद्वये महेशानि पुरिवर्तनयोगतः ॥ नित्या
४० ॥ योजयित्वा तर्जनीभ्यामनामे धारयेत्प्रिये ॥ मध्यमे योजयेन्मध्ये क
३५ निष्ठे तदधः स्थिता ॥ ४७ ॥ अंगुष्ठमपि संयोज्य त्रिधा युग्मक्रमेण तु ॥
त्रिखंडा नाम मुद्रेयं त्रिपुराह्वानकर्मणि ॥ ४८ ॥ विस्त्रोल्य करौ कृत्वा मध्य
मे मध्यमे कुरु ॥ अंगुष्ठाभ्यां कनिष्ठे च संपीड्य सरले ततः ॥ ४९ ॥ तर्ज
न्यौ दंडवत्कुर्यान्मध्यमस्थे त्वनामिके ॥ सर्वसंक्षोभिणी मुद्रा त्रैलोक्यक्षो
भकारिणी ॥ ५० ॥ मध्यमे तर्जनीयुक्ते सरले स्यात्तदा भवेत् ॥ सर्वविद्राविणी
मुद्रा द्रावयेत्स चराचरं ॥ ५१ ॥ मध्यमा तर्जनी युग्मं वक्रे कृत्वा तु कल्पयेत् ॥
एतस्या एव मुद्राया रूपं चाकर्षणकारिणी ॥ ५२ ॥ विपरीतौ तलौ कृत्वा वामु
ष्टिर्हस्ता न्मुरवायूजेत् ॥ परिवर्तनमार्गेण क्रमेण निबिडाः स्तनः ॥ ५३ ॥ अंगुष्ठौ
वयदेशे तु तर्जन्यावंकुशाकृती ॥ सर्वोपद्रवसंयोज्य सर्ववश्यकरी भवेत् ॥ ५४ ॥
पुटांजलीकरौ कृत्वा मध्यमाग्रे निरीक्षिते ॥ परस्परं कनिष्ठे तु तर्जन्यग्रगते
ततः ॥ ५५ ॥ अनामिके तु सरले मध्यमामुखदेशगे ॥ अंगुष्ठौ परमेशानि
सर्वोन्मादनकारिणी ॥ ५६ ॥ एतस्या एव मुद्राया अनामिके तर्जनीकृमातु ॥ अं
कुशाकाररूपा तु मुद्रेयं तु महांकुश ॥ ५७ ॥ वामभुजं दक्षभुजं दक्षिणं वाम

वामदेशतः ॥ निवेश्य योजयेत्सम्यक् परिवर्त्याक्रमेण हि ॥ ५९ ॥ कनिष्ठा
नामिकायुग्मे तर्जनीभ्यां निरोधयेत् ॥ मध्यमे सरले कृत्वा मोनिवृत्सरलौ
ततः ॥ ६० ॥ अंगुष्ठौ स्तनारमुद्रा प्रविख्यातयोजिता ॥ प्रिये सर्वदेवानां
खेचरत्वप्रदायिनी ॥ ६१ ॥ परिवर्त्यांजलीं कृत्वा कनिष्ठाग्रगते ततः ॥ मध्यमे
स्थापयेद्वा कनिष्ठे धारयेत्ततः ॥ ६२ ॥ अनामिकाभ्यां कुर्वीत तर्जनी मध्य
मायुगं ॥ अंगुष्ठाभ्यां समायोज्य मुद्रेयं बीजमुद्रिका प्रिये ॥ ६३ ॥ बीजमुद्रेयमा
ख्याता सर्वानंदकरी प्रिये ॥ परिवर्त्य करौ सम्यक् तर्जनी वाहनसमं ॥ ६४ ॥
मध्यमे कुरु तन्मध्ये योजयेत्तदनंतरं ॥ अन्योन्यानामिके देवी कनिष्ठे तु मेला
स्थिते ॥ ६५ ॥ अंगुष्ठाभ्यां योजिताभ्यां योन्याकारस्तु योजयेत् ॥ योनिमुद्रा समा
ख्याता परा त्रैलोक्यमातृका ॥ ६६ ॥ एवं विन्यस्य देहे तु मुद्रां संदर्श्य विग्रहः ॥
अंतर्यागविधिं कुर्याद्येन साक्षात्स्वयं विभुः ॥ ६७ ॥ इति श्री मन्त्रनारायणोनि
लातन्त्रे श्रीविद्यान्यासमुद्राविधानं नाम पंचदशः पटलः ॥ १५ ॥ श्रीदे
व्युवाच ॥ अंतर्यागविधिं देव बहिर्यागविधिं तदा ॥ सकलं कथयेशान यथा तत्
त्ववल्लभा ॥ १ ॥ ईश्वर उवाच ॥ शृणु देवी प्रवक्ष्यामि यजनं तोतरं महत् ॥ मूलादि
ब्रह्मरंध्रांतं बिसतंतुतनीयसी ॥ २ ॥ उद्यत्सूर्यसहस्राभा साजात्र विद्युत्कोटिप्र

भामयी॥ चंद्रकोटिप्रभादावाग्नेलोक्यैकप्रभामयी॥३॥ अथोत्पन्नजगदुत्प
त्तिस्थितिसंहारकारिणी॥ ध्यायन्मनो यथा देवी निश्चलं जायते तथा॥४॥
५० सहजानंदसंदोहमंदिरं भवति क्षणात्॥ मनो निश्चलतां प्राप्य शिवशक्ति
प्रभावतः॥५॥ समाधिर्जायते तत्र संप्रज्ञाद्वयविज्ञेयिता॥ स्वयं प्रज्ञातनना
मेकोऽप्यसंप्रज्ञातनामधृक्॥६॥ स्वयं प्रज्ञातसंज्ञस्तु शक्त्याधिक्येन जायते॥
असंप्रज्ञातनामैको शिवाधिक्येन वै भवेत्॥७॥ स्वयं प्रज्ञातभेदस्तु तीव्रः
तीव्रतरो भवेत्॥ असंप्रज्ञातभेदस्तु मंदो मंदतरस्तथा॥८॥ संप्रज्ञा
नयंत्रवेद्यस्वयं प्रज्ञोऽभिधीयते॥ असंप्रज्ञो हि भूयस्तु स्थितः प्रज्ञातिथि
तः॥९॥ प्रज्ञाप्रज्ञानभेदं च समस्तं स्यात्समितिद्वयं॥ संप्रज्ञाद्वयमिदं विशि
वत्तत्वं वैसंवदन्॥१०॥ हास्यरोदनरोमांचकंपस्वेदादिलक्षणः॥ तीव्रस्तीव्र
तरादेवी समाधी रूपलक्षितः॥११॥ निमेषवर्जितं नेत्रे वपुलक्ष्य
स्थिरः॥ मंदो मंदतरादि वि समाधि परिकीर्तितः॥१२॥ शांभवेन च वै ५०
धन्ने खेचरी भूयान्निरंतरं॥ अंतर्यागविधिं कर्त्ता बहिर्यजनमारमेत॥१३॥
एवं विन्यस्य देहं तु सन्नूरवर्मा साधको हमः॥ ध्यायेन्निरामयं वस्तु जग
त्रयविमोहिनी॥१४॥ अशेषव्यवहाराणां स्वामिनी संविदां परा॥ उद्य

त्सूर्यसहस्राभां दाडिमीकुसुमप्रभां॥१५॥ जपाकुसुमसंकाशां पद्म
रागमणिप्रभां॥ स्फुरच्चंद्रानुभां तत्र कांचनाभां स्फुरां॥१६॥ रक्तो
त्पलदलाकारपादपल्लवराजितां॥ अनर्घ्यरत्नखचितमंजीरचरण
द्वयां॥१७॥ पादांगुलीयकक्षिप्तरत्नतेजोविराजितां॥ कदलीलालि
तस्तंभसुकुमारोरुकामलां॥१८॥ नितंबबिंबविलसद्रक्तवस्त्रपरि
ष्कृतां॥ मेखलाबद्धमाणिक्यकिंकिणीनादविभ्रमां॥१९॥ अलक्ष्यम
ध्यमोन्निम्नता त्रिशंतोदरीपुरोगरामराजीलक्ता कृतमेहा कुचफला
न्विता॥२०॥ नवरत्नप्रभाराजद्ग्रैवेयकविभूषणां॥ स्फुरितमृषा मनोर
म्यकपोलस्थलमंडलां॥२१॥ स्फटत निविडाहंगकुचमंडलराजितां॥
अनर्घ्यमौक्तिकस्फारहारभारविराजितां॥२२॥ उद्यदादित्यसंकार
ताटंकसुमुखप्रभां॥ पूर्णचंद्रमुखीपद्मवदनां वरनासिकां॥२३॥ स्फु
रन्मदनकोदंडरुचिरपद्मलोचनां॥ ललाटपट्टसराजद्रत्नाढ्यां तिल
लकांकितां॥२४॥ मुक्तामाणिक्यघटितमुकुटस्थलकिं किरीं॥२५॥
स्फुरच्चंद्रकलाराजन्मुकुटां च त्रिलोचनां॥२६॥ प्रवालवल्लीविव

सद्वंद्वकवल्लीं चतुष्टयं ॥ इक्षुकोदंडपुष्पेषुपाशांकुशाञ्चतुर्भुजां ॥२६॥ सर्व
 देवमयीमंबां सर्वसौभाग्यसुंदरीं ॥ सर्वतीर्थमयीं दिव्यां सर्वकामप्रपूरिणीं ॥
२७॥ सर्वमंत्रमयीं नित्यां सर्वागमविशारदां ॥ सर्वक्षेत्रमयीं विद्यां सर्वविद्याम
यीं शिवां ॥२८॥ सर्वयागमयीं विद्यां सर्वदेवस्वरूपिणीं ॥ सर्वशास्त्रमयीं नित्यां
 सर्वागमनमस्कृतां ॥२९॥ सर्वाम्नायमयीं देवीं सर्वायतनसेवितां ॥ सर्वानंदम
यीं ज्ञानगह्वरां संविदं परां ॥३०॥ एवं ध्यात्वा परामंबां वाहनासापुटक्रमात् ॥
आवाह्य चक्रमध्ये तु मुद्रयाहि त्रिखंडया ॥३१॥ संस्थितां निलयं तत्र श्रीपी
ठेत निवासिनीं ॥ मुद्राः स्वकं संदर्श्य देवतपर्यंकनिधाय तत्व ॥३२॥ लयांग
कल्पयेद्देहे देव्याः स्वकं परमेश्वरी ॥ गंधपुष्पाक्षतादीश्च द्रव्यैः सम्यक् निवेद
येत् ॥३३॥ उपचारैः षोडशभिः संपूज्य परदेवतां ॥ तर्पणानि पुनर्दद्यात्
त्रिवारं मूलविद्यया ॥३४॥ एतस्मिन्समये देवि तिथिनित्याः प्रपूजयेत् ॥ कामे
श्वर्यादिका नित्या विचित्रांताः परमेश्वरी ॥३५॥ अप्रतिपत्पूर्णिमास्यांतं लि
खित्वा तत्र पूजयेत् ॥ त्रिकोणस्य महात्र्यस्रे पूर्वदक्षोत्तरक्रमात् ॥३६॥ रेखा
के विलिखेत्तत्र पंच पंच क्रमेण हि ॥ अकारादीन्वर्णांताश्च दक्षिण्यस्यां विलि

खयेत् ॥३७॥ ततश्च पूर्वरेखायामृकारादिकपंचकं ॥ विलिख्योत्तररेखायां
शक्त्यादींश्च विलिखेत्ततः ॥३८॥ अनुस्वारांतमात्रास्तु विसर्गैः षोडशीय
जेत् ॥ वामावर्तेन देवेशी नित्याः षोडश कीर्तिताः ॥३९॥ प्रतिपत्तिथिमारभ्य
पौर्णिमास्यंतमद्रिजे ॥ एकैकां पूजयेन्नित्यां महासौभाग्यमाप्नुयात् ॥४०॥
शुक्लपक्षे महेशानि पूजयेत्तिथिमंडलं ॥ विचित्राद्याविपरीता ह्यथवा कामेश्वरी
सर्वेत ॥४१॥ पूजनीया विलोमेन कृष्णे तु परमेश्वरी ॥ कलाः षोडशादेवर्णो
यस्तु चंद्रकलाक्रमात् ॥४२॥ महासौभाग्यमहादेवि प्राप्नोति गुरुशासनात् ॥
कामेश्वर्यादिका नित्याः पूजयित्वा क्रमात्ततः ॥४३॥ तिथिनित्यात्रिधादेवि
पूजयद्भाग्यहेतवे ॥ पुनः श्रीत्रिपुरानित्यां यजेत्सौभाग्यहेतवे ॥४४॥ एतस्मि
न्समये देवि गुरुस्तं पूजयेद्बुधः ॥ पुण्यसंकोचयोगेन कथयामि तवानघे ॥४५॥
रश्मिवृंदेन कलिमितं युगे कलेश्शताधिकः ॥ तस्मात्संकोचयेत्पुण्यं मम मितां सि
द्धिदा निदा ॥४६॥ नष्टसंततिवत्तेयामिताः सर्वसमृद्धिदा ॥ पुण्यसंकोचयेन्मो
 ह्यद्दाशेन नष्टसंततिः ॥४७॥ संततानष्टरूपस्वान्न सर्वदेवताप्रियः ॥ अत एव
मया सम्यक् पुण्यं संकुचितं प्रिये ॥४८॥ कामराजाख्यविद्याया गुरवस्तु सम
 द्दिष्टा ॥ मध्यत्राकुलास्त्रमध्ये हीरकरुपंक्तिं त्रिधार्चयेत् ॥४९॥ परारव्यान्प्रपूजये

श्रीमद्गु॰ दौ दो परापरविभक्तिचान्॥ ततो परां स्त्रियाद्देवि गुरून्संपूजयेत्प्रिये॥ नित्या॰
४२ ५०॥ दिव्यौघेतु परा नित्या सप्तसंख्यान् वरानने॥ आनंदनाथः शब्दां
ता गुरवः गुरुवत्प्रिये॥ ५१॥ स्त्रियः परांबा त्वाद्यांता विज्ञेया वीरवंदिते॥
परप्रकाशो देवेशी नित्यः परशिवो मतः॥ ५२॥ परा शक्तिस्तथा देवी कौलेश्व
र इति प्रिये॥ शुक्लदेवी कुलेशानकामेश्वर्यंबिका तथा॥ ५३॥ मुनिसंख्या
स्तु गुरवः पराख्या दिव्यरूपिणः॥ भोगः क्लिन्नः समयो विदाख्यः सहजस्त
था॥ ५४॥ परापराख्या सिद्धौघे मानवौघे शृणु प्रिये॥ गगनो विश्वविमलौ म
दनो भुवनस्तथा॥ ५५॥ लीलास्वात्मा प्रियः पश्चान्नाग संख्यास्तु मानवः॥
अपराः परमेशानि नियता क्षराइमे॥ ५६॥ एतत्त्रयं तु नियतं देशिका
नां हिताय च॥ मया प्रोक्तं महेशानि पुष्पसंकेचितं प्रिये॥ ५७॥ मानवौघां
तिके पश्चात्स्वगुरुत्रितयं यजेत्॥ परमेष्ठिगुरुः पश्चाद्गुरुः परमसंज्ञितः॥
५८॥ स्वगुरुश्च महेशानि पूजयेत्तु गुरुत्रयं॥ अथवा मानवौघांते [illegible] स्वगु ४२
रूनर्चयेत्॥ ५९॥ अयं प्रकारः कथितः प्रकारांतरमुच्यते॥ वदेत्सर्वप्रकारा
णां मानवौघाष्टकादिकं॥ ६०॥ गुरवो नव संख्याकाः [illegible] तिहि॥
नवचक्रेश्वरी यस्मात्तस्मात्पुष्पप्रकाराइत॥ ६१॥ मानवौघ तथा द

वीदृशास्सप्तभुवंतिहि॥ पश्चात्संकेतयेत्पुष्पं नवमं श्रीगुरुं यजेत्॥ ६२॥
अज्ञान गुरुशिष्याणां कथयामि वरानने॥ गुरुस्थाने समुच्चार्य पादुकां भो
नमो लिखेत्॥ ६३॥ गुर्वंते परमांतिच गुरुस्थाने महत्स्यपि॥ एषां तु पादुकास्त
द्वदाचार्येभ्यो नमो वदेत्॥ ६४॥ आत्मादि पादुकास्त्विद्धस्तु वै सिद्धास्तु पादुकाः॥
सामान्यगुरुशिष्याणां गुरुपंक्तिरियं भवेत्॥ ६५॥ गुरुपंक्ति प्रपूज्या स्वयं
श्रीत्रिपुरा भवेत्॥ गुरुपंक्तिविहीनस्तु पुरुषः पंक्तिवर्जितः॥ ६६॥ सामान्य
गुरुपंक्तित्वान भवेत्पंक्तिवर्जितः॥ पुष्पसंकेचनमार्गोयं मया सिद्धः कृतः
प्रिये॥ ६७॥ कृपया परमेशानि साधकानां हिताय च॥ कामराजाख्यगुरवः
श्रीविद्या विषये क्रमात्॥ ६८॥ लोपामुद्राख्य विद्यायां गुरून् शृणु वरानने॥
परमाद्यः शिवश्चाद्याः कामेश्वर्यंबिका तथा॥ ६९॥ दिव्यौघाश्च महौघाश्च
सर्वानंदः स्ततः परं॥ प्रज्ञादेव्यंबिका पश्चात्प्रकाशः सत्त्वमाभवेत्॥ ७०॥ दि
व्याः पराख्यगुरवो लोपामुद्राः शुभानना॥ दिव्यश्चित्र्यकके वल्पदेव्येवान्च महो
दयः॥ ७१॥ सिद्धाः परापरा ज्ञेया मानवौघं शृणु प्रिये॥ विद्या शक्तिश्च विश्वश्च
चतुर्थः कमलाभवेत्॥ ७२॥ पञ्चमस्तु परानंदो मनोहर इति प्रिये॥ स्वात्मानंदः
सप्तमस्तु प्रतिभाः सम समुच्यते॥ ७३॥ अपराख्या इमे देवि गुरवः परिकीर्तिताः॥

श्रीमन्त्रा० पूर्ववत्पूजयेत्पश्चाद्दस्रानंतरमेव च ॥ ७४ ॥ नयेद्वा सद्गुरुं वापि नवातं वा कुले नित्या०
चेन्नो ॥ दक्षिणामूर्तिशिष्याणां गुरुक्रममुदाहृतः ॥ ७५ ॥ संप्रदायाज्ञानका
४२ श्च ज्ञातव्यास्वगुरुक्रमात् ॥ संप्रदायविहीनस्य न ह्यात्सं किमुत्तमां ॥ ७६ ॥
साधारणात्मका गुरवः सर्वे भेदसुवे समाः ॥ गुरुक्रमं प्रपूज्याथ यजेदाम्नाय
देवताः ॥ ७७ ॥ त्रैलोक्यमोहने देवी सर्वाशापरिपूरके ॥ सर्वसंक्षोभणे चक्रे
पूर्वाम्नायं प्रपूजयेत् ॥ ७८ ॥ सर्वसौभाग्यदे चक्रे तथा सर्वार्थसाधके ॥ सर्व
रक्षाकरे चक्रे दक्षिणाम्नायं प्रपूजयेत् ॥ ७९ ॥ मध्यचक्रत्रये देवी पश्चिमा
म्नायमर्चयेत् ॥ नवचक्रे पूर्ववेशिके कौबेराम्नायमर्चयेत् ॥ ८० ॥ बिंदवेपर
मेशानि मध्यासिंहासनं यजेत् ॥ अनेनैव प्रकारेण पूजयेत्संचपंक्तिको ॥
८१ ॥ श्रीविद्या च परं ज्योतिः परा निष्कलरूपिणी ॥ अजपा मातृका चेति
पंचकोशाः प्रकीर्तिताः ॥ ८२ ॥ श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्तथैव च ॥
त्रिशक्तिः सर्वसाम्राज्या पंचलक्ष्म्यः प्रकीर्तिताः ॥ ८३ ॥ श्रीविद्या त्वरिता ४२
चैव पारिजातेश्वरी तथा ॥ त्रिपुटा पंचबाणेशी पंचकल्पलता स्मृता ॥
८४ ॥ श्रीविद्यामृतपीठेशी सुधाश्रीरमृतेश्वरी ॥ अन्नपूर्णेति विख्याता ए
चैताः कामधेनवः ॥ ८५ ॥ श्रीविद्या सिद्धलक्ष्मीश्च मातंगी भुवनेश्वरी ॥

वाराही ति च संप्रोक्ता पंचरत्ना प्रकीर्तिताः ॥ ८६ ॥ श्रीविद्यापूजनस्थाने
चक्रराजे महेश्वरी ॥ महाकोशेश्वरी ह्येवं मंडितासनसंस्थिता ॥ ८७ ॥ स
र्वसौभाग्यजननी पादुकां पूजयामि च ॥ इत्याम्नाय परज्योतिः कोशपा
ज यैत्क्रमधीः ॥ अनेनैव प्रकारेण पूजयेत्संचपंचिका ॥ ॥ षोडदर्शनं देवि बंद
चै पूजयेत्प्रिये ॥ ८८ ॥ परितो दर्शनं शाक्ते चक्रस्य परमेश्वरि ॥ ब्राह्मयेतु दर्श
नं पूज्यं भूबिंबे प्रथमे प्रिये ॥ ८९ ॥ शिवस्य वामतो देवि वैष्णवं दर्शनं यजेत् ॥
स्रष्टिचक्रे भवेत्सूर्यदर्शनं कमलेक्षणे ॥ ९० ॥ त्रिकोणे च क्रमेण संपूज्यं बौद्धद
र्शनमुत्तमं ॥ एवं संपूज्य सकलं श्रीविद्यापरितोषयेत् ॥ ९१ ॥ तर्पणानि पुन
र्देयात्त्रिवारं तत्त्वमुद्रया ॥ अंगुष्ठानामिकायोगात्तु तत्त्वमुद्रेयमीरिता ॥ ९२ ॥
पुष्पं समर्पयेद्देवि मुद्रया ज्ञानसंज्ञया ॥ अंगुष्ठतर्जनीयोगाज्ज्ञानमुद्राप्र
तिष्ठिता ॥ ९३ ॥ सर्वोपचारैराराध्य मुद्राः संदर्शयेत्क्रमात् ॥ अथागाव
यो ह्रिविद्यामनुं स्मरेत् ॥ ९४ ॥ अग्निरास्करवाय्वयं मध्ये दिक्षु गपूजनं ॥ माया
लक्ष्मीमयं बीजयुग्मं पूर्वक्रमेण तु ॥ ९५ ॥ कथितं बीजयुग्मं हि त्रयं वा परमेश्वरि ॥
संपुटक्रमयोगेन मध्यवाविरवादितं ॥ ९६ ॥ संयोज्य पूजयेत्सर्वान्क्रमाद्देववरान
ने ॥ त्रैलोक्यमोहने चक्रे प्रकटा योगिनीर्यजेत् ॥ ९७ ॥ चतुरस्रे चतुर्द्वारे

क्षितीसिद्धिर्दायिका॥९॥अणिमापश्चिमद्वारेदक्षभागेप्रपूजयेत्॥११॥लघि
मासुत्तरद्वारेदक्षभागेप्रपूजयेत्॥पूर्वद्वारेतुमहिमामुत्तरेप्रपूजयेत्प्रिये॥१२॥
ईशित्वसिद्धिर्देवेशीदक्षिणद्वारेपूर्ववत्॥वशित्वसिद्धिर्वायव्यांतुनैर्ऋ
मतीयजेत्॥१३॥प्राकाम्यसिद्धिमीशानेनैर्ऋतेमनायजेत्॥१४॥भुक्तिसिद्धि
स्तथाग्नेयेतेनैर्ऋतेमृयोगतः॥१५॥इच्छासिद्धिःपूर्वभागेनैर्ऋत्येचप्रपूजये
त्॥प्राप्तिसिद्धिःसर्वकामासिद्धिश्चपरमेश्वरी॥१६॥अथाध्वेत्रमरूपण्या
ज्ञातव्याःस्करस्कंदरि॥ब्राह्मीमाहेश्वरीचैंद्रीकौमारीवैष्णवीतथा॥१७॥
वाराहीचतथाषष्ठीचामुंडासप्तमीनरा॥अष्टमीतुमहालक्ष्मीःपश्चि
मादिक्रमेणहि॥१८॥वामभागेतुसंपूज्यावायव्यादिचपूर्ववत्॥संक्षोभि
द्राविणाकर्षिवश्योन्मादमहांकुशा॥१९॥खेचरीबीजयोन्याख्यात्रिखंडा
चैवपूजयेत्॥एताःसंपूज्यचक्रेशींत्रिपुरांपूजयेत्परां॥२०॥अणिमासि
द्धिपुरतःसर्वकार्यार्थसाधिनी॥सर्वसंक्षोभिणीमुद्रांदर्शयेत्कमलानने॥ ४४
२१॥सर्वाशापूरकेचक्रेगुप्तयोगिन्यधिष्ठितं॥षोडशारंततोदेविपूजयेत्का
र्यसिद्धये॥२२॥कामाकर्षिणिकादेविबुद्ध्याकर्षिणिकातथा॥अहंकारा
कर्षिणीचैवशब्दाकर्षिणिरूपिणी॥२३॥स्पर्शाकर्षिणिरूपाचरूपाकर्षि

णिरूपिणी॥रसाकर्षिणिकारीचगंधाकर्षिणिकारिणी॥२४॥चित्ताक
र्षिणिकातद्वद्धैर्याकर्षिणिकाप्रिये॥नामाकर्षिणिकाचैवबीजाकर्षिणि
कातथा॥२५॥अमृताकर्षिणीचैवस्मृत्याकर्षिणिकाप्रिये॥शरीराकर्षि
णीचैवआत्माकर्षिणिरूपिणी॥२६॥पश्चिमादिक्रमेणषोडशारेस्व
रान्विताः॥एतानित्याःकलाःपूज्याश्चवतिगुप्तमंडलाः॥२७॥चक्रेश्वरीं
यजेद्देवींत्रिपुरेशींसमृद्धिदां॥कामाकर्षिणिरूपायाःपुरतःपूजयेत्प्रिये॥
२८॥सर्वविद्राविणीमुद्रांदर्शयित्वानिवेदयेत्॥सर्वसंक्षोभणेचक्रे
गुप्ततरामिधा॥२९॥अनंगकुसुमाप्राच्यांकवर्गेणप्रपूजयेत्॥दक्षि
णेचवर्गेणतथाचानंगमेखला॥३०॥अनंगमदनापश्चाट्टवर्गेणतुप
श्चिमे॥तवर्गेणोत्तरःपश्चादनंगमदनातुरा॥३१॥अनंगरेखवामाप्र
यपवर्गेणप्रपूजयेत्॥राक्षसेनंगवेगांतुयवर्गेणप्रपूजयेत्॥३२॥वाय
व्यांतुशवर्गेणतथानंगांकुशं॥यजेत्॥ईशान्येलक्षवर्गेणपूज्यानंगमादिमा
लिनी॥३३॥चक्रेश्वरींयजेद्देवींततःस्त्रिपुरसुंदरीं॥अनंगकुसुमा
चसर्वसौभाग्यदायिनी॥३४॥सर्वाकर्षिणिमुद्रांचदर्शयेत्करवंदिते॥
चक्रपूजांनिवेद्याथचतुर्थंचक्रमर्चयेत्॥३५॥सर्वसंक्षोभिणीशक्तिः॥

श्रीमस्त्रा० र्वविद्राविणी तथा ॥ सर्वाकर्षिणीका शक्तिः सर्वाह्लादनकारिणी ॥ २३ ॥ सर्व नित्या०
४५ संमोहिनी शक्तिः सर्वस्तंभनकारिणी ॥ सर्वजृंभिणिका शक्तिः सर्ववश
करी तथा ॥ २४ ॥ सर्वरंजिनिका शक्तिः नवमी परमेश्वरि ॥ सर्वोन्मादनिका
शक्तिः शक्तिः सर्वार्थसाधिका ॥ २५ ॥ सर्वसंपत्तिपूर्णा च सर्वमंत्रमयी तथा ॥
चतुर्दशस्वशक्तिस्तु सर्वद्वंद्वक्षयंकरि ॥ २६ ॥ सर्वसौभाग्यदे चक्रे पश्चिमा
दिविलोमतः ॥ वाममार्गेण देवेशि संपूज्याः सर्वसिद्धिदाः ॥ २७ ॥ सर्वसंक्षो
भिणी शक्तिः पुरतः पूजयेत्ततः ॥ चक्रे स्वामिनि सिद्धिदा श्रीपरा त्रिपुरवासि
नी ॥ २८ ॥ वश्यमुद्रां प्रदर्श्याथ निवेद्य तदनंतरं ॥ सर्वार्थसाधके चक्रे दशारे
कुलयोगिनीः ॥ २९ ॥ पूजयेत्सर्वकार्यार्थसिद्धिदाः पंचमे क्रमात् ॥ सर्वसि
द्धिप्रदा देवि सर्वसंपत्प्रदा तथा ॥ ३० ॥ सर्वप्रियंकरी देवि सर्वमंगलकारि
णी ॥ सर्वकामप्रपूरिण्यः सर्वदुःखविमोचनी ॥ ३१ ॥ सर्वमृत्युप्रशमनी सर्व
विघ्ननिवारिणी ॥ सर्वांगसुंदरी देवि सर्वसौभाग्यदायिनी ॥ ३२ ॥ पश्चिमादि
विलोमेन दशारे पूजयेत्प्रिये ॥ सर्वसिद्धिप्रदा देवी पुरतः क्रमनायका ॥ ४५
३३ ॥ सर्वसिद्धिप्रदा देवी पूजयेत्त्रिपुराश्रियं ॥ सर्वोन्मादनमुद्रां च दर्शयि
त्वा निवेद्य च ॥ ३४ ॥ सर्वरक्षाकरे चक्रे निगर्भयोगिनीर्यजेत् ॥ सर्वज्ञा सर्व

सर्वशक्तिश्च सर्वैश्वर्यप्रदा ततः ॥ ३५ ॥ सर्वज्ञानमयी देवी सर्वव्याधिविना
शिनी ॥ सर्वाधारस्वरूपा च सर्वपापहरा तथा ॥ ३६ ॥ सर्वानंदमयी देवि सर्
वरक्षास्वरूपिणी ॥ सर्वेप्सितार्थफलदा देव्यः सर्वसमृद्धिदाः ॥ ३७ ॥ प
श्चिमादिविलोमेन पूजयेत्सिद्धिनायिकां ॥ सर्वज्ञा पुरतो देवि चक्रेशी मा
लिनी यजेत् ॥ ३८ ॥ महांकुशां महामुद्रां दर्शयित्वा निवेद्य च ॥ मध्यचक्रे
महारोगनिर्योगिनीः पूजयेत्प्रिये ॥ ३९ ॥ सर्वरोगहरे चक्रे वसुकोणे सुरेश्वरि ॥
रहस्ययोगिनीर्देवी वशिन्याद्याः सुसिद्धिदाः ॥ ४० ॥ पश्चिमादिविलोमेन पू
जिताः पूजयेत्क्रमात् ॥ वशिनीपुरतः पूज्या सिद्धांबा चक्रनायिका ॥ ४१ ॥ खे
चरीं दर्शयेन्मुद्रां निवेद्यानंतरं ततः ॥ सर्वसिद्धिप्रदे चक्रे त्रिकोणे सर्वका
मदे ॥ ४२ ॥ परापररहस्याख्या योगिनीः परिपूजयेत् ॥ पंचबाणान्समुच्च
येकामकामेश्वरीमयान् ॥ ४३ ॥ जंभनाख्यान्महेशानि पूजयेत्बाणदेवताः ॥
धमात्मकं कामचापं द्वितीयं तु धमात्मकं ॥ ४४ ॥ कामेश्वर्या मोहनाख्यां पूज
४६ येच्चापदेवतां ॥ द्वितीयं भुवनेशानि पाशं तु रमेव शांत ॥ ४५ ॥ कामेशस्यका
मेश्याः स्तंभनाख्यांकुशं प्रिये ॥ अंकुशस्त्र्यंकरोमास्सबीजं तं मनसं स्मृते ॥
श्रीमस्त्रा० ४६ ॥ कामेशस्य कामेश्या अंकुशं पूजयेत्प्रिये ॥ षडंगावरणाद्बाह्ये समीपतः

श्रीमद्ग्र॰ मनोयजेत्॥४७॥पृथ्व्यादिक्रमेणैव चतुर्दिक्षु प्रपूजयेत्॥कामेश्व नित्या॰
४६ रीं रुद्रशक्तिमाद्यकूटेन चार्चयेत्॥४८॥द्वितीयेन च कूटेन कामाख्येन च
वैष्णवीं॥दक्षकोणे समभ्यर्च्य तृतीयेन च पूजयेत्॥४९॥भगमालां तु
त्तरशक्तिं सुत्तरे विश्वमातृकां॥चक्रेश्वरीमंबिकाख्यां कामेश्वरीं तु रेताय
जेत्॥५०॥बीजमुद्रास्तु पश्चाच्च चक्रपूजां निवेदयेत्॥सर्वानंदमये चक्र
राजे बैंदवसंज्ञिके॥५१॥ब्रह्मरूपां चित्स्वरूपे संविद्विचेष्टसुप्रियं॥पर
परस्य ह स्याख्यां योगिनीं त्रिपुरां यजेत्॥५२॥कूटत्रयसमुच्चार्य श्रीविद्यां च
स्वरूपकं॥समस्तदेवतारूपं सर्वं चक्रमयं यजेत्॥५३॥चक्रेशीमपि
तामेव महात्रिपुरसुंदरीं॥श्रीविद्यां षोडशार्णां च भुक्तिमुक्तिफलप्रदां॥
५४॥समस्तचक्रचक्रेशीं सर्वाराधनरूपतां॥सर्वाम्नायेश्वरीं विद्यालं
कृतां ब्रह्मरूपिणीं॥५५॥उपचारैः समभ्यर्च्य गंधपुष्पाक्षतादिभिः॥त
र्पणानि पुनर्दद्यात् त्रिवारं मूलविद्यया॥५६॥योनिमुद्रां प्रदर्श्याथ मुद्राः ४६
संदर्शयेत्क्रमात्॥वनस्पतिरसोत्पन्नैः पवित्रैः श्वान्यगंधिभिः॥५७॥
दशांगगंधधूपं च धूपयेत्परमेश्वरीं॥कस्तूरिं कुंकुमं देवि गुरुगुल्मेश
त्वसंभवं॥५८॥चंदनागरुकर्पूरशिताज्यमधुसंयुतं॥धूपयेद्देशिको नि

त्यं सर्वसौभाग्यसिद्धये॥५९॥धूपमंत्रेण देवेशि गौत्रैलोक्यस्यापि दुर्लभं॥
अमितां विदिकां चक्रे दीपमालां घृतप्लुताः॥६०॥कर्पूररचितास्यापि
तैलपूर्णस्त्वकवा यजेत्॥धूपदीपौ निवेद्याथ तर्पयेत्पूर्ववत्प्रिये॥६१॥आ
रार्तिकविधिं कुर्यात्पूर्ववद्देववंदिते॥अन्यद्वारार्तिकं वक्ष्ये सर्वकामप्रपूरकं॥
६२॥स्वर्णादिनिर्मिते पात्रमध्ये चक्रे लिखेद्बुधाः॥अतिसुंदरनं कला
नवधा कारयेत्ततः॥६३॥नवगोलाः श्वेतरूपाः विरच्य तदनंतरं॥शर्क
रां घृतसंयुतां मंडकान्युग्मरूपकान्॥६४॥विरच्य वटिकाः कार्या
ज्वलितास्तु सप्तकं॥सप्तसप्तप्रकारेण वटिका नव योजयेत्॥६५॥आम्रको
णेषु संस्थाप्य गोलकाश्च परिक्षिपेत्॥चणमुद्गविकाराश्च दीपकान् ए
तपाचितान्॥६६॥मुष्टिकाकृतमुष्टिश्च स्थापयेत्तत्र तत्र तु॥दीपान् प्र
ज्वाल्य पश्चात्तु पंचरत्नैः प्रपूजयेत्॥६७॥पंचसिंहासनगता विद्यास्त
त्र प्रपूजयेत्॥आमस्तके समुत्क्षिप्य नववारं पुनः पुनः॥६८॥नवावरण
देवीनां परितो भ्रामयेत्पुनः पुनः॥ततो निर्वर्तयेत्पश्चाद्दीपमालामयं महत्॥
६९॥नेत्रयोः स्कंधयोश्चैव रंध्रायद्वारात्रिकविधिः प्रिये॥नैवेद्यं षड्रसोपेतं सी
ताख्यपादिसंयुते॥७०॥शर्करापूरसरितं मंडकैः पायसान्वितं॥मुक्ताक्

पूर्णं घृतं शुद्धोदनस्य पूरितं ॥ ७१ ॥ घृतकर्पूरशोभाढ्यं संपूर्णं घृतमं
डितं ॥ नानाव्यंजनशोभाढ्यं वटकैः कुंकुमप्रभैः ॥ ७२ ॥ मांसैर्नानावि
धैर्नानारसपानविराजितं ॥ घृतक्षीरेण भरितं चतुर्मुद्राविराजितं ॥
७३ ॥ संकल्प्य परमेशान्यै नित्यहोमविधिं चरेत् ॥ मूलेन प्राणसहिता
आहुतीः पंच होमयेत् ॥ ७४ ॥ षडाहुति षडंगानां नित्यहोमः प्रकी
र्तितः ॥ उपविश्यासने रम्ये वामभागे ततः परे ॥ ७५ ॥ बहिः कुर्यात्पु
टतः साधको भूमिजानुकः ॥ मंडलं चतुरस्रं तु तन्मध्ये विलिखेत्प्रि
ये ॥ ७६ ॥ त्रिकोणमध्ये व्योमाख्यं मंडलं पूजयेत्ततः ॥ व्यापकोत्तमंड
लायहृदंतो वाग्भवं परे ॥ ७७ ॥ मुखं कृत्वा पूजनीयं मंडलं मनुना प्रिये ॥
एतन्मंडलमभ्यर्च्य मंडलानां चतुष्टयं ॥ ७८ ॥ ईशानवह्निनैरृत्यवा
युकोणेषु पूर्ववत् ॥ मंडलानि विधायाथ पूर्ववत्पूजयेत्प्रिये ॥ ७९ ॥ पू
र्ववद्बलिदानं च दद्यात्सर्वसमृद्धये ॥ वटुकाय महेशानि योगिनीभ्यश्च
वल्लभे ॥ ८० ॥ क्षेत्रपालगणेशाभ्यां पूर्ववद्बलिमुत्सृजेत् ॥ वामभागे
तस्याद्यमंडलस्योपरि क्षिपेत् ॥ ८१ ॥ आधारं पूजयेत्तत्र पात्रं चान्नेन
कान्वितं ॥ सकारेण मंत्रयित्वा सर्वभूतबलिं हरेत् ॥ ८२ ॥ पंचषाणेन

मनुना त्रिवारं वीरवंदिते ॥ तारं च भुवनेशानी सर्वविघ्नपदं ततः ॥ ८३ ॥
कृद्धध्वसर्वभूतेभ्यो हुंकारं वह्निवल्लभां ॥ समुच्चरन्बलिं दद्यात्सुद
यात्तत्त्वसंज्ञया ॥ ८४ ॥ बलिपंचकमाख्यातं सर्वरक्षाकरं सतां ॥ एकत्र वा
पंचबलिं दद्याद्व्यापकमंडले ॥ ८५ ॥ वामभागे स्थिता देवि सर्वविघ्नहरा भ
वेत् ॥ चक्रमभ्यर्च्य सकलं विधिवत्परमेश्वरी ॥ ८६ ॥ श्रीगुरोः कृपया देवी
सर्वज्ञः सर्वतत्त्ववित् ॥ ८७ ॥ ॥ इति श्रीमत्तत्त्वार्णवे नित्यातंत्रे उमामहे
श्वरसंवादे श्रीविद्यायजनविधिर्नाम षोडशः पटलः ॥ १६ ॥ श्रीदेव्युवाच ॥
देवदेव महादेव भक्तकृतार्थ महेश्वर षोडशाक्षरविद्यायाः श्रीचक्रविधिमु
त्तमं ॥ १ ॥ जपादिकं च यत्सर्वं मे कैकाक्षरसाधनं ॥ कथयस्व महेशान यद्य
हं तव वल्लभा ॥ २ ॥ ईश्वर उवाच ॥ शृणु सर्वांगसुभगे श्रीविद्याविधिमुत्तमं ॥
यस्य विज्ञानमात्रेण कृतार्थो हि त्रिविधेयं विभुः ॥ ३ ॥ अनेन विधिना यत्र श्रीच
क्रक्रमसंयुतं ॥ पूज्यते तत्र सकलं वशी कुर्यान्न संशयः ॥ ४ ॥ नगरं वशमाया
ति दशामंडलमंडिते ॥ योषितः सकला वश्या ज्वलत्कामाग्निपीडिताः ॥ ५ ॥
विद्यादिस्वहृदया साधकान्यस्तमानसः ॥ सहस्रेनेंद्रवेषि जायते सर्वयो
षितः ॥ ६ ॥ अस्य माहात्म्यं समाश्रित्य मातृकावर्णरूपिणी ॥ अयमुक्तो फलम

फल

श्रीमत्ता॰ श्रीवाञ्छासौदायिनी॥७॥ सर्वसिद्धिप्रदानित्यं सर्वराजवशंकरी॥ यथानुक्त नित्या॰
५९ फलमप्येनथास्फाटिकनिर्मिता॥८॥ रुद्राक्षमालिका मोक्षसर्वसंपत्स
मृद्धिदा॥ प्रवालमाला वश्येतु सर्वकार्यार्थसाधिका॥९॥ माणिक्यमाला
फलदा साम्राज्यारोग्यदायिनी॥ पुत्रजीविकमाला तु विद्यालक्ष्मीप्रदा स
ता॥१०॥ पद्माक्षमालया लक्ष्मीर्जायते महतीपरा॥ रक्तचंदनमाला तु सर्व
भोगप्रदायिनी॥११॥ अक्षमालां प्रकुर्याद्वै चंदनेन विलेपितां॥ समाश्रित्य
जपेद्विद्यां लक्षमात्रं तथा बुधः॥१२॥ यावत्तावत्क्रमेणैव मनस्तस्य सुनिश्च
लं॥ तदा द्वितीयलक्षंतु प्रजपेत्साधकोत्तमः॥१३॥ पातालतलनागेंद्रकन्य
कास्तोभयंतिते॥ तासां कटाक्षजालैस्तु न मोहं याति साधकः॥१४॥ तदाल
क्षत्रयं कुर्यात्साधकः स्थिरमानसः॥ तृतीयलक्षसंप्राप्ते द्रावयंत्येसुरांगनाः॥१५॥
अभिमानेन सौंदर्यात्सौभाग्यमदकारणः॥ साधकं द्रावयंत्येव ततः सोम
नसस्थिरः॥१६॥ तदालक्षत्रयं साधु सर्वपापनिकृंतनं॥ एवं लक्षत्रयं ज
स्वा व्रतस्थः स्वस्थमानसः॥१७॥ संक्षोभयंति भूर्लोकस्वर्लोकतलवासिनः॥ ५९
पुरुषायोषितो वश्याश्चराचरमपि प्रिये॥१८॥ गोरोचनादिभिर्द्रव्यैश्चक्ररा
जं समालिखेत्॥ अतीव सुंदरं रम्यं तन्मध्ये प्रतिमां वरां॥१९॥ ज्वलंतीम्ना

मसहितां मुद्रावीजविदर्भितां॥ चिंतयेत्तु ततो देवि योजनानां सहस्रतः॥२०॥
अदृश्यं वा द्वेवरीकृतमात्रापि दुर्लभे॥ राजकन्या ध्रुवा चाविर्भयलज्जाविव
र्जिता॥२१॥ आयाति साधकं सम्यक् मंत्रमूर्द्धासनिष्प्रिये॥ चक्रमध्यगतां मूर्त्वा
साधकः श्चिंतयेत्पदा॥२२॥ वर्यत्तस्य सहस्राणि मात्मानमरुणं तथा॥ साध्यमप्य
रुणीभूतं कृत्वा सेवजपेद्बुधः॥२३॥ अनेन क्रमयोगेन स्वयं कंदर्परूपवान्॥ स
र्वसौंदर्यसंभोगः कामिनीवल्लभो भवेत्॥२४॥ सर्वलोकेषु सुभगः सर्वलोकव
शंकरः॥ सर्वरक्षापचारस्य मुद्रासंनद्धविग्रहः॥२५॥ चक्रमध्यगतस्य
स्यनाम विदर्भितं॥ संभवेद्दासवद्विघ्नाद्यावापि भूपतिः॥२६॥ चक्रमध्य
गतं कुर्यान्नामयस्यास्तुयोषितः॥ अदृष्टायामहेशानियोनिमुद्राधरा बुधः॥२७॥
हठाद्वानयते नरीं प्रयक्षिणीं राजकन्यकां॥ नागकन्यामप्सरं वा खेचरीं वासु
रांगनां॥२८॥ विद्याधरीं दिव्यरूपां मुनिकन्यां सुरस्त्रियं॥ मदनोद्भव
संतापां स्फुरज्जघनमंडलां॥२९॥ कामबाणैः प्रभिन्नांगीः करुणालोल
चक्षुषां॥ महाकामकलाध्याने योगान्तु स्फुरद्वदिते॥३०॥ क्षोभयेत्स्वर्गम
र्त्यलोकपातालतलयोषितः॥ रोचनाभागमेकं तु भागमेकं तु कुंकुमं॥३१॥
अर्धभागं हयोर्द्वे किंचिच्चंदनं मर्दयेत्समं॥ एकत्र तिलकं कुर्यात्त्रैलोक्यवशंकरं
प्रिये॥३२॥ अखेशांतरशाताहत्या मंत्रयित्वा वशं नयेत्॥ राजानं नगरं वा

श्रीमह्वा० मंत्रेण यद्यदुदृश्यते ।।३३।। मंत्रिणा परमेश ।। निलसर्वं तद्वश्यं गं ।। तां नित्या०
४८।। मूलधूपमुदकेपत्रेपुष्पे फले दपि ।।३४।। दुग्ध घृते चूर्णमन्नेपवस्त्रे कर्पूरके
वचा ।। कस्तूरी पुरुष्णु चेकालवंग जातिपत्रके ।।३५।। फले वा वस्त्रके यद्
तु सकलं परमेश्वरि ।। शालमंत्रेतस्मै स्वाय स्त्रैक मैत्र प्रकृति ।।३६।। सर्वश्या
जायते देवी नात्र कार्या विचारणा ।। स्त्रियस्तु सकला वश्या दासीभूता भवं
ति हि ।।३७।। अगत्स्य रूपेण मे तत्तु कथितं नान्यथा भवेत् ।। रहस्य खानं कर्म
श्रीलिखेद्रोचनया सुधि ।।३८।। चारुशृंगारवेषाढ्या सर्वाभरणभूषिता ।।
प्रतिमा कंदर्परंगी तां विलिख्य कमनोहरं ।।३९।। लल्लाल कंठहन्नाभि ज
न्ममेढ्लयो जिता ।। जन्मनाम महाविद्यां मकुरांत विदर्भितां ।।४०।। सर्वसं
धिषु देहस्य मदनाक्षरमालिखेत् ।। लोमदाउं मपुष्याभं चिंतयेद्देहसंधि
षु ।।४१।। तदा श्रागतिसुरेखां भूत्वा स्वयं देविस्वरूपकः ।। मुद्रांतुक्षोभिणीं बध्वा
मंत्रमष्टशतं जपेत् ।।४२।। नियोज्यदहनागारे चंद्रसूर्यकलात्मके ।। ततो वि ४७
कलसर्वांगी कामबाणैः प्रपीडिता ।।४३।। जननन्यमानेसां क्षेमभ्रममाणां
मदालसां ।। एवमाकर्षयेन्नारीं योजनानां शतादपि ।।४४।। मातृकां विलि
खेच्चक्रेबाह्यतः सकलं प्रिये ।। भूर्जपत्रे स्वर्णपत्रे रौप्यपत्रेथ ताम्रके ।।४५।।

अवध्यः सर्वमंत्राणां व्याघ्रादीनां विशेषतः ।। तथैव मातृका युक्तः स्व
संस्तां मंत्रमंडितः ।।४६।। कर्पूरकुंकुमाद्यैस्तु अजरामरतां व्रजेत् ।। त्र
नेन विधिना देवि रोचनागरुकुंकुमैः ।।४७।। विलिखेच्चक्रयोगेन
साध्यनामवरानने ।। विदर्भितस्वनाम्नातु यस्मिन्कस्मिन्प्रलिखेत् ।।
४८।। रूपावरस्त्रं यमं चापि सकलं जनमंडलं ।। वशीकुर्यान्महेशानि पा
दाक्रांतं न संशयः ।।४९।। महात्रिपुरसुंदर्याः कामकूटेन साधिता ।।
एकमेकमवष्टभ्य साध्यनामाक्षराणि च ।।५०।। बहिर्व्याप्यविलिर्वर्णैर्मा
तृकायाः प्रवेशयेत् ।। हिम मध्यगतं कुर्यात्किरनाथां वामकेतु ।।५१।।
धारयेच्चक्रकुत्रापि त्रैलोक्यवशकारकं ।। राजेंद्रमपि देवेशि दासभूतं क
रोति हि ।।५२।। राजानो वाजिनः सर्पा गजा दुष्टा मदोत्कटाः ।। व्याघ्राः के
सरिणो मत्ता वश्यास्तस्य भवंति हि ।।५३।। एवं क्रमेण नगरं नामसंदर्भ्य
शैलजे ।। मध्ये चतुष्पथे वापि न्यसेत् दिवसं निधापयेत् ।।५४।। महाक्षोभो
यो भवेत्तु जनानां महतामपि ।। तथैव सर्वदुष्टानां पुररक्षा नान्येजायते ।।५५।।
एवं मध्यगतां पृथ्वीं सशैलवनगह्वरां ।। ज्वलंतीं सर्वराजेंद्रमंडितां सागा
रांबरां ।।५६।। मासषट्केचिंतयेद्यः साक्षात्कामोपमो भवेत् ।। कटाक्षे

पमात्रेण नार्येत्तस्य वशगः प्रिये ॥५७॥ राजानो ब्राह्मणा वैश्याः शूद्राश्च पशु
वो जगत् ॥ दृष्ट्वा लाक्षयेद्दृष्टिं चित्रे लोक्यं सचराचरं ॥५८॥ सपत्न्यो नाशये
दृष्ट्वा नात्र कार्या विचारणा ॥ भूतप्रेतपिशाचांश्च ज्वरांश्चातुर्थिकादिका
न् ॥५९॥ शूलगुल्मादिरोगाणां दृष्ट्वा नाशयते क्षणात् ॥ एतत्सिंदूरस
म्भेरोत्रौ संपूजितं प्रिये ॥६०॥ योजनानां शतादूर्ध्वं समाप्यागाकर्षयेत्कि
यं ॥ यदा दिक्षु विदिक्षु वे त्रिदिवस्तु सुंदरि ॥६१॥ वशमानयते शीघ्रं स
पुत्रपशुबांधवान् ॥ भूर्जपत्रे समालिख्य रोचनागरुकुंकुमैः ॥६२॥ तन्म
ध्ये नगरं देशं मंडलं खेटमेव च ॥ नाम्ना विदर्भितं तस्य पूजयित्वा यथा
विधिः ॥६३॥ भूमिमध्यगतं कृत्वा त्रैलोक्यं वशमानयेत् ॥ मध्ये वा धार
येत्कंठे शिखायां बाहुमूलके ॥६४॥ यत्र कुत्र स्थितो भद्रे क्षोभयेन्नगरं
महत् ॥ अर्कक्षीरेण संयुक्तं धत्तूरकरसं तथा ॥६५॥ रोचनाकुंकुमं चैव
लाक्षालक्तकसंयुतं ॥ करवीरं चित्रकं समेकीकृत्य तत्तुल्यं पुरं ॥६६॥ च ५०
क्रे मे तत्समालिख्य यस्य नाम्ना महेश्वरि ॥ तस्या विद्यां देवि परमं मंत्रोत्ति
चारकं ॥६७॥ तस्य व्याधिगणं व्याधिरिपुसर्पसर्पादिकं ॥ चोरग्रहजला
दिष्टशाकिनीडाकिनीमेव ॥६८॥ भयं यन्त्रविद्यते देवी परमंत्रादिचार

जं ॥ नित्यं संधारयेद्देवी कालमृत्युविनाशयेत् ॥६९॥ अथवा मध्यगं देवी
त्रिकोणं भयमध्यगं ॥ अधरस्थानाम संयुक्तं रोचनाकुंकुमांकितं ॥७०॥
निधापूयेत्सप्ताहाद्दासवत्किंकरो भवेत् ॥ पीतद्रव्यैः समालिख्य पीतपुष्पैः
समर्चयेत् ॥७१॥ पूर्वाशाभिमुखो भूत्वा स्तंभयेत्सर्ववादिनः ॥ सहस्रवदनो
देवि मूको भवति तत्क्षणात् ॥७२॥ नाभौ यस्य सवाङ्खोहि पापाणइव जायते ॥
चक्रे विलिख्य देवेशी महानीलीरसेन तु ॥७३॥ नामसंयोज्य विधिवद्दक्षि
णाभिमुखो बुधः ॥ वज्राद्दग्ध्वा मुहूर्तेन मारणं वैरिणो प्रिये ॥७४॥ महिष्या
श्च पुरीषाभ्यां सम्यग्घृष्य चोलकं ॥ गोमूत्रेण च संलिख्य नाम संदध्य पूर्व
वत् ॥७५॥ स्मशानाङ्गारनाभ्व मध्यस्थं विद्वेषणकरं भवेत् ॥ कृत्वा रोचनया नाम
काकपक्षस्य मध्यगं ॥७६॥ लंबमानं तदा कारोशत्रूच्चाटनकारकं ॥ महा
नीलीरसाचनाभ्यां दुग्धलाक्षारसेन हि ॥७७॥ विलिख्य धारयेन्मंत्री सर्व
र्णान्वशानयेत् ॥ अनेनैव विधानेन स्थापयेद्वारिमध्यगं ॥७८॥ तेनोदकेन
संस्नातः पीतेत सर्ववश्यकृत् ॥ सौभाग्यं जायते तेन पानीयेन न संशयः ॥७९॥
एतन्मध्यगता पृथ्वी नगरी वा सकुलाचले ॥ सप्ताहात्क्षोभयेत्सम्यग्ज्वलमानां
विचिंतयेत् ॥८०॥ अथवस्य महेशानि महापातकनाशनं ॥ शिवां संपूजयेद्देवी

श्रीमत्त्रा० सुगंधैः कुंकुमैः प्रिये ॥ ८१ ॥ महापातककुक्कालात्तत्क्षणात्पापहा भवेत् ॥ शमीदू नित्या०
५१ र्वांकुराश्वत्थपलाशैरथवार्कजैः ॥ ८२ ॥ मासेन हंति कलुषं सप्तजन्मकृतं नरः ॥
पूर्वाशाभिमुखो भूत्वा पीतद्रव्यैः समर्चयेत् ॥ ८३ ॥ पीतस्थाने सुमालिख्य स्तं
भयेत्सर्ववादिनः ॥ उत्तराशामुखो भूत्वा सिंदूररजसालिखेत् ॥ ८४ ॥ पूजयेद्वि
धिवद्दिव्यान्सर्वलोकवरान्नयेत् ॥ पश्चिमाभिमुखो भूत्वा चंदनेन समालिखे
त् ॥ ८५ ॥ संपूज्य विधिवद्दिव्यान्सर्वेषामपि मनोहरः ॥ वल्लभो जायते देवि दा
सीमिव वशं नयेत् ॥ ८६ ॥ यमाशाभिमुखो भूत्वा चक्रं कृत्स्नं यदार्चयेत् ॥ य
स्य नाम्ना कृतं तस्य मंत्रहानिः प्रजायते ॥ ८७ ॥ मुक्तविद्वेषणव्याधिशत्रूच्चा
टकं भवेत् ॥ रोचनालिखितं चक्रं क्षीरमध्ये क्षिपेद्बुधः ॥ ८८ ॥ अचिरात्सिस
वाय्यव्यां सुकोणेषु पूजितं ॥ पूर्ववत्परमेशानि क्रमेण परिपूजितं ॥ ८९ ॥
सर्वेनरयकं रोद्धि वितन्वत्येव न संशयः ॥ गोमूत्रमध्यगं सम्यक् शत्रूच्चाटकरं भवे
॥८०॥ त् ॥ तिलसूक्ष्मचक्रराजं तत्र विद्वेषणकरं भवेत् ॥ ज्वलज्ज्वलनमध्यस्थं शत्रुना ५१
शकरं भवेत् ॥ ९१ ॥ यदंकोति चतुर्मार्गी सिंदूररजसा लिखेत् ॥ सर्वबाधयुतं आ
रभ्य यावन्मध्यं महेश्वरि ॥ ९२ ॥ अकारादिक्षकारांतां मातृकां तत्र विन्यसेत् ॥
पूजयेद्रात्रिसमये कुलाचारक्रमेण तु ॥ ९३ ॥ साधकः खेचरो देवि जायते न ॥

न संशयः ॥ गिरौ वैकतरौ न हृदं चर्चयेत्कुलमार्गतः ॥ ९४ ॥ अजरामरतां लब्ध्वा सु
खी भवति मांत्रिकः ॥ श्मशाने पूजयेच्चक्रं महाभूतदिने बुधः ॥ ९५ ॥ पूर्वक्रमेण
विधिवत्साधकः स्थिरमानसः ॥ खड्गसिद्धिं च वेतालसिद्धिं च गुटिकोदयं ॥ ९६ ॥
पादुकांजनसिद्धिं च मनःसिद्धिं च धातुदां ॥ महाविवरसिद्धिं च यक्षिणी चेटकं
द्वे ॥ ९७ ॥ सर्वं तल्लभते मंत्री नात्र कार्या विचारणा ॥ अथ वक्ष्ये महेशानि श्रीवि
द्यापूजनं महत् ॥ ९८ ॥ ब्रह्महत्यादिदोषाणां पुरश्चरणमुत्तमं ॥ ब्रह्मपद्मे महेश्व
नि पूजयेच्चक्रमुत्तमं ॥ ९९ ॥ समस्तरश्मिसहितं नित्याम्नायपुरस्कृतं ॥ कृत्वा
चास्मिन्माह्वे विकपूरक्षोदमंडिते ॥ १०० ॥ मासमात्रेण देवेशि महापातककोटयः ॥
जन्मांतरकृताः सर्वा नाशयेन्नात्र संशयः ॥ १ ॥ लक्ष्मीस्तस्य गृहे रम्या सुस्थिरा
सुखदा दिते ॥ जपापुष्पैर्महेशानि पूर्ववत्पूजयेच्छिवां ॥ २ ॥ मासमात्रं क्रमेणैव
पूर्ववत्परमेश्वरि ॥ ब्रह्महत्यादिपापांश्च पूर्वजन्मकृतान्प्रिये ॥ ३ ॥ नाशयेन्नात्र संदेहो
धनवान्जायते बुधः ॥ केतकीतरुणैः पत्रैः पूर्ववत्पूजयेत्प्रिये ॥ ४ ॥ उपपातकसंघां
श्च मासमात्रेण नाशयेत् ॥ सौभाग्यमतुलं तस्य जायते नात्र संशयः ॥ ५ ॥ शत
पत्रैर्मनोरम्यैः पूजयेन्मासमात्रकं ॥ पूर्ववत्परमेशानि पूर्वपापं विनाशयेत् ॥ ६ ॥
चंपकैः कुसुमनोरम्यैः पूर्ववत्पूजयेच्छिवां ॥ मासमात्रेण हत्येव पातकान्शतजं

श्रीमज्ज्ञा० मजान्॥७॥सौभाग्यवान्भवेन्मंत्री त्रिपुरायाः प्रसादतः॥श्वेतपद्मैर्महेशानि नित्या०
५२ महद्भिः पूजयेत्परां॥८॥पूर्ववन्नाशयेत्पापं विंशज्जन्मसु वै प्रिये॥मासमात्रेण
सकलं मोक्षस्तस्य करे स्थितः॥९॥बंधूककुसुमैर्देवी मासमात्रं प्रपूजयेत्॥
त्रैलोक्यं वशगं तस्य पूर्वपापं दहेद्बुधः॥१०॥बिल्वपत्रैश्च जलजैः सहैव परिपू
जयेत्॥पूर्ववत्परमेशानि मासमात्रे प्रसन्नधीः॥११॥समृद्धिमान्भवेद्दिवि सर्व
पापहरः सदा॥मल्लिकामालतीजातीकुंदैश्चूतपत्रकैः॥१२॥श्वेतोत्पलैर्मिश्रि
तस्तु पूजयेन्मासमात्रकं॥कुलाचारक्रमेणैव पातकं शतजन्मजं॥१३॥ब्रह्म
हत्यादिजनितं नाशयेन्नात्र संशयः॥मुक्तिस्तस्य करे देवि वाचाजीवसमो
भवेत्॥१४॥अगस्त्यबाणबंधूकजपारक्तोत्पलैः प्रिये॥पूर्वक्रमेण संपूज्य मा
समात्रे प्रसन्नधीः॥१५॥पातकं नाशयेन्मंत्री साक्षात्कामसमो भवेत्॥चंप ५२
कैः पाटलैर्देवी बकुलैर्नागकेसरैः॥१६॥कल्हारैः सिंदूरै रम्यैः पूर्ववत्पूजयेत्क्र
मात्॥सौभाग्यमतुलं तस्य मासमात्रेण जायते॥१७॥पापं विनाशयेद्देवीय
दिजन्मसहस्रजं॥१८॥इति श्रीमज्ज्ञानार्णवे नित्यातंत्रे श्रीविद्याप्रयोगविधि
र्नाम सप्तदशः पटलः॥१७॥ईश्वर उवाच॥रत्नपूजाविधानं तु कथयामि
तवानघे॥तैरेव पूजा प्रकर्तव्या चक्रराजस्य पूर्ववत्॥१॥नानापुष्पैः स्वग

धैश्च कर्पूरस्रोदचंदनैः॥येकविंशतिरात्रेण विंशति धरणीभुजां॥२॥दासीभू
तां करोत्येव महारोगांश्च नाशयेत्॥सूर्यवत्कांतिमान्मंत्री जायते नात्र संशयः॥
॥३॥मुक्तारत्नैश्वर चयेत्स्वर्णपुष्पाणि सुंदरि॥तैस्तु पूजा प्रकर्तव्या नानापुष्पै
श्च पूर्ववत्॥४॥एकविंशतिरात्रेण राजपत्न्यो वशाः प्रिये॥कल्पकोटिस्तुतो
देवि जायते सुभगः स्मितो॥५॥प्रवालघटितैः स्वर्णपुष्पैस्तु वकुलैर्यजेत्॥पू
र्ववत्परमेशानि कुलाचारक्रमेण तु॥६॥पुष्पैश्च विविधैर्देवी त्रिसप्ताहात्सुरे
श्वरी॥क्रूरास्तस्य वशाः सर्वे वैरीवर्गान्विनाशयेत्॥७॥तथा मरकतक्लिप्त
स्वर्णपुष्पैस्तु पूजयेत्॥येकविंशतिरात्रेण नानापुष्पैः क्रमं यजेत्॥८॥विबुधा
स्तस्य वरदा वैरी नश्यति नान्यथा॥पुष्यरागमहारत्नघटितैः स्वर्णनिर्मितैः॥९॥
कुसुमैः पूजयेच्चक्रे त्रिसप्ताहात्सुरेश्वरि॥सुरास्तस्य वशा देवि ब्रह्मस्पतिस
मो भवेत्॥१०॥स्वर्णरचितैः पुष्पैर्वज्रकैः पूररा जितैः॥एकविंशतिरात्रेण मा
हयज्जगतीमिमां॥११॥देवदैत्यादिवशगास्तस्य जायंते नात्र संशयाः॥इंद्रनीलम
यैः स्वर्णपुष्पैश्च चक्रं समर्चयेत्॥१२॥एकविंशतिरात्रेण तथा नीलैश्च नीरजैः॥
वैरिणो नाशमायांति त्रैलोक्यं वश्या भवंति हि॥१३॥गोमेदघटितैः पुष्पैः स्वर्ण
स्य यजेद्बुधः॥किंशुकैश्च कुसुंभैश्च पूर्ववत्परमेश्वरि॥१४॥सप्ताहाद्वैरिणां वश्या

श्रीमज्ज्ञा० ५३ बा धानस्तेषु प्रजायते ॥ त्रिसप्ताहान्महापापं संचयं नाशयेत्प्रिये ॥१५॥ कव्या नित्या
दुजीवं वश्यं हि भवत्येव न संशयः ॥ वैडूर्यघटितैः स्वर्णपुष्पैरभ्यर्चयेत्क्रमात् ॥ पुष्पै
श्चंपकादिभिरस्य च त्रैलोक्यं स्तंभयेत्क्षणात् ॥ एकविंशतिभिर्वारैः सर्वपाप
हरो भवेत् ॥१७॥ पुष्पैः प्रपूजितैर्देवीं नार्चयेत्स्वर्णजैरपि ॥ निर्माल्यमपि तैः कुसु
मैः रुच्छिष्टैः परमेश्वरि ॥१८॥ नवरत्नमयैः स्वर्णपुष्पैर्यदि शिवां यजेत् ॥
तदा देवा मनुष्याश्च पन्नगा राक्षसादयः ॥१९॥ सर्वे वश्या भवंत्येव त्रिसप्ताहा
न्न संशयः ॥ जन्मकोटिभवं पापं नाशयेन्नात्र संशयः ॥२०॥ स्वर्णरत्नमयैः
पुष्पैर्नरो यदि प्रपूजयेत् ॥ तदाश्वमेधषट्शाकं कृतं भवति शैलजे ॥२१॥ स्व
र्णरत्नादि पूर्णत्वं यदा नास्ति तदा प्रिये ॥ तैरेव पुष्पैः पूजा तु कर्तव्या साधकोत्त
मैः ॥२२॥ यद्यत्पुष्पं यत्र यत्र दत्तं दत्तं सुरेश्वरि ॥ तत्र तत्र प्रदातव्यं न दातव्यं यु ५३
थक्या ॥२३॥ अलंकारस्वरूपेण पूजयेच्चक्रनायकां ॥ केवलं स्वर्णपुष्पैस्तु त्रै
लोक्यं स्तंभयेच्छिवे ॥२४॥ मासमात्रेण पापानि सप्तजन्मभवान्यपि ॥ नाश
येन्मोहयेत्सर्वां समुद्रवलयां धरां ॥२५॥ इति श्रीमज्ज्ञानार्णवे नित्यातंत्रे श्री
विद्यास्वर्णरत्नपूजाविधिविवरणं नामाष्टादशः पटलः ॥१८॥ श्रीदेव्युवाच ॥
त्रिपुरा परमा शक्तिस्त्रैलोक्यवशकारिणी ॥ एतस्याः परमानंदसाधनं कथय

प्रभो ॥१॥ बीजत्रयस्य देवेश यद्यहं तव वल्लभा ॥ ईश्वर उवाच ॥ एषा विद्या वरारोहे पा
रंपर्यक्रमागता ॥२॥ भवबंधघातेयंति संस्मृता पापहारिणी ॥ जपात्कलुं जयेद्य ॥
निध्याता सर्वार्थसाधिका ॥३॥ दुःखदौर्भाग्यदारिद्र्यभयघ्नी पूजिता भवेत् ॥ वि
घ्नौघनाशनी चैव सत्यं नात्र संशयः ॥४॥ पृथग्बीजत्रयस्याहं साधनं कथयामि
ते ॥ शुक्लांबरपरीधानो गंधकर्पूरमंडनः ॥५॥ मुक्ताफलस्फुरद्रूपभूषणः शुक्ल
माल्यधृक् ॥ शुभमंदिरसंविष्टो ब्रह्मचर्यसमन्वितः ॥६॥ पूजयेत्कुसुमैर्नै
वेद्यमपि सोज्ज्वलं ॥ पायसं दुग्धसंपन्नं तथा घृतफलोदनं ॥७॥ घृतगोल्लकसं
पन्नं नानाशुभ्रान्नपूरितं ॥ नैवेद्यं दर्शयेद्दिव्यं वागीश्वर्यै सुरेश्वरि ॥८॥ उपचा
रैः सकलैः शुभैश्च साधयेन्मोक्षवाङ्मयं ॥ वाग्भवाख्यं जपेद्विद्यां वागीशं संस्मरन् बु
धः ॥९॥ शुक्लपद्मधवलां शुक्लां पुष्पाभरणभूषितां ॥ कल्लेंता शुभ्रवसनां च मौक्ति
कभूषणां ॥१०॥ मुक्ताफलामलमणिजपमालालसत्करां ॥ पुस्तकं वरदानं च द
९९ धतीमभयप्रदां ॥ एवं ध्यायेन्महेशानि सर्वविद्याधिपो भवेत् ॥ मूलादिब्रह्मरंध्रांत
स्लवल्लीसूक्ष्मवर्त्मिनी ॥१२॥ तस्माज्ज्योतिर्मयं ध्यायेज्जिह्वाग्रे दीपरूपिणी ॥ पाषा
णसमो वापि मूर्खो वाग्जीवसमो भवेत् ॥१३॥ अथ कामकलाशक्तिसाधकः परमे
श्वरि ॥ रक्तालंकारस्रक्सग्गैरक्तगंधानुलेपनः ॥१४॥ रक्तवस्त्रावृतः सम्यक् मध्ये

पर्यंतं २

श्रीमत्त्रा० कामकलात्मना ॥ रक्तपुष्पैश्च विविधैः कुंकुमादिभिरर्चयेत् ॥ १५ ॥ मूलादिब्र नित्या०
५४ ह्मरंध्रांतं स्फुरद्दिव्यस्वरूपिणीं ॥ बंधूककुसुमाकारां कांतिभूषणभूषितां ॥
१६ ॥ इक्षुकोदंडपुष्पेषु वरदाभयलसत्करां ॥ तदीयकायसिंदूरभरितं भुवन
त्रयं ॥ १७ ॥ चिंतयेत्परमेशानि त्रैलोक्यं मोहयेत्क्षणात् ॥ राजानो वशमायांति पं
न्नगा राक्षसास्तथा ॥ १८ ॥ कंदर्प इव देवेशि योषितां मानहारकः ॥ मनसा चिंतित
योषित्सु दासीव वशगा भवेत् ॥ १९ ॥ बालचंद्रेंदुसंकाशां तरुणारुणविग्रहां ॥
चिंतयेद्योषितां योनौ क्षोभयेत्स्फुरसुंदरि ॥ २० ॥ किं पुनर्मानुषीर्देवि त्रैलोक्यम
पि मोहयेत् ॥ एषैव चिंतिता देवि सिंदूराभा हृदि क्षणात् ॥ २१ ॥ आकर्षयेत्तदा
शीघ्रं रंभाद्यास्तिलोत्तमाः ॥ रक्तवर्णां स्त्रियं ध्यात्वा तद्दीपसहस्रतः ॥ २२ ॥ तस्या
मूर्ध्नि स्मरेद्बीजं स्रवत्पीयूषवर्षिणीं ॥ तं ध्यायेन्मोहयेद्देवि मदनोन्मत्तमानसां ॥
॥ २३ ॥ क्षणमात्रेण देवेशि त्रैलोक्यं वशमानयेत् ॥ एतत्कामकलाध्यानं यच्च
कामवरानने ॥ २४ ॥ मोहयंती जगत्सर्वं प्रयोगं शृणु पार्वती ॥ पूर्वोक्ताः कामदे
वेशी ज्वालव्याप्तचरसंतकाः ॥ २५ ॥ विदर्भ्य ध्येनकामेन मन्मथांतेगतं कुरु ॥ कंद ५४
र्पसंपुटं कृत्वा कोणगर्भगतं ततः ॥ २६ ॥ मकरध्वजसंयुतं तु सर्वमेतत्प्रहरान्ननं ॥ मी
नकेतुगतं कुर्यान्मोहयेज्जगतीमिमां ॥ २७ ॥ त्रैलोक्यमोहनो नाम मेय गोप्यं पर

मातृचक्रं तस्य कार्यो नेन सार्द्धं स्फुरवीजयुग्मं ॥ २७ ॥ पुत्रवान्देवदेवेशि मंत्री ध्यानान्न संशयः ॥

कीर्तितः ॥ शृणु देवि प्रवक्ष्यामि शक्तिबीजस्य साधनं ॥ २८ ॥ सृष्टिसंहारपर्यं
तं शरीरे चिंतयेत्परां ॥ स्रवत्पीयूषधाराभिर्वर्षंतीं विषहारिणीं ॥ २९ ॥ हेम
प्रभाभासमानां विद्युन्निकरसुप्रभां ॥ स्फुरच्चंद्रकलापूर्णकलशं वर
दाभयौ ॥ ३० ॥ ज्ञानमुद्रां च दधतीं साक्षादमृतरूपिणीं ॥ ध्यायन्विषं
हरेन्मंत्री नानाकारव्यवस्थितं ॥ ३१ ॥ एतस्याः स्मरणाद्देवि नीलकंठत
मागतः ॥ अहं मृत्युंजयो भूत्वा विचरामि जले स्थले ॥ ३२ ॥ वैनतेयसमो
मंत्री विषभारसहस्रवत् ॥ भूतप्रेतपिशाचांश्च नाशयेद्द्रागसंशयं ॥ ३३ ॥
चातुर्थिकज्वरान्सर्वानपस्मारांश्च नाशयेत् ॥ अथ त्रिकूटसंपूर्णा महात्रि
पुरसुंदरी ॥ ३४ ॥ चिंतिता साधकस्याशु त्रैलोक्यवशकारिणी ॥ क्रमेण नाभि
हृच्चक्रे मंडलस्थारुणप्रभा ॥ ३५ ॥ पद्मरागमणिर्यद्वच्चिंतनात्सुरवंदिते ॥
तस्याष्टगुणमैश्वर्यं सौभाग्यं च प्रजायते ॥ ३६ ॥ तन्नामसंस्मरेन्मंत्री योगि
नीनां स वल्लभः ॥ यदा चक्रस्थिता पूर्णा परेश्वरी सिद्धिदायिनी ॥ चतुःषष्टि ॥ ३७ ॥
यंतः कोट्यो योगिनीनां महौजसां ॥ चक्रमेतत्समाराध्य संस्थिता वीरवंदि
ते ॥ ३८ ॥ आदिसंबोधिनि पदे मध्ये बीजाष्टकं बहिः ॥ कलाध्यानं गुणा सर्गे
कामराजेंद्रवापरा ॥ ३९ ॥ पाशांकुशधनुर्बाणैर्मादनैर्मोहयेत्स्त्रियो त्रैलोक्य

श्रीमत्ता॰ सुंदरि देवि किं पुनर्मर्त्ययोषितः ॥ ४३ ॥ तथैव नराः किं संबंधस्तास्तेषां तन्मयुवि नित्या
५५ ग्रहः ॥ सिद्धगंधर्वदेवांश्च वशीकुर्यान्न संशयः ॥ ४४ ॥ एनामाराध्य देवेशी
कामसौभाग्यसुंदरः ॥ हरिश्च पार्श्वमेषानि त्रिपुरासाधनात्प्रिये ॥ ४५ ॥ त्रै
लोक्यमोहनो भूत्वा स्थितिकर्ता भवेत्सदा ॥ एतत्तस्याराधनेन ब्रह्मा सृष्टि
कारोऽभवत् ॥ ४६ ॥ चंद्रसूर्यौ वरारोहे सृष्टिसंहारकारकौ ॥ ४७ ॥ इति श्रीमत्ता
नार्णवे नित्यातंत्रे त्रिपुरा बीजमंत्रसाधनविधिनाम एकोनविंशः पटलः ॥ १९ ॥
श्रीदेव्युवाच ॥ जपहोमविधिं ब्रूहि येन विघ्नं विनाशयेत् ॥ साधकानां हिताय
त्वं वद शंकर सत्वरम् ॥ १ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि जपहोमविधिं
प्रिये ॥ चक्रं समर्चयेद्देवि सकलं नियतव्रतः ॥ २ ॥ अवाद्यमध्यगते वापि स्वयं वा
चक्रमर्चयेत् ॥ उपचारैः समाराध्य सहस्रं प्रजपेच्छुचिः ॥ ३ ॥ तदूर्ध्वं संस्थितो
मंत्री तदनंतफलं भवेत् ॥ ध्यात्वाथवा चक्रराजमेवं पूजासमन्वितः ॥ ४ ॥
जपारंभं सकृधिः कुर्यान्महापातकहा भवेत् ॥ निगदेनोपांशुना वा मानसेना ५५
थवा जपेत् ॥ ५ ॥ निगदः परमेशानि स्पष्टवाचा निगद्यते ॥ अव्यक्तरक्तस्फु
टश्चोपांशुः परिकीर्तितः ॥ ६ ॥ मानसः स्यात् वरारोहे चिंतनात्स्वरूपवा
न् ॥ निगदेन तु यज्जप्तं लक्षमात्रं वरानने ॥ ७ ॥ उपांशुस्मरणेनैव तुल्यं भव

ति शैलजे ॥ उपांशु लक्षमात्रं तु यज्जप्तं एकमलेक्षणे ॥ ८ ॥ मानसोच्चार
णात्तुल्यमेकेन परमेश्वरि ॥ मुद्रासन्नद्धदेहस्तु पूर्वोक्तध्यानयोगतः ॥ ९ ॥
लक्षमात्रं जपेद्यस्तु महापापैः प्रमुच्यते ॥ १० ॥ लक्षद्वयेन पापानि सप्तज
न्मसु वान्यपि ॥ ११ ॥ महापातकमुख्यानि नाशयेन्नात्र संशयः ॥ ततो लक्ष
त्रयं जप्त्वा यंत्रमंत्रकुलेश्वरः ॥ १२ ॥ महापातककोटिस्तु नाशयेन्नात्र संश
यः ॥ चतुर्लक्षं जपेद्देवि सहिवागीश्वरो भवेत् ॥ १३ ॥ कुबेर इव देवेशी पंच
लक्षान्न संशयः ॥ षड्लक्षं जपमात्रेण महाविद्याधरो भवेत् ॥ १४ ॥ सप्त
लक्षं जपान्मंत्री खेचरीमेलको भवेत् ॥ अष्टलक्षं जपान्मंत्री देवपूज्यास्त
वेश्वरः ॥ १४ ॥ अणिमाद्यष्टसिद्धीनां नायकोऽस्य भवति प्रिये ॥ वश्यागास्तस्य रा
जानो याषित्स्तु विशेषतः ॥ १५ ॥ नवलक्षप्रमाणेन तु जपेत्त्रिपुरसुंदरि ॥ रु
द्रमूर्तिः स्वयं कर्ता हर्ता साक्षान्न संशयः ॥ १६ ॥ सर्वं वश्यं सदा सर्वं स्त्रैलोक्यं सौ
भाग्यभाग्भवेत् ॥ यत्र वा कुत्र चित्स्थाने लिंगं स्यात्पश्चिमामुखं ॥ १७ ॥ स्वयं
भूर्बाणलिंगं वा हृष्टं स्यं जलस्थितं ॥ पश्चिमायतने वापि सिद्धदृष्टापि संत
ते ॥ १८ ॥ रात्रिस्त्रिषु गंगायां नद्यां पर्वतमस्तके ॥ पवित्रे स्थले देवि जप
द्विर्यात् सन्निधौ ॥ १९ ॥ तत्र स्थित्वा जपेल्लक्षं सोऽसाद्विश्वरूपकः ॥ तनो

भवेति विधेयं त्रैलोक्यवशकारिणी ॥२०॥ एवं जपेद्यथाशक्त्या होमकर्म समार
भेत् ॥ किंशुकैर्हवनं कुर्याद्दशांशेन वरानने ॥२१॥ कुंकुमं कुसुमैर्देवी मधुत्रय
विमिश्रितैः ॥ विधिनोक्तप्रकारेण वृश्चिपन्नाशयेत्क्षणात् ॥२२॥ सर्वकामप्रदा
राज्यभुक्तिमुक्तिफलप्रदा ॥ कुंडविरच्यविधिवत्सर्वलक्षणलक्षितं ॥२३॥
योनिकुंडं वाक्प्रदं स्याद्राजकर्षणकरणं भवेत् ॥ लक्ष्मीप्रदं वर्तुलं स्याच्चंद्रार्द्धेन
हि त्रयं सवेत् ॥२४॥ नवत्रिकोणकुंडं तु रेखवृरीसिद्धिदायकं ॥ चतुरस्रं शु
तिलक्ष्मीपुष्टिर्हेशांतिकारणं ॥२५॥ श्रीवत्सं च स्मृद्धौ हि धनसौभाग्यवर्द्धनं ॥
पद्माकं सर्वसंपत्तिकारणं स्मरवंदिते ॥२६॥ अष्टपत्रं वरारोहे समीहितफ
लप्रदं ॥ एतानि सर्वकार्याणि चतुरस्रे भवेन्निहि ॥२७॥ शृणु देवि प्रवक्ष्या
मि चतुरस्रस्य लक्षणं ॥ चतुरस्रं समं हस्तमात्रं विरचयेत्सुधीः ॥२८॥ मे
खलासहितं देवि अष्टांगुललक्षणमुत्तमं ॥ पंचदशांगुलं खातं रमणीयं यथा भ
वेत् ॥२९॥ कंवदशांगुलं त्यक्त्वा नवांगुलसमुन्नता ॥ षडंगुलप्रविस्तारं मे
खलात्रयमाभवेत् ॥३०॥ द्वितीयमेखलादेवी चतुरंगुलविस्तरा ॥ समांगु
लोच्चा कर्तव्या तृतीया मेखला ततः ॥३१॥ पंचांगुलोच्चा देवेशि विस्तरा
द्व्यंगुलास्तवेत् ॥ कुंडस्य पश्चिमे भागे योनिं कुर्यात्सलक्षणां ॥३२॥ द्वादशां

गुलदीर्घा तु तथाष्टांगुलविस्तराम् ॥ अश्वत्थपर्णरूपां तु त्रिकोणं वा विच
क्षणः ॥३३॥ अथ चैकतमे पक्षे अष्टपुवक्ष्ये हि लक्षणं ॥ अष्टदशांगुलं खा
तं कुंडं कुर्याद्विचक्षणः ॥३४॥ चतुरंगुलविस्ताराषडंगुलसमुन्नता ॥ मे
खला पूर्ववत्कार्या योनिश्चापि तथा भवेत् ॥३५॥ द्वात्रिंशदंगुलं कुंडं त्रि
कोणं परितः पृथक् ॥ खातं तु पूर्ववत्कुर्यात्किंवा हि तत्रांगुलं तथा ॥३६॥ पूर्व
वन्मेखलाः कार्या एकापि च तथा भवेत् ॥ योनिस्तद्वन्महेशानि त्रिकोणं प
रिकीर्तितं ॥३७॥ चतुरस्रेण कुंडेन तत्तत्कुंडं यथा भवेत् ॥ तथा परिमितं
कुर्यात्त्रिकोणादिकमद्विज ॥३८॥ योनिकुंडं योनिरूपं स्यात् कंसगरूप
कं ॥ कुर्यात्त्रिकोणवद्देवि चतुरस्रस्य संख्यया ॥३९॥ चतुर्हस्तमितं सूत्रं
वर्तुलाकृति योजयेत् ॥ वर्तुलं रचयेत्तेन खननं पूर्ववद्भवेत् ॥४०॥ मेख
लाः पूर्ववद्योनिस्तथैव परिकीर्तिता ॥ अर्द्धचंद्रं हि कुंडं हि परिवेषक्रमेण च ॥
४१॥ चतुर्हस्तमितं कुर्याद्द्वंद्वं यथा भवेत् ॥ मेखलायोनिसहिता पूर्व
वत्परमेश्वरि ॥४२॥ नवत्रिकोणकुंडं तु कथयामि वरानने ॥ मध्यचक्रेण सहितं
कुंडं कुर्याद्विचक्षणः ॥४३॥ मध्यात्त्रिकोणं देवेशि त्रिकोणमिव पूर्ववत् ॥ मेखला
रहितं तेन नवकोणं यथा भवेत् ॥४४॥ संधिभिदक्रमेणैव ततः कोणाष्टकं भवेत् ॥

रवेनतत्तत्ककारेण गणितेन यथाक्रमं॥४५॥ मेखलापूर्ववत्कुर्यात्तत्कांकेंदु
लेकमात्॥ योनिस्तथैव रचयेत्सर्वसौभाग्यवर्द्धनी॥४६॥ अष्टपत्रं महेशानि
कमलाकृतिसंभवेत्॥ चतुरस्रस्य मानेन यथा चाष्टदलं भवेत्॥४७॥ एकक्र
खननं चास्य कुर्यात्तेन सुखप्रदं॥ मेखलापूर्ववत्कार्या पद्माकृति सुखावहा॥
४८॥ योनिस्तथैव देवेशि कुर्यात्सर्वसमृद्धये॥ एवं विरच्य कुंडं हि प्रमृक्षया दि
चक्षणः॥४९॥ दीपस्थानं समाश्रित्य कुंडस्य रचनां भवेत्॥ वर्तुलं रचयेद्धीविकृ
मति निरूकोचने॥ तन्मध्ये नवकोष्ठानि कृत्वा वर्णान्समालिखेत्॥ मध्य
कोष्ठे स्वनाममतथान्यत्र समालिखेत्॥५१॥ स्वरयुग्मक्रमेणैव दिक्षु चा
ष्टसु योजयेत्॥ अवर्गः कथितो देवि कवर्गो दिक्सहके॥५२॥ पूर्वादिक्र
मतो देवि कुबेरान्तं ततो लिखेत्॥ ळक्षवर्णौ शंभुकोणे विलिखेत्कूर्मसंज्ञ
के॥५३॥ यस्मिन्कोष्ठे स्वनाम तन्मुखं विद्धि पार्वति॥ मुखस्य पार्श्वयोः पा
णियुग्मं जानीहि पार्वति॥५४॥ ततः पार्श्वद्वयं कुक्षिस्थानं हि स्करवदिते॥ त
तः पादद्वयं विद्धि चांते पुच्छं प्रकीर्तितं॥५५॥ मुखे कार्याणि सिद्ध्यंति मनोर
थशतानि हि॥ करस्थाने महाक्लेशः सर्वकार्यविनाशकृत्॥५६॥ उदरे दुः
खमधिकं पादयोर्हानिरुच्यते॥ पुच्छे तु धनहानिश्च जायते नान्यथा भ

वेत्॥५७॥ दीपस्थानं मयाप्रोक्तं त्रिषु लोकेषु दुर्लभं॥ दीपस्थानं पुरे पश्येत्सा
मे वा विपर्ययेपि वा॥५८॥ यत्र कुत्रापि वा पश्येत्कार्यसिद्धिर्भवेत्प्रिये॥ क्षेत्राधिपस्य
नाम्ना हि दीपस्थानं विचारयेत्॥५९॥ दीपस्थाने तु पश्येद्यो [illegible] च फलदं स
दा॥ कुंडसंलक्षणं कृत्वा देशे न मंडपस्य च॥६०॥ अंगुष्ठपर्वमात्रं च वालु
कामंडलं कुरु॥ गोमयेन च संलिप्य भूम्यां स्थंडिलरूपके॥६१॥ तत्र चोल्लि
खनं कृत्वा त्रिरेखा पश्चिमाक्रमात्॥ पूर्वाग्रे विलिखेत्पश्चात्त्रिरेखा
प्रदक्षिणा॥६२॥ उत्तरांतास्ततो देवि विलिखनीं तत्र संक्षिपेत्॥ प्रोक्षयं
च ततः कृत्वा सिंदूरेण ततः परं॥६३॥ कुंकुमेनाथवा देवी कर्पूररजसा
थवा॥ चूर्णेन वा हरिद्राया धान्यपिष्टेन वा प्रिये॥६४॥ त्रिकोणं चैव षट्को
णं वसुपत्रं समालिखेत्॥ चतुरस्रं चतुर्द्वारमेवं मंडलमालिखेत्॥६५॥
मध्ये पुष्पं विनिक्षिप्य त्रिपुरेश्यावरानने॥ ततस्तु वादिपात्राणि पवि
त्रीकरणं यजेत्॥६६॥ इध्मं दूर्वाश्च दर्भांश्च द्विधा कृत्वा वरानने॥ आज्य
स्थालीं चरुस्थालीं स्थापयेद्युग्मसंख्यतः॥ स्रुवं स्रुचं ततः पश्चात्प्रणीताप्रो
क्षणीक्रमात्॥ हंहराः परमेशानि स्थापयाथ मुखानि च॥६७॥ अर्घ्यपा
त्रस्य खुदकं गृहीत्वा प्रोक्षणीयजेत्॥ त्रिधा चास्य वने कृत्वा प्रोक्षयेत्तेन

वारिणा॥६९॥तानिसर्वाणिपात्राणिपवित्रीकरणंभवेत्॥उन्मुखानिततःकु
लावाल्लयाचाभिमंत्रयेत्॥७०॥परिस्तीर्येच्चदुर्वाभिःकुंडस्यपरितःप्रिये॥
पूर्वाग्रमुत्तराग्रंचपरिस्तरणमुच्यते॥७१॥स्रुवंगृहीत्वावामेनकरेणस्रुसु
खंततः॥दर्भांकुरेणतद्वक्त्रंपश्चिमात्पूर्वदेशतः॥७२॥त्रिवारंपरिमृज्या
धाधस्तत्करणमानयेत्॥उपरिष्टात्ततोदेवियावद्वक्त्रंतुमर्दयेत्॥७३॥बा
लयाथवरारोहेपवित्राणिभवंतिहि॥मूलविद्यांसमुच्चार्यकुंडायनमआ
लिखेत्॥७४॥अनेनमनुनादेविकुंडंसंपूजयेत्सुधीः॥कामेश्वरींकुंडम
ध्येसकामातुरसंयुतां॥७५॥समावाह्यचसंपूज्यतद्वच्छैववह्निनायजेत्॥
मूलविद्यानेत्रमंत्राभ्यांहृदयेनविलोकयेत्॥७६॥अस्त्रमंत्रेणसंरक्ष्यसंपु
टस्थेततःपरं॥भ्रामयेत्कुंडपरितस्त्रिधादक्षिणतःक्रमात्॥७७॥संपु
टाद्वग्निखंडंतुहुंफडितिनसंत्यजेत्॥क्रव्यादांशंकोणभागेराक्षसेवीरव
न्दिते॥७८॥कवचेनचसंपूज्यजानुभ्यामवनीगतः॥कुंडमध्येप्रतीक्षा ५९
व्यकामभवीजंचवह्निंच॥७९॥मूर्तयेनमआलिख्यमनुनापूजयेच्छिवां॥
नाभिमंडलदेशस्थंपहन्नाडीपुटक्रमात्॥८०॥ज्ञानाग्निंबाह्यवह्निंचएकी
कृत्यतत्रपूजयेत्॥मूलविद्यांसमुच्चार्यहंसोहमितिचोच्चरेत्॥८१॥वह्निंचे

तन्यसमुच्चार्यवहृतंहृन्मंत्रसंयुतं॥अनेनमनुना॥गर्भिकाम्भव्यर्थाविचिंतये
त्॥८२॥वह्नेर्देहषडंग॥नियोजयेत्करवन्दिते॥सहस्रार्चिःस्वस्तिपूर्णो
उत्तिष्ठपुरुषस्तथा॥८३॥धूमव्यापीसप्तजिह्वोधनुर्धरउदाहृतः॥चतुर्थ्यंता
न्षडंगेषुयोजयेत्कमलेक्षणे॥८४॥तारंवैश्वानरप्रांतजातवेदइहावह॥
लोहिताक्षततःसर्वकर्माणिनिचसाधय॥८५॥वह्निजायान्वितोमंत्रोव
ह्निंसम्यक्समर्चयेत्॥ध्यायेद्वह्निंहेमवर्णंशक्तिस्वस्तिकधारिणं॥८६॥
वरदाभययुक्तंसाद्यंस्कवर्णवरभूषणं॥एवमग्निंसमभ्यर्च्यतन्मुखेकमले
क्षणे॥८७॥षट्कोणंचिंतयेत्तत्रसप्तजिह्वाःसमर्चयेत्॥वह्निंवासुंवाम
कर्णंभूषितंनादबिंदुना॥८८॥अनेनबीजयेद्देविक्रमेणरसनाःप्रिये॥
यकारादिसकारांताजिह्वाःसप्तभवंतिहि॥८९॥पद्मरागतप्तहेमवर्णा
तिस्फुरदंविते॥हिरण्याख्यासुकोणेपूजयेत्करवन्दिते॥९०॥विडूर्यांभा
स्फुवर्णातुकनकाख्याततःपरं॥पूर्वकोणेसमभ्यर्च्यपूजयेद्रक्तलोहितां॥
९१॥उद्यदादित्यसंकाशांरक्ताख्यांवह्निकोणके॥नीलांनीलप्रभांदेवींक्ष
स्राख्यांराक्षसेयजेत्॥९२॥श्वेतांसुकृष्णांदेवींसुप्रभाख्यांपश्चिमेयजेत्॥
धूम्रिनीपद्मरागाभांवायोरतिरक्तांयजेत्॥९३॥करालींचद्रकोट्याताव

श्रीमद्ज्ञा० नित्या०

५५॥

ॐ रूपं तु मध्यगं॥ दक्षिणे नरक्षा गरूढं पूजयेत्सर्वसिद्धिदं॥ ९४॥ क्रमेण
जिह्वाबीजांते नामानि परिपूजयेत्॥ एवमेभिस्तु संपूज्य कामेश्वरीं गर्तसंस्थ
वे॥ ९५॥ दत्तं कंकणमादाय करे बध्वा स्वलोचने॥ मूलमंत्रेण बाणेन चतु
र्थेन च होमयेत्॥ ९६॥ गर्ताधानं विधाय स्वसीमंतोन्नयनादिकं॥ काम
शीगर्भजातस्य वह्नेश्चोलादि सत्क्रिया॥ ९७॥ मूलमंत्रेण संचिंत्य वाग्भव
कं समर्चयेत्॥ षडंगान्यष्टशक्तीनां वसकोणेषु मातरः॥ ९८॥ लोकपालांश्च
भूबिंबे वह्निं श्रीदेवीं चिंतयेत्॥ ब्रह्माणं दक्षिणे (?) ईं तरूं चात्रीं प्रपूजयेत्॥
९९॥ वह्निं संपूज्य विधिवत्तन्मुखे श्रीलसंसर्वे॥ चक्रराजं समावाह्य सर्व
रश्मिसमन्वितं॥ १००॥ सर्वे सिंहासनैः सर्वैर्वपन्वारैः समभ्यर्चयेत्॥ धूपवि
स्तारयेत्सम्यक्कुंकुमगुग्गुलपूरितं॥ १॥ दीपं चदर्शयेन्मंत्री ततो दीपान्विदुः
प्रियं॥ माल्याकारेण सर्वेषु मेखलात्रयमद्रिजे॥ २॥ विस्तार्यं च रक्तपश्चा
त्सर्वदिक्षु कस्तूरिकामयं॥ नित्यहोमं ततः कुर्यात् प्रोक्तः कामनादिमुक्तमाचरेत्॥ ३॥
मालतीजातिकामल्लीकुसुमैर्मधुमिश्रितैः॥ ध्नन पूर्वैर्ज्ञानं देवि वागीश ५५॥
त्वं प्रजायते॥ ४॥ मूकस्यापि च मूढस्य शिलारूपस्य नान्यथा॥ जपाबंधूकैः
राज्ययुक्तैः करवीरैस्तथाविधैः॥ ५॥ हवनान्मोहयेन्मंत्री त्रैलोक्यं त्रयनि

लोकत्रयनिवासिनी॥ कर्पूरकुंकुमैर्देवि विमिश्रं मृगमदेन हि॥ ६॥ हवनान्मद
नो देवी मंत्रिणं विजितो भवेत्॥ सौभाग्येन विलासेन सामर्थ्येनापि सुन्दरी (?)॥
७॥ चंपकैः पाटलैः कृत्वा श्रियं प्रोक्तसितांबरां॥ मंत्री प्राप्नोति महतीं लक्ष्मीं
ये जगतीमिमां॥ ८॥ श्रीखंडगुग्गुलं चंदनमगरुं होमयेत्ततः॥ राजानां
गेंद्रदेवानां पुरं प्रविश्य मानयेत्॥ ९॥ सर्वलोकावश्याः स्युः सर्वलोकनासं
शयः॥ लाजाहोमाद्भवेद्राज्यं दारिद्र्यास्यपीडितः॥ १०॥ दुर्गोपसर्गशमनं
पलत्रिमधुहोमनः॥ खेचरो जायते नरात्रौ हुत्वा होमं चतुःपथे॥ ११॥ क्षीर
मधु दधि त्वाज्यं पृथक् हुत्वा वरानने॥ आयुर्धनमथारोग्यं समृद्धिं जाय
ते नृणां॥ १२॥ कमण्डलजं क्षीरमधुस्यान्मृत्युनाशनं॥ मूर्ध्नामाक्षिक
होमेन सौभाग्यधनमाप्नुयात्॥ १३॥ शीतयाकेवलं होमो वीरक्तमेन
कारकः॥ होमो दधिमधुक्षीरलाजाभिर्विर्वदिने॥ १४॥ रोगहंता का
लहंता मृत्युहंता न संशयः॥ कमलैरक्तैर्होमैः सम्यक् संपत्तिदायकः॥ १५॥
रक्तोत्पलैर्जगद्वश्यं राजानो वशगाः क्षणात्॥ नीलोत्पलैर्महादुष्टवश्य
मायाति नान्यथा॥ १६॥ श्वेतोत्पलैः श्रियं वांछलभते हवनात्प्रिये॥ श्वेतैः
श्च ब्रह्मकमलैर्लक्ष्मीसौभाग्यमाप्नुयात्॥ १७॥ कल्हारहवनान्मंत्री सौ

श्रीमल्ला॰ ६० नित्या॰

सौभाग्यं च धनं लभेत् ॥ पूर्णावृन्दहोमेन वशीकुर्यान्महासुरान् ॥१८॥ मातु
लिंगफलाज्जनहोमेन सस्त्रियो वशाः ॥ नारिंगफलहोमेन वेश्या वश्या भव
ति हि ॥१९॥ कूष्माण्डफलहोमेन शूद्रा वश्यास्तथापरे ॥ द्राक्षाफलैः सिद्ध
योऽस्ति लक्षहोमान्न संशयः ॥२०॥ कदलीफलहोमेन लक्षमात्रेण भूभृ
तः ॥ वश्यास्त्वदशसंख्याकाः स्ववत्येव न संशयः ॥२१॥ खर्जूरीफलहो
मेन लक्षमात्रेण भूभुजः ॥ वश्या विंशतिसंख्याका इत्याह परमेश्वरि ॥२२॥
नारिकेलफलैर्होमोल्लासमृद्धिर्जायते प्रिये ॥ लक्षमात्रेण मंत्रज्ञो राजा पर
इव प्रिये ॥२३॥ पक्वाम्रफलहोमेन लक्षमात्रेण सुंदरि ॥ चतुःसमुद्रप
र्यंतां मेदिनीं वशमानयेत् ॥२४॥ पनसस्य फलैर्होमो लक्षेण शतभूभु
जः ॥ वशीभवंति देवेशि नात्र कार्या विचारणा ॥२५॥ तिलाज्यहोमाद्दे व
शीकार्यसिद्धिर्भवेत्प्रिये ॥ राजिकालवणाभ्यां तु दुष्टलोकान्वशं नयेत् ॥२६॥
गुग्गुलस्य च होमेन सर्वदुःखानि नाशयेत् ॥ कुंकुमेन तु देवि त्रैलोक्यं ६०
वशमानयेत् ॥२७॥ विरिणा वरांगाः श्रीखंडचंदनस्यापि होमतः ॥ रक्तचं
दनहोमेन वश्याः हि पुरुषाः स्त्रियः ॥२८॥ कर्पूरस्य च होमेन वाग्वशो जाय
ते ध्रुवं ॥ कस्तूरीहोमतो देवी राजानो राजमंत्रिणः ॥२९॥ वश्या भवंति स

र्वे ति सकलाः परिवारयुताः प्रिये ॥ तिलतंदुलहोमेन शांतिर्भवति मंदिरे ॥
३०॥ शर्करागुडहोमेन सर्वकामार्थसाधकः ॥ घृतपायसहोमेन शीतलस्तु के
न मांत्रिकः ॥३१॥ त्रैलोक्यं वशमायाति धान्यसिद्धिमवाप्नुयात् ॥ नाना
विधान्नहोमेन धान्यसिद्धिर्भवेद्ध्रुवं ॥३२॥ सोपस्करैस्त्ववटकैरुपसर्गा
न्विनाशयेत् ॥ बंधूककुसुमैर्होमात्सर्वशत्रून्विनाशयेत् ॥३३॥ जपा
पुष्पैर्जगद्वश्यं वनपुष्पैश्च मोहनं ॥ बकुलस्य तु पुष्पैस्तु सौभाग्यं जाय
ते महत् ॥३४॥ दशांगधूपहोमेन सौभाग्यमतुलं लभेत् ॥ जंबूफलैः स्त्रि
यो वश्याः कूष्मांडैर्दैत्यकन्यकाः ॥३५॥ श्रीफलैरतुलां लक्ष्मीं स्वर्णवी
स्करवेदिते ॥ इक्षुखंडैः स्करवावाप्तिस्तद्वत्साडाकृकन्यकाः ॥३६॥ वि
श्यास्तवंति देवेशि नारिकेलजलेन वा ॥ केवलं घृतहोमेन वरदाः स्युर्वशी
कृताः ॥३७॥ शृणु देवि प्रवक्ष्यामि मानं हवनसिद्धिदं ॥ पुष्पं समग्रं जुहु
यात्कमलं वापि पृथुकं ॥३८॥ कुसुंभवनपुष्पाणि यथेष्टानि हुनेत्प्रिये ॥
शतसंख्यां तिलान्वीरा राजिकाः शतसंख्यया ॥३९॥ लाजान्मुष्टिप्रमाणा
न्घृतं गद्याणमात्रकं ॥ गुग्गुलुकार्धं पयः क्षीरं मन्त्रप्रासमितं स्रवेत् ॥४०॥
स्थूलं फलं महेशानि कूष्मांडं मातुलिंगकं ॥ मनःप्रियैः स्वरंडैः स्वफलैः स

श्रीमद्भा०
६१ नतिनिश्चयात् ॥४१॥ हंसाफलं च चतुःखंडे ल्वपुत्वे लंडपते न हि ॥ नारिकेल
स्यखंडं हि रसाया फलं च स्त्रिये ॥४२॥ पर्वखंडान्न चैकं खंडे मनःसंतोषकारि नित्या
वा ॥ द्राक्षाफले समग्रं स्यान्नारिंगं खर्जूरं तथा ॥४३॥ गुग्गुलं केसुकार्धं तु
कुंकुमं च तथा भवेत् ॥ गुंजासमं च कर्पूरं कस्तूरी घुसृणं तथा ॥४४॥ चंदनं चा
गरु देवी कुसुकेण समं सचेत् ॥ मनःप्रियाणि सर्वाणि फलानि हवनालये ॥४५॥
द्राक्षाद्गुग्गुलसंख्यास्याद्घृहल्लमनोहरं ॥ मनःप्रियाहुतिः कृत्वा होमकु
र्यात्फलाचने ॥४६॥ एतदाहुतिमानं ते कथितं सर्वविघ्नहृत् ॥ यथेच्छा वाव
हरितेश्रीकिंचोपरितोप्रयुत् ॥४७॥ यथारा किंजपं कृत्वा तद्दशांशेन होमयेत् ॥
किंशुकैः पापसंघातं नारिकेरथवा प्रिये ॥४८॥ नानाद्रव्यैः पृथक्कृत्वा तेममीत्रि
नैर्वा विरानने ॥ यथक्षिकायत्तु सिद्धिर्निहोमकर्मा हि लक्षणे ॥४९॥ शृणु देवि
प्रवक्ष्यामि विशेषविधिमुत्तमं ॥ आदौ कुंडं सुलक्ष्याय सर्वलक्षणसंयुतं ॥५०॥
चतुरस्रं तु शोभाय्यं शतहोमे द्विहस्तकं ॥ सहस्रहस्तमात्रं च चतुरस्रं द्विहस्त
कं ॥५१॥ द्विहस्तमयुतप्रोक्तं लक्षहस्तचतुष्टयं ॥ कोटिहोमे षट्हस्तं च कुर्यात्कुं ६१
डस्य लक्षणे ॥५२॥ शांतिके चतुरस्रं तु वश्ये चैवार्द्धचंद्रकं ॥ षट्कोणं स्तंभने
चैव मारणे तद्वदेव हि ॥५३॥ आकर्षणे त्रिकोणं च तद्वदुच्चाटने तथा ॥ नानासि

द्धिहितार्थाय पद्मकोणं च सिद्धिदं ॥५४॥ उत्तरे शांतिके चैव वसंतने वारुणी ॥ द्वि
षे ॥ मारणे दक्षिणे चैव पश्चिमे वश्यकर्मणि ॥५५॥ दाहकर्मं च आग्नेये विद्वे
षणे नैर्ऋते तथा ॥ उच्चाटने तु वायव्ये ईशान्ये सर्वसिद्धिदं ॥५६॥ कृत्तिकाक
र्णपोत्रोकापरणी मारणे तथा ॥ स्वाती वश्ये तथोच्चाटे ज्येष्ठा स्तंभनमेव च ॥५७॥
विद्वेषणे रानतरं च अभिजित्वं तु शांतिके ॥ सोमे सर्वाकर्षणं च मारणे मंगले
तथा ॥५८॥ बुधे नष्टधनं कार्यं गुरुवारे तु पौष्टिके ॥ शुक्रे च सर्वकामकृत् शनौ
रथेमुसानि च ॥५९॥ पूर्वाह्णे वश्यकर्माणि माध्याह्ने प्रीतिनाशनं ॥ उच्चाटणं
चापराह्णे संध्यायां मारणं तथा ॥६०॥ शांतिके अर्द्धरात्रं च पौष्टिके प्रातरेव हि ॥
स्तंभने गजचर्माणि मारणे माहिषे तथा ॥६१॥ मृगचर्मे तथोच्चाटे छागले व
श्यकर्मणि ॥ विद्वेषे जंबुके प्रोक्तं गोचर्मे शांतिके तथा ॥६२॥ नानासिद्धिहिता
र्थाय व्याघ्रचर्म समुदाहृतं ॥ श्वेतध्याने सर्वं च श्यामे पीते स्तंभनकारकं ॥६३॥ व
श्याकर्षणयो रक्तं श्वेतं शांत्यर्थे प्रियावहं ॥ कृष्णं च मारणे प्रोक्तं धूम्रं च उच्चाटने हि
कं ॥६४॥ राजहंसस्य समिधो होतव्याः स्तंभकर्मणि ॥ महिषीघृतसंयुक्तं सदा
वै सिद्धिदायकं ॥६५॥ मारणे त्वचिराहोमं समिद्भिर्दीठिमोद्भवैः ॥ अब्जजातेन
न देवरी वशयेत्स चराचरं ॥६६॥ विद्वेषस्यैव होतव्यं उन्मत्तसमिधस्तथा ॥
अतसीतिलसंयुक्ता विद्वेषणमतः परे ॥६७॥ सर्वविघ्नसमूहं तु नाशयन्मात्र

श्रीमत्स्वा० संशयः॥ पूर्णाहुतिं ततो देवि पूजयित्वा तु कन्यकाः॥ ६८॥ पूजिते नेतेन तत्रैलोक्यं नित्या०
कन्यकायेन पूजिता॥ बालया पूजयेद्देवि श्रीविद्यां स्वयमेव ततः॥ ६९॥ पंचसिंहा
६२ सने देवि श्रीविद्यां तत्र पूजयेत्॥ स्ववासिनीस्ततः पूज्याः श्रीविद्यां तत्र पूजयेत्॥ ७०॥
विप्रान् संतोषयेत् स्वस्वा श्रीविद्यां तत्र पूजयेत्॥ योगिन्यश्च तथा पूज्याः श्रीविद्या
परितोषयेत्॥ ७१॥ दर्शनानि समस्तानि पूजयेद्विधिवन्नित्य॥ श्रीविद्यां तो
षयेद् मंत्र पूर्णाहुतिमथाचरेत्॥ ७२॥ इति श्रीमत्स्वानार्णवे नित्यातंत्रे त्रिपुराज
पहोमविधिविधाननिरूपणं नाम विंशः पटलः॥ २०॥ ईश्वर उवाच॥ इदानीं तु
प्रवक्ष्यामि येन ब्रह्म सनातनं॥ ज्ञानेन चतुरस्राख्यं कुंडे संचिंत्य पूर्ववत्॥ १॥
आत्मानः श्चतुरस्रस्तु विज्ञेयं वि रवे दिन॥ आत्मानो वृद्धसंख्या हि ज्ञातव्यो दे
शिकोत्तमैः॥ २॥ येषां विज्ञानमात्रेण पुनर्जन्म न विद्यते॥ साधारणेन पक्षेण
वर्तते सर्वजंतुषु॥ ३॥ स चात्मा परमेशानि प्राणरूपी वरानने॥ प्राणस्वरूप
वनो देवि हृदयस्थानमंदिरः॥ ४॥ शरीरं व्याप्य सकलं चरस्यापि चरस्य च॥
हंसस्वरूपविज्ञेयः श्वासोच्छ्वासविलासवान्॥ ५॥ जीव इत्येव नामास्य तं ६२
त्याश्वासान्मवस्तनः॥ श्वासोच्छ्वासो देहसंबद्धो निरंतनसंश्रयः॥ ६॥ कुला
लचक्रभेदेन घटाकाशं यथा घटे॥ दृश्यते परमेशानि आकाशो व्याप्य तिष्ठ
ति॥ ७॥ घटे संभवति भिन्नत्वेनाकाशे भिन्नता संभवेत्॥ तथा देहगतो जीवो

देहनाशे वरानने॥ ८॥ व्याप्य तिष्ठति सर्वत्र तस्मादात्मा परं महत्॥ आत्मा त्व
नेन मया प्रोक्तो द्वितीयस्य शृणु प्रिये॥ ९॥ अंतरात्मेति किं नाम तत्त्वपदं महत्॥ ६२
अंतःशब्देन देवेशि रहस्यं शृणु रूपकं॥ १०॥ परमाणुः स्वरूपेण सर्वव्याप्य विज्ञे
भिन्ने॥ अंतरे गत यातेन चरे व्याप्याथवा चरे॥ ११॥ व्याप्यते सकलं तस्मादंतरात्मेति
गीयते॥ स एव हंस आत्मा हि योगगम्यो यथा सवत्॥ १२॥ तारं च तु वरारोहे निग
मागमपक्षवान्॥ शिवशक्तिपदद्वंद्वो बिंदुत्रयविलोचनः॥ १३॥ अयं परमहंस
स्तु स्वदृष्ट्या व्याप्यावतिष्ठति॥ तदा भूतानि जायंते क्रमेणाकमलेक्षणे॥ १४॥ आका
शं पवनो वह्निस्तु जलं पृथ्वी वरानने॥ पंचकस्यास्य देवेशि प्रथमं चित्स्वरूपतः॥ १५॥
अविद्याख्यसुरामध्ये मोहपंकप्रपूरिते॥ प्रपंचकमले भूतपंचाक्षपरिजृंभिते॥
१६॥ विहारोस्य च हंसस्य स्वशक्त्या मायामयो भवेत्॥ अयमेव महादेवि निःप्रपंचो
यदा भवेत्॥ १७॥ संहाररूपी हंसस्तु तदात्मानं प्रदर्शयेत्॥ पक्षीत्वमस्य ना
स्त्येव सोहमात्मा प्रतिष्ठितः॥ १८॥ परमात्मेति जानीहि तत्त्वमेतदुदाहृतं॥ पक्ष
पुच्छशिरो देवि विश्वाकारप्रतिभासकः॥ १९॥ ज्ञानात्मा कथ्यते देवि संश्रयः साक्षा
त्साक्षिरूपकः॥ येनेदं ज्ञायते सर्वं स समर्थो वरानने॥ २०॥ चंद्रबिंबं यथा देवि ज
लक्षीरेषु दृश्यते॥ न लिप्तस्तस्य देवेशि नीरक्षीरविभेदतः॥ २१॥ कर्दमे चंद
ने बिंबं त्वेसर्वे लिप्तमद्रिजे॥ सर्वसाक्षी तथा तद्वद् ज्ञानात्मा परिकीर्तितः॥ २२॥
आत्मांतरात्मपरमज्ञानात्मनः प्रकीर्तितः॥ एतद्रूपं हि वित्कुंडं चतुरस्रं वरान

श्रीमद्भा० नेः॥२५॥ आनंदमेखलारम्यंबिंदुत्रिवलयांकितं॥ अर्द्धमात्रायोनिरूपंब्रह्मानं नित्या०
६२ दमयंसदा॥२६॥ पराहंतामयेसर्वेत्रानदीपकविजृंभिते॥ संविदग्नौजुहोमीदंदेवी
प्रपंचहविरुत्कटं॥२७॥ शब्दस्त्वंमातृकारूपंपंचाशद्वर्णविराजितं॥ अक्षरा
णिजुहोम्यत्रनिःशब्दंब्रह्मजायते॥२८॥ पुण्यपापेहविर्देविकल्पाकल्पेहविः
प्रिये॥ संकल्पश्चविकल्पश्चधर्माधर्मौहविस्तथा॥२९॥ जुहुयात्परमेशा
निमन्त्रात्म्यांविमलानने॥ मूलविद्यांब्रह्मरूपांध्यातव्यातदनंतरं॥३०॥ तदंते
चोच्चरेत्पश्चाद्भूलमाद्यस्तदैशिकः॥ धर्माधर्महविर्दीप्तआत्माग्नौमनसा
स्रुचा॥३१॥ सुषुम्नावर्त्मनानित्यमक्षवृत्तिर्जुहोम्यहं॥ स्वाहांतेनचजुहुयाद्देवि
सकलंनिष्कलंजगत्॥३२॥ अंतर्होममनुर्देविसर्वमायानिकृंतनः॥ प्रका
शाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचा॥३३॥ धर्माधर्मौकलास्नेहपूर्णव
ह्नौजुहोम्यहं॥ अग्निजायान्वितोमंत्रोविद्यांतेकथितस्तव॥३४॥ निःप्र
पंचोयदादेविजायतेमंत्रवित्तमः॥ तदासच्चिन्मयःसाक्षात्केवलंब्रह्मसा
धकः॥३५॥ दासोहंतुहसोपिपीत्वामृत्युंसकृद्भवेत्॥३६॥ इतिश्रीनित्या ६२
र्णवेनित्यातंत्रेज्ञानहोमविधिर्नामैकविंशःपटलः॥२१॥ ईश्वरउवाच॥
होमादिकंतुसकलंकुमारीपूजनंविना॥ परिपूर्णफलंनैवपूजनात्सफलंभ
वेत्॥१॥ कुमारीपूजनाद्देविपूजाकोटिफलंभवेत्॥ पुष्पंकुमार्यैयद्दत्तंतं

मेरुसदृशंभवेत्॥२॥ कुमारीभोजितायेनत्रैलोक्यंतेनभोजितं॥ कुमार्यै
यज्जलंदत्तंतज्जलंसागरोपमं॥३॥ अन्यांतुमीननयनेकुलाचलसमंभ
वेत्॥ एकाद्याःषोडशाब्दांताःकन्यकाःपूजयेत्सुधीः॥४॥ विवाहरहितास्तु
श्चवृत्तरोत्तरासिद्धिदा॥ विवाहितास्तुदेवेशिबालाएवकुमारिकाः॥५॥ सं
वासिन्योभवत्प्रौढाःसेशयेत्सर्वसंस्कृते॥ कुमारीपूजनंदेविकुमारीमनुना
भवेत्॥६॥ मंत्रसिद्धेनतेनैवश्रीविद्यांचप्रपूजयेत्॥ नैमित्तिकंप्रवक्ष्यामि
येनब्रह्ममयोबुधः॥७॥ निर्विकल्पस्यदेवेशिनान्यस्यकर्तृवादितं॥ सर्वशं
काविनिर्मुक्तःसर्वज्ञःसाधकोत्तमः॥८॥ दूतीयागविधौकुर्यात्स्वेच्छयाजा
यतेप्रिये॥ अर्घ्यपात्रंवह्निसूर्यसोमात्मकमयेशिवे॥९॥ सोमामृतंविजानीहि
सोमाद्रूपमयंसदा॥ साविकल्पस्यदेवेशिवर्णानुक्रमसंयुतः॥१०॥ कथ्यते
द्रव्यसंघस्त्वंक्रमेणवरवर्णिनी॥ क्षीराज्यमधुमैरेयद्रव्यंसदासर्वतिहि॥११॥ तथ
सर्वतत्त्वंवरारोहेयत्रदोषोनविद्यते॥ अश्वमेधादियज्ञेषुवाजिहत्याकृता
वेत्सुरा॥१२॥ द्रव्यभेदंवरारोहेबहवःसंतिभेदतः॥ जलक्षीरघृतक्षौद्रमधुमैरेय
मक्षवे॥१३॥ पौष्पंतुरसमधुधान्यसंभवंबहुनिर्मितं॥ सहकारसंभवंदीपवि
धंबहुसंभवं॥१४॥ माध्वीकंधर्मसंश्रितंदाहज्वेमासीत्कर्कोत्पन्नं॥ तानेसंस्रुतं

श्रीमत्कु॰ तत्तु महापातकनाशनं ॥ १५ ॥ ब्रह्महत्यासुरापानस्वर्णस्तेयादिपातकान् ॥ निला॰
६४ नाशयेत्सजनाहि विनिर्विकल्पः समंत्रवित् ॥ १६ ॥ विचारयेत्सदा सर्वे सर्वं
विद्धि रवं दितेः ॥ जलं जलचरं विद्धि घृतं पूर्णं समानयेत् ॥ १७ ॥ स्थापितं दधि
सहाहाज्जलं जीवसमन्वितं ॥ क्षीरं वैयस्य जीवस्य तस्य मोसं न संशयः ॥
१८ ॥ ऋतुयुक्तवती नारी वंध्या सुप्रायतः प्रिये ॥ माकंदफलजं रम्यं द्राक्षं से
व्यं हि जातिभिः ॥ १९ ॥ प्रमादकत्वाहि वैरंगी चैषस्व वंसेव्यं तं बुधैः ॥ मनामि
षं न पश्लि किंचित्सर्वं क्षिरादिकं प्रिये ॥ २० ॥ वेदरागस्तुपुराणपुरूदोज्ञान
संमुच्चयः ॥ स्मृति हृष्टि यथाव क्रिस्तथा तिष्ठंति स्केचरी ॥ २१ ॥ सर्वेषु तेषु वि
ज्ञानं ज्ञानं च्चं देशिकोत्तमे ॥ काष्ठनिर्मथनाहि विषमतो वह्निरुच्यते ॥ २२ ॥
तत्काष्ठं दहते तेन तथा ब्रह्ममयं जगत् ॥ पापपुण्यविनिर्मुक्तं ज्ञानमेतद्वरा
नने ॥ २३ ॥ किंचिदुच्छिष्टमपर्यंतं ह्यात्मतत्त्वकरेश्वरि ॥ यज्ञागेतुयतालोत्न्या ६४
त्पातकी ब्रह्महा भवेत् ॥ २४ ॥ मादकं वरस्कं सकलं वर्जयेत्कनकादिकं ॥ कुल
जं पातकी तस्माद्धुल्मब्रह्मविदांवरः ॥ २५ ॥ धर्माधर्म परिज्ञानात्सकलं पप
वित्रता ॥ विण्मूत्रं स्त्रीरजो वापि नखास्थि सकलं प्रिये ॥ २६ ॥ किं चारयेन्मंत्र
वित्तु पवित्राण्येव सकृत्तं ॥ अन्नं ब्रह्म विजानीयात्तेन यस्य समुद्भवः ॥ २७ ॥

नानाश्रयतनुर्देवी पुरीषं केन विद्यते ॥ नानाविधाय देवेशी देवतास्तु किलक
स्थिता ॥ २८ ॥ तेनोदकेन यज्जातं मूत्रं कस्मात्तु दूष्यते ॥ गोमूत्रप्राशने देवि गो
मयस्य च भक्षणे ॥ २९ ॥ प्रायःश्चितं तु कथितं ब्रह्महत्यादिके प्रिये ॥ मलमूत्रे क
थं दोषो भ्रांतिरेव न संशयः ॥ ३० ॥ स्त्रीरजः परमेशानि देहस्तेनैव जायते ॥ क
थं तद्दूषणं येन प्राप्यते परमं पदं ॥ ३१ ॥ पुरुषस्य तु यद्वीर्यं बिंदुरित्यभिधीयते ॥
बिंदुरेकः परमेशानि कायाये शिवरूपकः ॥ ३२ ॥ शिवतत्त्वं न चास्त्यादि दूषणं
नास्ति बिंदवे ॥ रेतः पवित्रं देहस्य कारणं केन विद्यते ॥ ३३ ॥ ज्ञानमार्गे यस्य केलो
निर्विकल्पस्य सुंदरि ॥ सविकल्पो महेशानि पापस्तात्र जायते नरः ॥ ३४ ॥ मातृ
गर्भाद्धि निर्गत्य शिशुरेव न संशयः ॥ इंद्रियान्यखिलान्यस्य देहस्थान्यपि वल्लभे ॥
३५ ॥ निर्विकारतयात्र नान्यथा भवति प्रिये ॥ भगलिंगसमायोगे जन्मकाले स
दैव सदा ॥ ३६ ॥ काम्यंते सा यदा देवि जायते पुरुतत्त्वमाः ॥ अतएव यदा तस्य वा
सनाकुलिता भवेत् ॥ ३७ ॥ न तद्दूषणसंयुक्तं मन्यते सर्वकेषु संभवेत् ॥ पवित्रं
सकलं सद्यो वासनाकलुषं स्मृतं ॥ ३८ ॥ अतएवाध्वपात्रस्य प्रतिष्ठानंतरं त
तः ॥ मंचकं गजदंतस्य हेमरौप्यादिनिर्मितं ॥ ३९ ॥ विस्तृतं सीमरचितांतु लि
कां तत्र योजयेत् ॥ पुष्पान्विकीर्य तन्मध्ये कर्पूरस्परजेस्तथा ॥ ४० ॥ मंडूकादीकेन

श्रीमन्त्रा० तोदे विजपर्युपरि शैलजे ॥ मंडूकं पूजयेद्देवि रुद्रं कालाग्निसंयुते ॥ ४१ ॥ आधा नित्या०
रशक्तिं कूर्मं च तथानंतं वराहकं ॥ पृथ्वीविंच तथा कंदं नालं पद्मं तथा दलं ॥
६५ ४२ ॥ केसराणि च संपूज्य कर्णिकां पूजयेत्ततः ॥ मंचकं च समभ्यर्च्य तत्र पादच
तुष्टये ॥ ४३ ॥ धर्मं ज्ञानं च वैराग्यमैश्वर्यं चक्रमाद्यजेत् ॥ अपूर्वान्पूजयेद्देवा
न्तत्पादानां समीपके ॥ ४४ ॥ आत्मांतरात्मपरमज्ञानात्मानः क्रमाद्यजेत् ॥
मंचकाग्रेषु संपूज्य गुणत्रयमथार्चयेत् ॥ ४५ ॥ मूर्तिं सकललक्षणां रम्यां सर्वल
क्षणलक्षितां ॥ नानालंकारसंपन्नां सर्वशृंगारदामिव ॥ ४६ ॥ पूजयेत्परमे
शानि पंचकामेश्वरे तथा ॥ बटुकादिस्वतुर्दिक्षु पूजयेत्सिद्धिहेतवे ॥ ४७ ॥ मा
तृकां विन्यसेत्तस्यां देहे कामशरान्वितं ॥ त्रिकोणं चिंतयेत्पश्चाद्भिन्नं तत्र संपूज
येत्क्रमात् ॥ ४८ ॥ त्रिकोणमध्ये बालाख्यां कामेश्वरीं परिपूजयेत् ॥ गणेशं च
कुलाध्यक्षं तथा लक्ष्मीं सरस्वतीं ॥ ४९ ॥ त्रिकोणे भुवनं संपूज्य वसंतं मदनं प्रिये । ६५
स्तनयोः पूजयेत्पश्चान्मुखे तस्याः कलाधरं ॥ ५० ॥ दक्षपादादिमूर्धांतं वामे
मूर्धादि सुंदरि ॥ पादांतं पूजयेत्सर्वाः कला वै कामसोमयोः ॥ ५१ ॥ श्रद्धा प्री
तिरतिश्चैव धृतिः कांतिर्मनोरमा ॥ मनोहरा मनोरमा मदनोन्मादिनी प्रिये ।
५२ ॥ मोहिनी दीपिनी चैव शोषिणी च वशंकरी ॥ रंजिनी सुभगा देवि विषो ।

ड्षी प्रियदर्शना ॥ ५३ ॥ षोडशैताः स्वरसंयुक्ताः एताः कामकलां यजेत् ॥ पूषा
सुधा च सुमना रतिः प्रीतिस्तथा धृतिः ॥ ५४ ॥ ऋद्धिः सौम्या मरीचीश्च शैलजे
चांशुमालिनी ॥ अंगिरा वाशिनी चैव छाया संपूर्णमंडला ॥ ५५ ॥ तपा तुष्टा
मृतं चैव कलाः सोमस्य षोडश ॥ स्वरैरेव प्रपूज्या हि सर्वकामार्थसिद्धिदा ॥
५६ ॥ बालाक्रमं गलके स्यात्संपूज्य तदनंतरं ॥ तस्यां मदनगेहं तु पूजयेत्स्रग
मालया ॥ ५७ ॥ त्रिकोणं तद्भगं ज्ञेयं लां सर्वसिद्धिप्रदायकं ॥ सर्वानंदमयं म
ध्ये चक्रयुग्मं प्रपूजयेत् ॥ ५८ ॥ पूर्ववत्क्रमयोगेन श्रीविद्यां तत्र पूजयेत् ॥
धूपादिकं समर्प्याथ स्वलिंगं तदनंतरं ॥ ५९ ॥ तारं च भुवनेशानि महात्रिपु
रसुंदरि ॥ नमः शिवाय विद्येयं दशार्णा परिकीर्तिता ॥ ६० ॥ अनया विद्यया
देवि स्वलिंगे पूजयेच्छिवं ॥ युक्तं तत्पुरुषाघोरसद्योवामेशसंज्ञया ॥ ६१ ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शांतिस्तथैव च ॥ शांत्यतीता च संपूज्याः पूर्वेशा
वरणं यजेत् ॥ ६२ ॥ समग्रविद्यामुच्चार्य नेदिकैरो प्रपूजयेत् ॥ मध्ये दर्पणयो
देवि गंधपुष्पाक्षतादिभिः ॥ ६३ ॥ निवेद्य धूपदीपादि विजितेंद्रियमानसः ॥
सर्वसंक्षोभिणीं मुद्रां बध्वा यो निश्चालयेत् ॥ ६४ ॥ क्षोभिण्याथवा देवि
जलकुंडाख्यया थवा ॥ ब्रह्मरंध्रसिंगमालां तु द्राविणीबीजमुच्चरेत् ॥ ६५ ॥ अस्य
ध्यासेन वरारोहे यावद्रेतः प्रवर्तते ॥ रजोमयं रजः साक्षात्संविदेव न संशयः ॥

श्रीमहा० ॥६६॥ प्रकृतिः परमेशानि वीर्यं पुरुष उच्यते ॥ सर्वं साक्षात्सामरस्यं शिवशक्ति नित्या०
६६ मयं ततः ॥६७॥ तयोर्योगो महेशानि योग एव न संशयः ॥ सीत्कारो मंत्ररूप
श्च चुम्बनं स्तवनं स्मृतं ॥६८॥ नखदंतक्षतान्यत्र पुष्पाणि विविधानि च ॥ रे
जनं गायनं स्नात्वा ताडनं हवनं स्मृतं ॥६९॥ आलिंगनं तु कस्तूरी घुसृणादि
कं महेश्वरि ॥ मर्दनं तर्पणं विधिवीर्यपातो विसर्जनं ॥७०॥ कुलद्रव्यैस्संशोध्य
शिवशक्तिमयं प्रिये ॥ बीजामृतं परंब्रह्मरूपं निक्षिप्य केंदरि ॥७१॥ आचम्या
मृते त्यक्त्वा निर्विकल्पस्सदानघः ॥ श्रीविद्याक्रममंत्रश्च परब्रह्ममयो
भवेत् ॥७२॥ इति ते कथितं ज्ञानं सामरस्यं वरानने ॥ सविकल्पस्तु देवेशि पा
पसाक्षी जायते नरः ॥७३॥ विचिकित्सां करोमेत्री जायते गुरुतल्पगः ॥ अ
त एव वरारोहे निर्विकल्पस्सदा भवेत् ॥७४॥ इति श्रीमहाज्ञानार्णवे नित्या
तंत्रे श्रीविद्योद्धृती स्वजनविधिर्नाम द्वाविंशः पटलः ॥२२॥ ईश्वर उवाच
अत्यंतरं प्रवक्ष्यामि येन ब्रह्म सनातनं ॥ प्रणवाख्यं यया गेहे हृविस्तरं वदि
ते ॥१॥ इच्छाज्ञानक्रियाद्व्यरचितं स्वप्याद्युतं ॥ कंबयापरमेशानि तत्वतो ६६
नमये शिवे ॥२॥ पर्यंके पुरुषार्थैस्तु वेदैश्च परिमंडिते ॥ आत्मांतरात्मपरम
ज्ञानात्मांगविभूषिते ॥३॥ तत्पदार्थस्त्वंपदार्थासि पदार्थश्च सुंदरि ॥ पदार्थ
त्रयमेतत्तु ज्ञानस्तंत्रप्रकाशकं ॥४॥ एतत्तंत्रमयेः पदे गुंफिते बरमंडिते ॥

स्मनोवासस्य संगे परां तत्र प्रपूजयेत् ॥५॥ ज्ञानिसिद्धस्य दूतीनां चतुर्द्धा वी
रवंदिते ॥ हस्तिनी शंखिनी चैव चित्रिणी पद्मिनी प्रिये ॥६॥ चतुर्विधा हि दू
त्यस्ताः सुंदरी श्वाररूपिणः ॥ वैखरी हस्तिनी देया स्थूला यस्माद्वरानने ॥
७॥ वर्गाष्टकेन देवेशि सूते दिग्गजसंचयं ॥ तेनेयं करणी ज्ञात्वा मध्यमा शं
खिनी स्मृता ॥८॥ शंखिनी तु यथा स्वच्छा विशुद्धा पापवर्जिता ॥ सर्वदेवप्रिया
साहि शांति सौभाग्ययोजिता ॥९॥ तथा वनस्पतिगता मध्यमा वाग्वरानने ॥
चित्रिणी वल्लरी देवी महादोषविनाशिनी ॥१०॥ यस्याः फलं च परारोहे शिव
शक्तिमयं सदा ॥ शिवशक्तिमयं देवि त्वात्मनि मात्रं जगत्त्रयं ॥११॥ तेषु सर्वेषु
पश्यंति जीवेषु परमात्मना ॥ परब्रह्मणि संलीना परा वाक्परमेश्वरी ॥१२॥
पद्मिनी तु परा ज्ञेया हंसरूपस्वरविकासिनी ॥ हंसोदयेन पद्मे हित्यर्कांसंको
चमहेश्वरि ॥१३॥ विकासयंति सा सौम्यं तथा परस्य विलासतः ॥ परात्पकमारामो
यांति पद्मिनीत्वमतो भवेत् ॥१४॥ तां दूतीं तत्र संपूज्य समाधिकुसुमैः शु
चिः ॥ तदंतस्स्थकलाः पूज्याः क्रमेण वीरवंदिते ॥ तस्यादेहे वरारोहे कलापू
ज्या रसषोडश ॥ चित्कला सत्कला ज्ञानकलास्वित्कला तथा ॥१५॥ आत्म
नस्कला ज्ञेया नवतत्वः परमेश्वरि ॥ विरागता मोक्षकला परमाणुकलात
था ॥१६॥ विद्याकला चतुष्कं तु विद्धि यं चांतरात्मनि ॥ विधस्संतोषतातृप्तिः

परब्रह्मप्रकाशता ॥ परमात्मकलाह्येता संलीनाः परब्रह्मणि ॥ तुर्यातीतक
लावर्ज्यकला व्याप्तिकलापरा ॥ १९ ॥ ज्ञानात्मनः कलाह्येता श्चैतन्याः परमेश्वरि ॥
कलाः षोडशचादेवेशी श्रीविद्यायांप्रसंस्थिता ॥ २० ॥ षोडशार्णा ब्रह्मरूपाः कलाः
षोडशरूपिणी ॥ आत्मा ज्ञानस्वरूपेण त्रैलोक्यं रचयत्करवः ॥ २१ ॥ अंतरा
त्मा तत्स्वरूपत्वमारूपस्त्व मिश्रितः ॥ नून एव रजोरूपस्तमोरूपः परः शिवः ॥
२२ ॥ परमात्मा हि विज्ञेयो ज्ञानात्मा तु येया युतः ॥ एतास्कलावरारोहे तस्यादे
हेप्रकाशयेत् ॥ २३ ॥ तत्पदार्थं तु जानीहि सुरेश्वमस्यावरानने ॥ त्वंपदार्थोऽसि
वाक्यार्थं कुचयुग्मंत्र कमणही ॥ २४ ॥ योगरूढपरमेश्वरानि नादाद्ब्रह्ममयोऽसवु
त ॥ नादोदितं वरारोहे विश्वं यानिर्नसंशयः ॥ २५ ॥ तत्रैव शक्तिसंयुक्तः स्वात्मलिं
गेशिवं यजेत् ॥ परस्परप्रसादेन ब्रह्मानंदरसोऽसवेत् ॥ २६ ॥ तरसंमेन सादेवि
वहंत्याद्यागतप्रिये ॥ अर्घ्यामृतेन संयोज्य ततः श्रीचक्रमर्चयेत् ॥ २७ ॥ ब्र
ह्मानंदमयंज्ञानं कथयामि वरानने ॥ न ब्राह्मणो ब्राह्मणः क्षत्रियः क्षत्रि
यस्तथा ॥ २८ ॥ वैश्यं न वैश्यः शूद्रा न शूद्रः परमेश्वरि ॥ चांडालो नैव चांडा
लः पौल्कसो न च पौल्कसः ॥ २९ ॥ सर्वं समं विजानीयात्परमात्मनि निश्चया
त् ॥ आकारगात्पतितं तोयं निम्नमार्गेण गच्छति ॥ ग्राममध्यगतं सर्वं विष्टामू
त्रादिपूरितं ॥ मतंगश्वानमार्जारखरादिरुधिरान्वितं ॥ ३१ ॥ समरूपमपि

देवेशि गंगायां मिलितं तथा ॥ गंगागमृतं तत् देवेशि कालुष्यं नैव तिष्ठति ॥
३२ ॥ तथा सच्चिन्मये ज्ञाने समं नास्ति सर्वजंतुषु ॥ सर्वं ह्येषु गिरिजे समता
नात्र संशयः ॥ ३३ ॥ यथा सूर्यप्रकाशो ये समत्वे न प्रवर्तते ॥ उत्तमस्यापि
चान्यस्य तमः संहरते क्षणात् ॥ ३४ ॥ रोगघ्यदुग्धमत्राणि चंदनं चैव कर्द
मं ॥ अत एव महेशानि मंत्री सर्वेषु मो यथा ॥ ३५ ॥ सिद्धिस्त्वं देवि विद्येया
श्रीगुरोः कृपया प्रिये ॥ ३६ ॥ इति श्रीमहत्यानाग्यवे नित्यातंत्रे ज्ञानवृती
यज्ञविधिर्नाम त्रयोविंशः पटलः ॥ २३ ॥ श्री ... दीक्षा वि
प्रवक्ष्यामि येन शिष्यः कृतार्थो भवेत् ॥ दीयते सकलं देवी गुरवे प्राणसंयु
तं ॥ १ ॥ धनरत्नस्कवर्णादि पट्टवस्त्रेसमुच्चयं ॥ स्वयं ग्रामांतिकं चान्य
न्यापापसमुच्चयः ॥ २ ॥ तस्माद्दीक्षितिनामास्यां सर्वशास्त्रेषु सकृते ॥ पा
पिने कल्याणायापि शठायकपटाय च ॥ ३ ॥ निंदकाय न च मूर्खाय तीर्थद्वेषपराय
च ॥ भक्तिहीनाय देवेशी न देया मलिनाय च ॥ ४ ॥ दानशीलाय सत्कायसा
धुने तीर्थं चेतसे ॥ सन्मार्गवर्तिने चाग्निदेवद्विजरताय च ॥ ५ ॥ सर्वशास्त्रा
र्थवेदार्थज्ञानिने कृतनाय च ॥ दीक्षा देया वरारोहे अन्यथा पातिता कृ भवेत् ॥ ६ ॥
अथ वक्ष्ये वरारोहे दीक्षाकारणमुत्तमं ॥ मंडपं वेदिकां कृत्वा पुष्पवितानमंडि
तं ॥ ७ ॥ दीपमालावलीरम्यं नानाधूपसुधूपितं ॥ सिंदूररंगमालाभिर्मंडितं

चित्रचित्रिते ॥९॥ मध्यचक्रं वरारोहे नवकोणविराजिते ॥ चतुरस्रं च सले
व्यक्तवर्णकलशान्नव ॥१०॥ रौप्यताम्रादिरचितान्कुत्रिकारचितोऽथवा ॥
जलपूर्णान्विशेषस्य स्वर्णरत्नप्रपूरितान् ॥११॥ फलैः पुष्पैश्च वस्त्रैः सुगन्ध
रूपैर्नैवेद्यचर्चितान् ॥ वाद्यैर्न्यायाद्यस्त्रकेन च सर्वकुंभेषु पूजयेत् ॥१२॥ मध्य
कुंभे वरारोहे श्रीविद्यां परितोषयेत् ॥ क्रमं समस्तमभ्यर्च्य कुमार्योघुन्व
नेयजेत् ॥१३॥ एकवासिनीश्चलहृदं योगिनीश्च विविधा अपि ॥ तदंगं हवनं कु
र्यात्सर्वं चैत्सुहितं च ॥१४॥ गुरुः शिष्यं सुपानीयं भक्तिनम्रमभक्रम्मुषु ॥
प्राणानायम्य विधिवच्चक्षुः पीठे निवेश्य च ॥१५॥ सकराह्वामित्यादि मंत्रै
श्चिरंतीमिर्मुनेः स्वयं ॥ कलशैः पिंचेत्स्तंस्थितं देवं कलेयन्द्वके ॥१६॥
परिधाप्य स्ववासांसि श्वेतनाद्ब्रवलेप्य च ॥ वामतः स्थापयेच्छिष्यं निस्वासतनपू
जितेस्तु ॥१७॥ सर्वस्वं गुरवे पात्यं शिष्यं तत्र निवेदयेत् ॥ पद्मध्वजं स
श्रीचक्रे तस्य मूर्ध्नि विविनियत् ॥ स्वहस्ताभ्यां लोकयेत्तां दृष्ट्या हि दिक्षुमेलं
येत् ॥ आज्ञास्सिकं मणिकं क्षांघ्राविन्नि श्वलतां स्तवेत् ॥१९॥ नैश्चलं तस्य सबो ६८
वेद्यं शून्यं भूत्याविवर्जितं ॥ शून्यं शिवमयं वक्त्रं पुरुषः परमेश्वरि ॥२०॥ अधू
न्यं शाक्तराधाहि प्रकृतेः परमेश्वरि ॥ शाक्त्याधिक्यं रजस्त्वाल्यं संयोगाच्छि

वयोर्यदा ॥२१॥ स्वभाव स्यात्तदा ह्येषा योगः स्यादाधिकत्वतः ॥ शक्तिर्जीय
दिनिख्याता शिवो निश्चलता प्रिये ॥२२॥ एतु पिरिवमंत्रैः कथितो निः
श्चलायतः ॥ गुणत्रयं तु कथितं जायते तत्गुणात्प्रिये ॥२३॥ तमोगुणात्क
ष्टुभिस्त्व शिवं निश्चलरूपिणी ॥ शिवाधिक्यं गुणातीतं तत्त्वकं जानीहि
सुंदरि ॥२४॥ शिवशक्तिसमायोगाच्छिवाधिक्ययुतं भवेत् ॥ तदा तूर्य
विजानीयात्सर्वबंधनिकृंतनं ॥२५॥ कलाषोडशकं देवि आलिंगनं त्वेव
स्थिता ॥ श्रीविद्याबीजसंदीना शिष्यदेहे प्रकाशयेत् ॥२६॥ चतुर्विधा
षोडशार्णा महात्रिपुरसुंदरी ॥ तच्छ्रवणात्तु मनः स्थैर्यं उन्मनी निगच्छति ॥२७॥
ब्रह्मज्ञानं मनः पक्षी तृष्णाचंचुर्विलासितः ॥ संकल्पेन विकल्पेन पक्षाभ्यां
चंचलः सदा ॥२८॥ मोहमत्तस्त्वेकामश्वक्रोधाहंकारदुर्मदैः ॥ सन्नद्धुपिक
सबलः कृत्वा हत्यपदद्वयं ॥२९॥ संसारवृक्षे द्वे वयं धनपुत्रादि मूलके ॥
अविद्याविस्तृतिं निंदात्कनिरागवास्कशाखिते ॥३०॥ अभिलाषदलारपु
व्यसनतिपातकादिभिः ॥ पूर्णपूर्णे वरारोहे पापपुण्यफलान्विते ॥३१॥ तत्र
शारवाद्युपरिक्लेशकतहृदयं सिद्धिरेस्थितः ॥ पक्षिणं तं समाक्रम्य तत्तानपाशब
धानान्तुं ॥३२॥ पक्षिखेचरतो नित्यं कटाक्षैः श्रीगुरोः प्रिये ॥ तेन पक्षह

श्रीमद्गु० येच्छिन्ने यदा स्रवति निश्चयात् ॥३३॥ तदा समुन्मनीभूत उन्मुखो निश्चया नित्या०
६९ त्मिये ॥ सर्वसंकल्परहिता कला स तदशीप्सवेत् ॥३४॥ उन्मनीतावनस्ताहि
भवपारा निकेतने ॥ उन्मन्या सहितो योगी न योगी नोन्मनीपरा ॥३५॥ यथाल
पूरं गदीपा नदीपान् पुनः श्यामा ॥ अत एव महेशानि दस्यासंक्रमणं युजेत् ॥
३६॥ तत्त्वमस्यादिवाक्येन पश्चाद्वाच्यं हि योजयेत् ॥ आदावकथ्य संयोज्य
स्पर्शनि वर्णको ऽत्र चने ॥३७॥ स्पर्शास्पर्शं द्वासाति श्रीगुरोः करसंस्रवः ॥ स्प
र्शेन धातवः सर्वे लोहाद्यात्स्वरूपवदिते ॥३८॥ स्वर्णधातवः सर्वे विशिष्ट
सत्यान्विताः ॥ करः स्पर्शस्तु देवेशि प्रपंचमालिनादिके ॥३९॥ लोहं तत्रा
शयित्वा हि स्वर्णत्वं करोति हि ॥ करे पुष्पफलान् कृत्वा ब्रह्मरंध्रे करं नि
पेत् ॥४०॥ तस्माद्ब्रह्मत्वमेवासि त्वं वाक्यार्थं कथयेत् ॥ अनिर्वाच्यं पद
श्यं स्पर्शेन ब्रह्मरंध्रके ॥४१॥ ब्रह्मरंध्रे स हस्तं वा रक्षेत् धवलो गुरुः ॥ वरा
भयकरो नित्यो ब्रह्मरूपी सदानघः ॥४२॥ जागर्ति परमेशानि निजरूपा ६९
नप्रकाशकः ॥ पश्चात्तु षट्चक्रविज्ञानं शिष्याय प्रतिबोधयेत् ॥४३॥ आ
धारे स्वर्णवर्णे च चतुर्दले स्फुशोभिते ॥ वादिसांतैश्चतुर्वर्णैः स्फुरद्धेमसम
प्रभैः ॥४४॥ गणेशासहितं विद्धि स्वाधिष्ठानं ततः प्रिये ॥ हृद्गपत्रतीका

शे स्फुरद्विद्रुमसन्निभैः ॥४५॥ बादिलांतैः स्फुरद्वर्णैर्ब्रह्मणा मंडितं प्रिये ॥ नील
वर्णं तृतीयं हि मणिपूरं दशारकं ॥४६॥ विद्युत्पुंजप्रभावर्णैर्डादिफांतैश्च मंडि
तं ॥ गदाधरहरिप्रोदं चतुर्थं स्फुरत्पंकजे तत्र ते ॥४७॥ पिंगासंद्वादशारं तु कादिठं
तैः स्फुरल्लोचनैः ॥ विस्फुलिंगप्रभासादिव्यैः शिवेन च युतं प्रिये ॥४८॥ विशुद्धचक्रं
दैवेशी धूम्रवर्णं कलात्मकं ॥ स्वरैर्मायिक्यसंकाशैर्मंडितं परमेश्वरि ॥४९॥
जीवात्मनोपि प्रच्छिन्नं हि तज्ज्ञानी हि तदेततः ॥ आज्ञाचक्रे महेशानि विद्युत्को
टिसमप्रभे ॥५०॥ हिद्दलं लक्षवर्णाभ्यां शुभ्राभ्यां परिमंडितं ॥ परमात्मस्वरू
पाढ्यं नादरूपं हि सत्तमे ॥५१॥ नादो विलीनो यस्माद्धि तस्माद्ब्रह्मतदाच्युते ॥
देहे स्वराणि देवेशी नाद एवात्र कारणं ॥५२॥ नादः पवनसंयोगात्कंठोद्भि
न्या युतो यदा ॥ अः संज्ञः परमेशानि षट्चक्राणां दलेषु सः ॥५३॥ पुनर्वाशाद्वये
रूपं च प्राप्तवान् स्फुरवंदिने ॥ अव्यक्तरूपता प्राप्ता उदात्तादिस्वरात्मकान् ॥
५४॥ एवं सर्वं ज्ञातो तस्मै दद्यात् शिष्याय सद्गुरुः ॥ शिष्यस्तदा श्रीगुरोस्तु पू
जां कुर्यात्स्वलक्षणां ॥५५॥ रत्नाभरणशोभाढ्यां पट्टवस्त्रधनान्वितां ॥ गजा
श्वमहितां सद्वै महिषीगोसमन्वितां ॥५६॥ क्षेत्रग्राममहारामं रम्यं वेदी
शतान्वितं ॥ स्वर्णरश्मि प्रसारितां कस्तूरीचंद्रचंदनं ॥५७॥ गुरुसंतोष्य

श्रीमद्भा० विधिवत्प्रसादं तत्त्वसंयुतं। गृण्हीयाच्छिष्यवर्यस्तु गुरुस्तस्मा अनंतरं॥५८॥
७० बालां प्रकाशयेत्कर्णे दक्षिणे च ततः परं। पंचसिंहासनगता विद्याः पुत्र्यात्प्र
काशयेत्॥५९॥ ततोरहस्यं परमं महात्रिपुरसुंदरी। प्रकाशयेद्दक्षकर्णे पुत्र
स्नेहमयी प्रिये॥६०॥ सर्वसौभाग्यजननीं भोगमोक्षफलप्रदां। श्रीविद्यां षो
डशार्णां तु ब्रह्मानंदस्फुरत्कलां॥६१॥ न प्रकाशयेद्देवी सर्वस्वमिव कम्प्र
ते। विस्तृत पुराणेषु यामलेष्वपि सकन्वने॥६२॥ गुप्ता श्रीषोडशार्णेयं निधान
मिव संस्मृतं। सहोदराय सर्वस्वप्राणदायापि वै धवे॥६३॥ रात्रिरात्र पुत्रदा
याप्पि पुत्राय प्राणदाय च। न देया षोडशार्णेयं सर्वस्वमिव कुत्र द्विजे॥६४॥ पु
त्रदारस्सहितं हि शिरो देयं कथं च न। न देया षोडशार्णी प्राणैः कंठगतैरपि।
६५॥ श्रीपितु व्योम हाविद्यास्त्वयो निरिवपावती। तदेकं लवणं लीनं यथा
भवति चांबुजे॥६६॥ मनो भवति विलीनं पदद्वयोः श्रीगुरुसंः प्रिये। तदा देया
महाविद्या कृपया षोडशाक्षरी॥६७॥ अक्षरैः सहिता वापि निरक्षरतया स्थि
ता॥ आकाशे नीलिमा देवि लीनं तोयं रसे यथा॥६८॥ अक्षराणि तथा
संति श्रीविद्यायां सुरेश्वरि॥ षोडशगुणं ब्रह्मरूपां जानीहि परमेश्वरि॥६९॥ ७०
पद्मारत्नमये दीपकज्जलं नैव विद्यते। श्रीविद्यायां तथाव्यक्तव्यक्तता।

वीरवंदिते॥७०॥ नद्यस्याध्यस्य कस्यापि द्यावाक्त्राणप्रियायन्न॥ कृतार्थो स्मि भूति
वाक्यस प्रवदेद्धृशिकोत्तमः॥७१॥ षोडशार्णां महाविद्यां न चाहृतस्वरूपिणी॥
एकोच्चारपदं देवि राजपेयुस्य कोटयः॥७२॥ अश्वमेधसहस्रं तु तुल्यं न
यांति सर्वदा॥ एकोच्चारणं देवि राज्यादिक्षिप्ययुव्रांसवेत्॥७३॥ धेनूनां कपि
लानां हि दत्तायोः कोटिकोटयः॥ एकोच्चारणं देवि तुल्यं नायांति सर्वदा॥
७४॥ कदोदये पुण्यतिथौ हेमभारसहस्रके॥ तुलापुरुषकोटयस्तु तुल्यं न
यांति षोडशी॥७५॥ यदा यदृण्यं नेवरक्तं तदा सर्वं निरामयं॥ तथा श्रियां महा
विद्या षोडशार्णा वरानने॥७६॥ परमात्मस्वरूपेयं विश्वस्पंदनरूपिणी॥
श्वासोच्छ्वासतस्पाद्देवी षट्शतान्येकविंशति॥७७॥ सहस्राणि दिवारात्रौ हं
सः स्वात्मजपे सदा॥ स्पंदनत्वेन सकलं व्याप्य तिष्ठति सर्वतः॥७८॥ ओ
त्वेनाजपा ज्ञेया सूर्यसोमस्वरूपिणी॥ निरंजनस्वरूपा च निराभासः
स्वरूपिणी॥७९॥ अतेस्तु तत्तु सा यासूक्ष्मत्वेन वरानने॥ प्रबोधा पादेने
नापि मुक्तिता बाह्या जायते या॥८०॥ हृदंगे शैशिता दे विहंसे नैव प्रभृतिं॥
अव्यक्तरूपा गायत्री छंदो वरानने॥८१॥ साक्षात्परमहंसास्या देव
तां परमेश्वरी॥ श्रीविद्यां व्यापकां विधि परज्योतिः स्वरूपिणीं॥८२॥ आ

श्रीमत्स्ता० स्वस्वरूपलिंगं हि मायागेहगतं प्रिये॥ स्वाद्यान्तरं गिणीनीरक्षालितं सर्ववंद
७१ नं॥ ८२॥ स्वमनोमंडितेवापि समाधिकुसुमैर्वरैः॥ ज्ञानाग्नौ रेत्रपंचाख्यं नित्या
धूपंदीपंच चिन्मये॥ ८४॥ अधितिष्ठति सर्वत्र सर्वेनैवेद्यमंडितं॥ निःप्रप
चं निराभासं केवलं ब्रह्मसत्कलं॥ ८५॥ षोडषार्णापरा विद्या श्रीविद्यैषाप्रति
धीयते॥ शुक्लपक्षे प्रतिपदादिने सुप्रवासे वरानने॥ ८६॥ मंत्राख्यारंभणं कुर्या
च्चंद्रसूर्ययोः॥ नवारमासदोषादि ग्रहणेचेंद्रसूर्ययोः॥ ८७॥ पवित्र
सं वदंते गीदमुनेव्यास्तु सदिने॥ चैत्रे वै निष्फलं श्रेयनी रुजायतको नके॥
८८॥ वैशाखे रत्नलाभस्स्यात् ज्येष्ठे च मरणं ध्रुवं॥ आषाढे बंधुनाशं च श्राव
णे च शतायुषं॥ ८९॥ दुःखोत्पाद्यं भाद्रमासे आश्विने सर्वसंपदः॥ कार्तिके
ज्ञानलाभस्स्यात् मार्गशीर्षे धनं मतं॥ ९०॥ पौषे पुत्रसंपत्तिः माघे संपत्ति
रुत्तमा॥ फाल्गुने सर्वकार्याणि मासानां फलमीदृशं॥ ९१॥ शिष्यस्य
॥ ९२॥ श्रेयमार्गे हि गृहीत्वा स्कंदरि प्रिये॥ नाम सकृत्पठेद्देवि मनो हि रक्षति ब्रह्म
श्री विद्या हि यद्यस्य न्यसेत् व्यक्तरूपिणी॥ श्रीविद्याक्षरपंक्तिरक्तपर ७१
ब्रह्मणि चिन्मयी॥ ९३॥ उदकं लवणं लीनं यथा तिष्ठति पार्वती॥ तस्माद्ब्रह्म

मयि विद्धि सर्वेश ॥ त्रिषु योजितं॥ ९४॥ इति श्रीमत्स्तानार्णवे नित्यातंत्रे दी
क्षाविधिर्नाम चतुर्विंशः पटलः॥ २४॥ ईश्वर उवाच॥ पवित्रारोपणं वक्ष्ये
साधकानां हिताय च॥ वर्षमात्रकृता पूजा निष्फला भवति ध्रुवं॥ १॥ तस्मा
त्पवित्रपूजा हि कर्तव्या सिद्धिहेतवे॥ आरभ्याषाढे मिथुनार्के हि तुलासंक्रां
ति मासके॥ २॥ अतिरम्या महापूजा पवित्राणां सुरेश्वरि॥ पक्षद्वयेपि पू
जा स्याच्चतुर्थ्यां सप्तमी दिने॥ ३॥ नवम्यां वा चतुर्दश्यां पवित्रारोपणं य
जेत्॥ सौवर्णरौप्यताम्राणां सूक्ष्मसूत्राणि कारयेत्॥ ४॥ कार्पाससूत्रं वा
न्यैव पट्टसूत्रसमुद्भवं॥ त्रसरीसूत्रसंभूतं पद्मवल्कलसंभवं॥ ५॥ दर्भ
मुंज तृणोद्भूतं पवित्रायप्रकल्पयेत्॥ प्रणवः श्वेत सोमा वह्नि ब्रह्मा नागो
गुहो रविः॥ शिवः सर्वदेवश्च नवतंतून् पूजयेत्॥ ६॥ सिरामंत्रेणा
भिमंत्र्य हृन्मंत्रेण ततः पुनः॥ ७॥ प्रक्षाल्य ततो स्पृष्ट्वास्त्रमंत्रेण चंद
शिकः॥ अवरुध्य चनत्रेण ग्रथितं कवचेन हि॥ ८॥ रोचनाकुंकुमास्यां
च रक्तचंदन चंदनैः॥ कस्तूरीकुंकुमाद्यैश्च कर्पूरविमिश्रैरपि॥ ९॥ गैरिका
द्यैर्विचित्रं तत्कारयेत्तु मनोहरं॥ मूलमंत्रेण चास्त्रस्य रञ्जापयेद्दश
कोणके॥ १०॥ पवित्रं वदं सकलं षडैः ॥ एकपवित्रीतिं॥ कृत्वा देवे री

श्रीमद्त्ना० पूर्वस्मिन्दिवसे साधक एव वा ॥११॥ अष्टोत्तरशतेनैव सूत्रेण नवसूत्रेण कल्पितैः ॥ नित्या
७२ उत्तमं तत्पवित्रं हि तदर्द्धे मध्यमं स्मृतं ॥१२॥ तस्याप्यर्द्धे कनिष्ठं स्यात्त्रिवि
धं कथितं प्रिये ॥ अधिवासनं वक्ष्यामि यथावद्विस्तरात्कृते ॥१३॥ चतु
श्रियासनं तत्र पुष्पाद्यैः स्थापयेद्देशिकः ॥ पवित्रं तु पवित्राणि पञ्चामृतसमु
च्चये ॥१४॥ रचितान्यमूलैः पञ्चरत्नैः सर्वौषधिगणैः ॥ नववस्त्रयुगेना
थ सम्यगाच्छाद्य संकृते ॥१५॥ देवीकुम्भं प्रतिष्ठाप्य पूर्णं च वारिकादिभिः ॥
देवीमावाह्य तत्कुम्भे मूलमन्त्रेण पूजयेत् ॥१६॥ ततः कुम्भे समभ्यर्च्य पवित्रा
र्पणमारभेत् ॥ आविश्य यापवित्राणि गुरोर्नाम्ना च देशिकः ॥१७॥ पवित्रं गुरु
वेदग्धात्सर्वस्य स्तदनन्तरं ॥ गुरुरुत्थकिं विधेस्थाप्य च पवित्राण्यर्पयेत्ततः ॥१८॥
तिथिनित्यानां यथावत्पवित्रारोपणं यजेत् ॥ नवचक्रस्थितायाश्च चक्रेश्वरी ॥
नवकाय च ॥१९॥ तस्मिन्दद्याद्देवी प्रत्येकं साधुपूर्वकं ॥ पवित्रं च सम
र्पयेद्गुरून्स्वांश्च पंक्तिलिखेत् ॥२०॥ स्वर्णालंकारवस्त्रैश्च नानाधूनस्तु ७२
चैः ॥ तत्प्रसादं पवित्रं च धारयेत्तदनन्तरं ॥२१॥ तदङ्गहोमं निर्वर्त्य पवित्रेण
समर्चयेत् ॥ कुमारीपूजनं कुर्यात्ततः सुवासिनीगणाः ॥२२॥ योगिन्यो यो
गिनश्चैव ब्राह्मणा विविधा गणाः ॥ पूज्या हि परमेशानि यदिच्छेत्सिद्धिमा

त्मनः ॥२३॥ इति श्रीमत्तन्त्रार्णवे नित्यातन्त्रे श्रीविद्यापवित्रारोपणविधि
र्नाम पञ्चविंशः पटलः ॥२५॥ ईश्वर उवाच ॥ दमनारोपणं वक्ष्ये साधकानां
हिताय च ॥ संवत्सरकृता पूजा येन पूर्णा भवेत्प्रिये ॥१॥ तपोऽसि गायद्दमनो म
हर्षिकः सर्वदा ॥ तस्मीभवन्त्रदा पालिरतिः श्रीतिस्त्र दुःखिताः ॥ तं नेत्रवा
रिसंभूतादमनस्य लता सवेत् ॥ तद्गौरस्यं च सौभाग्यं महदासीत्सकलाचले ॥
३॥ तेन संतुष्टहृदा वराद्दत्तो मया प्रिये ॥ रत्यै श्रीम्भे च तस्मात्तु दमनः प्रकीर्ति
तः ॥४॥ दमनेन च यो मन्त्री वर्षमध्ये न पूजयेत् ॥ तस्य सांवत्सरी पूजा दम
नाय भविष्यति ॥५॥ इति तस्मै वरं दत्तो मयैव शङ्करवादिने ॥ अन्यथा तत्कलं
वर्षकृतनकामाय जायते ॥६॥ समूलं दमनं दिविस्थाप्य पत्राकेवरे ॥ दम
नं च नवधा कुर्यात्पूजयेत्तदनन्तरं ॥७॥ आनन्दभैरवबीजेन ततो भिन्नं च कन्द
रि ॥ आनन्दभैरवबीजेन नवधा बिन्दुना सह ॥८॥ नवप्रकारं भिन्नांगं मदनं
पूजयेत्क्रमात् ॥ अघोरविद्यया पश्चाद्दत्ति सिंच्य मम भवाहि ॥९॥ पूर्वोक्तयाद
क्षिणस्यां दिशि सिंहासने कृत्या ॥ अस्त्रेण रक्षणं कुर्यात्कवचेनैव ततः परं ॥
१०॥ ध्यात्वा त्रिशूलमुद्रां तु नामये दमनोपरि ॥ चैत्रे सिते च तुर्दश्यां दमनारो
पणं भवेत् ॥११॥ उद्धरेदस्त्रमन्त्रेण हृदयेन च लेपयेत् ॥ श्रीखण्डकुसुमैर्वा

श्रीमत्त्रा० दौरधिवासं चकारयेत् ॥१२॥ प्रथमे दिवसे कुर्याद् अधिवासनमुत्तमं ॥ सद्योधि नित्या
७२ वासनं वापि षण्पूजाफलसिद्धये ॥१३॥ प्रातःकाले चतुर्दश्यां नित्यार्चानंतरं त
तः ॥ नवकोणं विलिख्याथ सिंदूरेण महाप्रभे ॥१४॥ कलशान् नव संस्थाप्य हेमर
त्नादिपूरितान् ॥ एकं वा कलशं रम्यं स्थापयेद् देशिकोत्तमः ॥१५॥ दक्षतो मंडलं
कृत्वा कुंकुमाद्यैर्विचित्रितं ॥ अशोकतरुमालिख्य त्रिकोणं मध्ये लिखेत्तु ॥१६॥
तन्मध्ये पूजयेत्कामं तरुणं चारुणप्रभं ॥ रक्तवस्त्रं रक्तपुष्पं वामदक्षिणयोः श्री
यो ॥१७॥ रतिप्रीतिर्विभ्राद्यं पंचबाणधनुर्द्धरं ॥ वसंतसहितं कामं कदंब
वनमध्यगं ॥१८॥ मंत्रेणानेन तं कामं पूजयेत्सिद्धिहेतवे ॥ वाग्भवं भुवने
शानि श्रियं कामात्मकेन च ॥१९॥ कामाय नमः आलिख्य विधेयं रुद्रवर्णि
नी ॥ कांबीजत्रयं चोक्ता फरेमालकसुव्रते ॥२०॥ रत्यै नमः स्वाहा स्ववर्णी
रति विद्यावरानने ॥ प्रीतिं वदेत् तिलकानप्रीति माव स्वर्णिका ॥२१॥
गौरश्यामं सरतिप्रीतिक्रमेण मणिभूषणे ॥ पद्मतांबूलहस्ते च रक्तवस्त्र
विराजिते ॥२२॥ दिव्याभरणभूषे च पुष्पदामविराजिते ॥ वामदक्षिणयोर्ध्या ७२
त्वा कामस्य वदनेतरे ॥२३॥ वसंतं पूजयेत्पश्चात् कदंबवनमध्यगे ॥ गौरवर्णं
वामहस्तस्थ धार्यघटान्वितं ॥२४॥ दक्षहस्तेन दधतं नानापुष्पसमुच्च

१०६

यं ॥ सांगं कामं प्रपूज्याथ धूपदीपादि दर्शयेत् ॥२५॥ दमनेः पूजितं कामं सर्वका
र्याणि साधयेत् ॥ तेन सम्यक् प्रपूज्याथ महात्रिपुरसुंदरीं ॥२६॥ क्रमं समर्च
येत्सम्यक् कुमारीः पूजयेद्बुधः ॥ स्ववासिन्यश्च संपूज्य योगिनीगणमर्च
येत् ॥२७॥ ब्राह्मणान् परिपूज्याथ नानादर्शनमानवान् ॥ तद्गृहवनात् सु
श्वाद्भुतं रत्नादिभूषणैः ॥२८॥ स्वर्णतारसहस्रैश्च दिव्यवस्त्रैर्मनोरमैः ॥
पूजयित्वा ततो देवि पूर्णाहुतिमथाचरेत् ॥२९॥ अनेन विधिना देवि
मनारोपणं यजेत् ॥ तस्य सांवत्सरी पूजा सफलांशोभसंभव ॥३०॥ इ
ति श्रीमत्तन्त्रार्णवे नित्यातंत्रे श्रीशिववामेश्वरसंवादे श्रीविद्यादमनारो
पणविधिर्नाम षड्विंशः पटलः ॥२६॥ श्रीरस्तु ॥ अस्मिन् श्रीमन्नित्या
तंत्रे प्रतिपटले निरूप्य श्रीविद्याप्रयोगः संपद्यते तदनुक्रमः ॥ स्वरूप
ज्ञेयमात्रं ॥१॥ प्रातःकृत्यमारभ्य स्नानादि संध्या मंडपपूजा भूतशुद्धि
तत्शुद्धिः प्राणप्रतिष्ठा ऋष्यादि षडंगं मातृकान्यास षडंगमुद्राः ॥२॥
अंतर्यागः ॥३॥ पीठशक्तिपूजन सिंहासनपूजा सिंहासनमंत्रावाहिन्या
दिमुद्रा सुधमुद्रादि ॥४॥ आरार्तिकं पंचरत्नं नवरत्नेश्वरी नीराजनं मं
त्रचक्रमुद्रा नैवेद्य धूप दीप मंत्र नित्य होम बलिदानानि ॥५॥ पूर्वसिंहा

श्रीमत्त्रा० ७४ सनं ॥६॥ दक्षिणसिंहासनं ॥७॥ पश्चिमसिंहासनं ॥८॥ उत्तरसिंहासनं ॥ नित्या
मानायश्च ॥९॥ करशुद्धिविद्याचतुरासनविद्यावाहनविद्यायजनविद्या
मेरुरूपं श्रीचक्रोद्धारं भेदध्वनिरूपणानि ॥१०॥ पञ्चदश्युद्धारकादि
विद्यानिरूपणं ॥११॥ त्रिपुरसुन्दर्या द्वादशभेदनिरूपणं ॥१२॥ षोडश्युद्धारः
॥१३॥ पात्रासादनादि श्रीचक्रन्यासपर्यंतं ॥१४॥ नित्यामंडलोद्धारध्यान
यांगावधिः ॥१५॥ अंतर्यागादि बलिदानांतपूजा ॥१६॥ जपमालापुरश्चर
णं काम्यप्रयोगः ॥१७॥ नवरत्नपूजाविधानं ॥१८॥ बीजत्रयसाधनं ॥१९॥
एकलक्षादिलक्षादिजपफलं कुंडलक्षणकुंभेचक्रहोमविधिः तद्द्रव्य
कहोमफलहविर्द्रव्यमानादि ॥२०॥ ज्ञानहोमविधिः ॥२१॥ कुमारीपूज
नादि द्वितीयागसविकल्पनिर्विकल्पभेदकथनयोगपीठन्यासदूतील
क्षणं तत्पूजनविध्यादि ॥२२॥ ज्ञानद्वितीयागः ॥२३॥ दीक्षाविधिः ॥२४॥ ७४
पवित्रारोपणं ॥२५॥ दमनारोपः ॥२६॥ अथ विद्याभेदः ॥ यथा ॥ लस
हईएरक ५ ॥ इति निर्वाणसुन्दरी ॥ कएईलह्रीं हसकहलह्रीं सकलह्रीं ॥
इति कामराजविद्या ॥ हसकलह्रीं हसकहलह्रीं सकलह्रीं ॥ इति लोपामु
द्राविद्या ॥ कहएईलह्रीं हकएईलह्रीं सकएईलह्रीं ॥ इति मनुविद्या ॥ सह

...ह्रीं ॥ इति पराषोडशी ॥ ॐ ह्रीं क्लीं श्रीं ऐं क्लीं सौः क १५ ऐं क्लीं क्लीं ह्रीं ॥ इति ... ॥
चैतन्यतुरीयाषोडशी सिद्धाः ॥ इति ... ॥ शाके १७०० विश्वावसुसंवत्सरे ... ॥

श्रीमत्त्रा० ७५ कएईलह्रीं सहकहएईलह्रीं हसकएईलह्रीं ॥ इति चान्द्री ॥ हसक
एईलह्रीं हसकहएईलह्रीं सहकएईलह्रीं ॥ इति द्वाविंशत्यक्षरा त्रि नित्या
कूटा कौबेरी ॥ कएईलह्रीं हसकहलह्रीं सहसकलह्रीं ॥ इति समद
श ॥ स्वयं ॥ इत्यविद्या ॥ सएईलह्रीं सहकहलह्रीं सकलह्रीं ॥ इति
पञ्चदशी नंद्याराधिता ॥ कएईलह्रीं हसकहलह्रीं सकलह्रीं ॥ इति
त्रिकूटेन्द्री ॥ हसकलह्रीं हकहलह्रीं सकहलह्रीं ॥ सौरी ॥ इयमेव मतान्त
रेणैव ॥ हसकलहकहलह्रीं सकहलह्रीं ॥ इति ॥ हसकलह्रीं हसकहल
ह्रीं सकलह्रीं हसकलह्रीं सकहलहसकलह्रीं ॥ इत्यष्टाविंशत्यक्षरी
चतुःकूटा ॥ हसकलह्रीं हसकहलह्रीं सकलह्रीं सएईलह्रीं स
तकहलह्रीं सकलह्रीं ॥ इति त्रिंशदक्षरा षट्कूटा ॥ कएईलह्रीं हसक
हलह्रीं सकलह्रीं ॥ इत्यगस्त्याक्षरी द्वासाराधिता इति द्वादशभेदः ॥
अथ षोडशीविद्याभेदः ॥ क्लीं श्रीं क १५ इयं जाग्रत्षोडशी ॥ ॐ ह्रीं श्रीं क १५ इयं
स्वप्नषोडशी ॥ ॐ क १५ इयं सुषुप्तिषोडशी ॥ श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं
क १५ सौः ऐं क्लीं ह्रीं श्रीं ॥ इयं तुरीयाषोडशी ॥ अथ अस्यास्तुरीयाभेदाः ॥ य
था ॥ ह्रीं श्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क १५ सौः ऐं क्लीं ह्रीं श्रीं ॥ इति मायादिषोडशी
ह्रीं श्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क १५ सौः ऐं क्लीं ह्रीं श्रीं ॥ इति कामादिषोडशी ॥ ७५

॥ इति श्री मह्लागणिनिर्यातंत्रं समाप्तं ॥

७ - १५० -